
ഉ

# श्रीमन्नारायणीयम्



உ

# गोविन्द दामोदर स्वामिनः



# Table of contents

श्रीमन्नारायणीये प्रथमं दशकम्....1
श्रीमन्नारायणीये द्वितीयं दशकम्....4
श्रीमन्नारायणीये तृतीयं दशकम्....7
श्रीमन्नारायणीये चतुर्थं दशकम्....10
श्रीमन्नारायणीये पञ्चमं दशकम्....13
श्रीमन्नारायणीये षष्ठं दशकम्....16
श्रीमन्नारायणीये सप्तमं दशकम्....18
श्रीमन्नारायणीये अष्टमं दशकम्....21
श्रीमन्नारायणीये नवमं दशकम्....24
श्रीमन्नारायणीये दशमं दशकम्....27
श्रीमन्नारायणीये एकादशं दशकम्....29
श्रीमन्नारायणीये द्वादशं दशकम्....30
श्रीमन्नारायणीये त्रयोदशं दशकम्....33
श्रीमन्नारायणीये चतुर्दशं दशकम्....36
श्रीमन्नारायणीये पञ्चदशं दशकम्....38
श्रीमन्नारायणीये षोडशं दशकम्....41
श्रीमन्नारायणीये सप्तदशं दशकम्....43
श्रीमन्नारायणीये अष्टादशं दशकम्....46
श्रीमन्नारायणीये एकोनविंशं दशकम्....48
श्रीमन्नारायणीये विंशं दशकम्....50
श्रीमन्नारायणीये एकविंशं दशकम्....52
श्रीमन्नारायणीये द्वाविंशं दशकम्....54
श्रीमन्नारायणीये त्रयोविंशं दशकम्....57
श्रीमन्नारायणीये चतुर्विंशं दशकम्....60

श्रीमन्नारायणीये पञ्चविंशं दशकम्..........................................................63
श्रीमन्नारायणीये  षड्विंशं दशकम्..........................................................66
श्रीमन्नारायणीये सप्तविंशं दशकम्..........................................................68
श्रीमन्नारायणीये अष्टाविंशं दशकम्..........................................................70
श्रीमन्नारायणीये एकोनत्रिंशं दशकम् ......................................................72
श्रीमन्नारायणीये त्रिंशं दशकम्...............................................................74
श्रीमन्नारायणीये एकत्रिंशं दशकम्..........................................................77
श्रीमन्नारायणीये द्वात्रिंशं दशकम्...........................................................80
श्रीमन्नारायणीये त्रयत्रिंशं दशकम् .........................................................82
श्रीमन्नारायणीये चतुस्त्रिंशं दशकम् .......................................................85
श्रीमन्नारायणीये पञ्चत्रिंशं दशकम्.........................................................88
श्रीमन्नारायणीये षट्त्रिंशं दशकम्...........................................................91
श्रीमन्नारायणीये सप्तत्रिंशं दशकम्.........................................................94
श्रीमन्नारायणीये अष्टात्रिंशं दशकम्........................................................97
श्रीमन्नारायणीये एकोनचत्वारिंशं दशकम्..............................................99
श्रीमन्नारायणीये चत्वारिंशं दशकम्.......................................................102
श्रीमन्नारायणीये एकचत्वारिंशं दशकम् .................................................104
श्रीमन्नारायणीये द्विचत्वारिंशं दशकम् ..................................................106
श्रीमन्नारायणीये त्रिचत्वारिंशं दशकम् ..................................................108
श्रीमन्नारायणीये चतुश्चत्वारिंशं दशकम्.................................................110
श्रीमन्नारायणीये पञ्चचत्वारिंशं दशकम् ................................................112
श्रीमन्नारायणीये षड्चत्वारिंशं दशकम्...................................................115
श्रीमन्नारायणीये सप्तचत्वारिंशं दशकम् ................................................117
श्रीमन्नारायणीये अष्टचत्वारिंशं दशकम् ................................................119
श्रीमन्नारायणीये एकोनपञ्चाशं दशकम् .................................................121
श्रीमन्नारायणीये पञ्चाशं दशकम्...........................................................123
श्रीमन्नारायणीये एकपञ्चाशं दशकम्.....................................................126

श्रीमन्नारायणीये द्विपञ्चाशं दशकम्......................................................128
श्रीमन्नारायणीये त्रिपञ्चाशं दशकम्......................................................130
श्रीमन्नारायणीये चतु:पञ्चाशं दशकम्....................................................132
श्रीमन्नारायणीये पञ्चपञ्चाशं दशकम्.....................................................134
श्रीमन्नारायणीये षट्पञ्चाशं दशकम्.......................................................136
श्रीमन्नारायणीये सप्तपञ्चाशं दशकम्.....................................................138
श्रीमन्नारायणीये अष्टपञ्चाशं दशकम्.....................................................140
श्रीमन्नारायणीये एकोनषष्टितमं दशकम्................................................143
श्रीमन्नारायणीये षष्टितमं दशकम्..........................................................145
श्रीमन्नारायणीये एकषष्टितमं दशकम्....................................................147
श्रीमन्नारायणीये द्विषष्टितमं दशकम्......................................................149
श्रीमन्नारायणीये त्रिषष्टितमं दशकम्......................................................152
श्रीमन्नारायणीये चतुष्षष्टितमं दशकम्...................................................154
श्रीमन्नारायणीये पञ्चषष्टितमं दशकम्...................................................156
श्रीमन्नारायणीये षड्षष्टितमं दशकम्.....................................................158
श्रीमन्नारायणीये सप्तषष्टितमं दशकम्...................................................160
श्रीमन्नारायणीये अष्टषष्टितमं दशकम्...................................................162
श्रीमन्नारायणीये एकोनसप्ततितमं दशकम्............................................164
श्रीमन्नारायणीये सप्ततितमं दशकम्.......................................................167
श्रीमन्नारायणीये एकसप्ततितमं दशकम्................................................169
श्रीमन्नारायणीये द्विसप्ततितमं दशकम्.................................................171
श्रीमन्नारायणीये त्रिसप्ततितमं दशकम्..................................................173
श्रीमन्नारायणीये चतुस्सप्ततितमं दशकम्..............................................173
श्रीमन्नारायणीये पञ्चसप्ततितमं दशकम्..............................................178
श्रीमन्नारायणीये षड्सप्ततितमं दशकम्................................................181
श्रीमन्नारायणीये सप्तसप्ततितमं दशकम्..............................................184
श्रीमन्नारायणीये अष्टसप्ततितमं दशकम्..............................................187

श्रीमन्नारायणीये एकोनाशीतितमं दशकम्.............................................189
श्रीमन्नारायणीये अशीतितमं दशकम्.....................................................191
श्रीमन्नारायणीये एकाशीतितमं दशकम्..................................................194
श्रीमन्नारायणीये द्व्यशीतितमं दशकम्...................................................197
श्रीमन्नारायणीये त्र्यशीतितमं दशकम्...................................................200
श्रीमन्नारायणीये चतुरशीतितमं दशकम् ................................................203
श्रीमन्नारायणीये पञ्चाशीतितमं दशकम्................................................205
श्रीमन्नारायणीये षडशीतितमं दशकम्...................................................208
श्रीमन्नारायणीये सप्ताशीतितमं दशकम्................................................211
श्रीमन्नारायणीये अष्टाशीतितमं दशकम्................................................213
श्रीमन्नारायणीये एकोनानवतितमं दशकम्.............................................216
श्रीमन्नारायणीये नवतितमं दशकम् ......................................................219
श्रीमन्नारायणीये एकनवतितमं दशकम्..................................................222
श्रीमन्नारायणीये द्विनवतितमं दशकम्...................................................225
श्रीमन्नारायणीये त्रिनवतितमं दशकम् ..................................................228
श्रीमन्नारायणीये चतुर्नवतितमं दशकम् ................................................231
श्रीमन्नारायणीये पञ्चनवतितमं दशकम्................................................234
श्रीमन्नारायणीये षण्णवतितमं दशकम्.................................................237
श्रीमन्नारायणीये सप्तनवतितमं दशकम् ...............................................240
श्रीमन्नारायणीये अष्टनवतितमं दशकम्................................................243
श्रीमन्नारायणीये एकोनशततमं दशकम् ...............................................246
श्रीमन्नारायणीये शततमं दशकम्.........................................................249

# श्रीमन्नारायणीये प्रथमं दशकम्

सान्द्रानन्दावबोधात्मकं, अनुपमितं, कालदेशावधिभ्यां,

निर्मुक्तं नित्यमुक्तं, निगमशतसहस्रेण, निर्भास्यमानम् ।

अस्पष्टं, दृष्टमात्रे पुनः, उरुपुरुषार्थात्मकं, ब्रह्म तत्वं,

तत्तावत्, भाति साक्षात्, गुरुपवनपुरे, हन्त, भाग्यं जनानाम् ॥ १ ॥

एवंदुर्लभ्यवस्तुन्यपि, सुलभतया, हस्तलब्धे यदन्यत्,

तन्वा, वाचा धिया वा, भजति बत जनः, क्षुद्रतैव स्फुटेयम् ।

एते तावद्वयं तु, स्थिरतरमनसा, विश्वपीडापहत्यै,

निश्शेषात्मानमेनं, गुरुपवनपुराधीशमेव, आश्रयामः ॥ २ ॥

सत्त्वं यत्तत् पराभ्यां, अपरिकलनतो, निर्मलं, तेन तावत्,

भूतैः, भूतेन्द्रियैः, ते वपुरिति, बहुशः, श्रूयते व्यासवाक्यम् ।

तत्, स्वच्छ्त्वात्, यत्, अच्छादित, परसुख,चिद्गर्भनिर्भासरूपं,

तस्मिन्, धन्याः रमन्ते, श्रुतिमतिमधुरे, सुग्रहे, विग्रहे ते ॥ ३ ॥

निष्कम्पे, नित्यपूर्णे, निरवधिपरमानन्दपीयूषरूपे,

निर्लीनानेक,मुक्तावलिसुभगतमे, निर्मलब्रह्मसिन्धौ ।

कल्लोलोल्लासतुल्यं, खलु विमलतरं, सत्त्वमाहुस्तदात्मा,

कस्मात्, नो निष्कलस्त्वं, सकल इति वचः, त्वत्कलास्वेव, भूमन् ॥ ४ ॥

निर्व्यापारोऽपि, निष्कारणं, अज भजसे, यत्क्रियामीक्षणाख्यां,

तेनैवोदेति, लीना प्रकृतिः, असतिकल्पाऽपि, कल्पादिकाले ।

तस्याः, संशुद्धमंशं, कमपि तं, अतिरोधायकं, सत्त्वरूपं,

स त्वं धृत्वा, दधासि, स्वमहिम,विभवाकुण्ठ, वैकुण्ठ, रूपम् ॥ ५ ॥

तत्ते, प्रत्यग्र,धाराधर,ललितकलायावली,केलिकारं

लावण्यस्यैकसारं, सुकृतिजनदृशां, पूर्ण,पुण्यावतारम् ।

लक्ष्मी,निश्शङ्कलीलानिलयनं, अमृतस्यन्दसन्दोहं, अन्तस्-

सिञ्चत्, सञ्चिन्तकानां, वपुरनुकलये, मारुतागार,नाथ ॥ ६ ॥

कष्टा, ते सृष्टिचेष्टा, बहुतर भवखेदावहा, जीवभाजां,

इत्येवं, पूर्वमालोचितं, अजित मया, नैवं, अद्य, अभिजाने ।

नोचेत्, जीवाः कथं वा, मधुरतरमिदं, त्वद्वपुः, चिद्रसार्द्रं

नेत्रैः, श्रोत्रैश्च पीत्वा, परमरस,सुधाम्भोधिपूरे रमेरन् ॥ ७ ॥

नम्राणां, सन्निधत्से, सततमपि पुरः, तैः, अनभ्यर्थितानपि,

अर्थान्, कामान् अजस्रं वितरसि, परमानन्द,सान्द्रां गतिं च ।

इत्थं, निश्शेषलभ्यः, निरवधिकफलः, पारिजातो, हरे त्वं,

क्षुद्रं तं, शक्रवाटीद्रुमं, अभिलषति, व्यर्थं, अर्थिव्रजोऽयम् ॥ ८ ॥

कारुण्यात्काममन्यं, ददति खलु परे, स्वात्मदस्त्वं विशेषात्,

ऐश्वर्यात्, ईशतेऽन्ये, जगति परजने, स्वात्मनोऽपि, ईश्वरस्त्वम् ।

त्वयि उच्चैरारमन्ति, प्रतिपदमधुरे, चेतनाः, स्फीतभाग्याः

त्वं च, आत्माराम एवेति, अतुलगुणगणाधार, शौरे नमस्ते ॥ ९ ॥

ऐश्वर्यं, शङ्करादीश्वरविनियमनं, विश्वतेजोहराणां,

तेजस्संहारि वीर्यं, विमलमपि यशः, निस्पृहैश्चोपगीतम् ।

अङ्गासङ्गाः, सदा श्रीः, अखिलविदसि, न क्वापि ते, सङ्गवार्ता,

तत् वातागारवासिन्, मुरहर, भगवच्छब्द,मुख्याश्रयोऽसि ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये प्रथमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्वितीयं दशकम्

सूर्यस्पर्धिकिरीटं, ऊर्ध्वतिलकप्रोद्भासि,फालान्तरं,
कारुण्याकुलनेत्रं, आर्द्रहसितोल्लासं, सुनासापुटम् ।
गण्डोद्यन्मकराभ,कुण्डलयुगं, कण्ठोज्वलत्कौस्तुभं,
त्वद्रूपं, वनमाल्यहारपटल,श्रीवत्सदीप्रं, भजे ॥ १ ॥

केयूराङ्गद,कङ्कणोत्तम,महारत्नाङ्गुलीयाङ्कित,-
श्रीमद्बाहुचतुष्क,सङ्गत,गदा,शङ्खारि,पङ्केरुहाम् ।
काञ्चित् काञ्चनकाञ्चि,लाञ्च्छितलसत्, पीताम्बरालम्बिनीं,
आलम्बे, विमलाम्बुजद्युतिपदां, मूर्तिं तव, आर्तिच्छिदम् ॥ २ ॥

यत्, त्रैलोक्यमहीयसोऽपि, महितं, सम्मोहनं मोहनात्,
कान्तं, कान्तिनिधानतोऽपि, मधुरं, माधुर्य,धुर्यादपि ।
सौन्दर्योत्तरतोऽपि, सुन्दरतरं, त्वद्रूपं, आश्चर्यतोपि,
आश्चर्यं भुवने, न कस्य कुतुकं, पुष्णाति, विष्णो, विभो ॥ ३ ॥

तत्तादृक्, मधुरात्मकं तव वपुः, सम्प्राप्य सम्पन्मयी,
सा देवी, परमोत्सुका, चिरतरं, नास्ते स्वभक्तेष्वपि ।

உ

तेनास्याः, बत कष्टं, अच्युत विभो, त्वद्रूपमानोज्ञक,-
प्रेमस्थैर्यमयात्, अचापलबलात्, चापल्यवार्ता, उदभूत् ॥ ४ ॥

लक्ष्मीः, तावकरामणीयक,हृतैव, इयं परेषु, अस्थिरेति,
अस्मिन्, अन्यदपि प्रमाणं, अधुना वक्ष्यामि, लक्ष्मीपते ।
ये, त्वद्ध्यानगुणानुकीर्तन,रसासक्ता हि, भक्ता जनाः,
तेष्वेषा, वसति स्थिरैव, दयितप्रस्ताव,दत्तादरा ॥ ५ ॥

एवंभूतमनोज्ञता,नवसुधा,निष्यन्दसन्दोहनं,
त्वद्रूपं, परचिद्रसायनमयं, चेतोहरं, शृण्वताम् ।
सद्यः प्रेरयते, मतिं मदयते, रोमाञ्चयत्यङ्गकं,
व्यासिञ्चत्यपि, शीतबाष्पविसरैः, आनन्दमूर्छोद्भवैः ॥ ६ ॥

एवंभूततया हि, भक्त्यभिहितो योगस्सः, योगद्वयात्,
कर्मज्ञानमयात्, भृशोत्तमतरः, योगीश्वरैः, गीयते ।
सौन्दर्यैकरसात्मके, त्वयि खलु, प्रेमप्रकर्षात्मिका,
भक्तिः, निश्रममेव, विश्वपुरुषैः, लभ्या, रमावल्लभ ॥ ७ ॥

निष्कामं, नियतस्वधर्मचरणं, यत्, कर्मयोगाभिधं,
तद्दूरेत्यफलं, यत्, औपनिषदज्ञानोपलभ्यं, पुनः ।
तत्तु, अव्यक्ततया, सुदुर्गमतरं चित्तस्य, तस्माद्विभो,
त्वत्प्रेमात्मक,भक्तिरेव सततं, स्वादीयसी, श्रेयसी ॥ ८ ॥

अत्यायासकराणि, कर्मपटलानि, आचर्य निर्यन्मलाः,
बोधे, भक्तिपथेऽथवापि, उचिततां, आयान्ति किं तावता ।
क्लिष्ट्वा तर्कपथे, परं तव वपुः, ब्रह्माख्यं, अन्ये पुनः,
चित्तार्द्रत्वं, ऋते विचिन्त्य बहुभिः, सिद्ध्यन्ति, जन्मान्तरैः ॥ ९ ॥

त्वद्भक्तिस्तु, कथारसामृतझरी,निर्मज्जनेन, स्वयं-
सिद्ध्यन्ती, विमलप्रबोधपदवीं, अक्लेशतः, तन्वती ।
सद्यस्सिद्धिकरी, जयति, अयि विभो, सैवास्तु मे, त्वत्पद-
प्रेमप्रौढिरसार्द्रता, द्रुततरं, वातालयाधीश्वर ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये द्वितीयं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये तृतीयं दशकम्

पठन्तो नामानि, प्रमदभरसिन्धौ निपतिताः,

स्मरन्तो रूपं ते, वरद, कथयन्तो, गुणकथाः ।

चरन्तो, ये भक्ताः, त्वयि खलु, रमन्ते, परममून्,

अहं, धन्यान् मन्ये, समधिगत, सर्वाभिलषितान् ॥ १॥

गदक्लिष्टं कष्टं, तव चरणसेवारसभरेऽपि,

अनासक्तं, चित्तं भवति, बत, विष्णो, कुरु दयाम् ।

भवत्पादाम्भोज,स्मरणरसिको, नामनिवहान्,

अहं, गायं गायं, कुहचन, विवत्स्यामि, विजने ॥२॥

कृपा ते, जाता चेत्, किमिव, न हि लभ्यं, तनुभृतां,

मदीयक्लेशौघ,प्रशमनदशा नाम, कियती ।

न के के लोकेऽस्मिन्, अनिशमयि, शोकाभिरहिताः,

भवद्भक्ताः, मुक्ताः, सुखगतिं, असक्ताः, विदधते ॥३॥

मुनिप्रौढाः, रूढाः, जगति खलु, गूढात्मगतयः,

भवत्पादाम्भोज,स्मरणविरुजो, नारदमुखाः ।

चरन्ती, इश स्वैरं, सतत,परिनिर्भात,परचित्-
सदानन्दाद्वैत,प्रसरपरिमग्नाः, किमपरम् ॥४॥

भवद्भक्तिः, स्फीता भवतु मम, सैव, प्रशमयेत्,
अशेषक्लेशौघं, न खलु हृदि, सन्देहकणिका ।
न चेत्, व्यासस्योक्तिः, तव च वचनं, नैगमवचः,
भवेत्, मिथ्या, रथ्यापुरुषवचनप्रायं, अखिलम् ॥५॥

भवद्भक्तिस्तावत्, प्रमुखमधुरा, त्वद्गुणरसात्,
किमपि, आरूढा चेत्, अखिल, परिताप,प्रशमनी ।
पुनश्चान्ते स्वान्ते, विमल,परिबोधोदय,मिलन्-
महानन्दाद्वैतं, दिशति, किमतः प्रार्थ्यं, अपरम् ॥६॥

विधूय क्लेशान्मे, कुरु, चरणयुग्मं, धृतरसं,
भवत्क्षेत्रप्राप्तौ, करमपि च, ते पूजनविधौ ।
भवन्मूर्त्यालोके, नयनं, अथ, ते पादतुलसी,-
परिघ्राणे घ्राणं, श्रवणमपि, ते चारुचरिते ॥७॥

प्रभूताधि,व्याधि,प्रसभचलिते, मामकहृदि,
त्वदीयं, तद्रूपं, परमसुख, चिद्रूपं, उदियात् ।
उदञ्चद्रोमाञ्चः, गलितबहुहर्षाश्रुनिवहः
यथा, विस्मर्यासं, दुरुपशमपीडा, परिभवान् ॥८॥

मरुद्गेहाधीश, त्वयि खलु, पराञ्चोऽपि सुखिनः,
भवत्स्नेही, सोऽहं, सुबहु, परितप्ये च, किमिदम् ।
अकीर्तिस्ते मा भूत्, वरद, गदभारं प्रशमयन्,
भवत् भक्तोत्तंसं, झटिति कुरु मां, कंसदमन ॥९॥

किमुक्तैर्भूयोभिः, तव हि करुणा, यावदुदियात्,
अहं, तावत् देव, प्रहित, विविधार्त,प्रलपितः ।
पुरः क्लृप्ते पादे वरद, तव, नेष्यामि दिवसान्,
यथाशक्ति, व्यक्तं, नतिनुतिनिषेवाः, विरचयन् ॥१०॥

ॐ तत्सदिति श्रीमन्नारायणीये तृतीयं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुर्थं दशकम्

कल्यतां, मम कुरुष्व तावतीं, कल्यते, भवदुपासनं यया ।

स्पष्टम्, अष्टविधयोगचर्यया, पुष्टयाशु, तव तुष्टिमाप्नुयाम् ॥ १ ॥

ब्रह्मचर्य, दृढतादिभिर्यमैः आप्लवादि, नियमैश्च पाविताः ।

कुर्महे, दृढममी, सुखासनं, पङ्कजाद्यमपि वा, भवत्पराः ॥ २ ॥

तारं, अन्तरनुचिन्त्य सन्ततं, प्राणवायुं, अभियम्य निर्मलाः ।

इन्द्रियाणि, विषयात्, अथापहृत्यास्महे, भवदुपासनोन्मुखाः ॥ ३ ॥

अस्फुटे वपुषि ते, प्रयत्नतो धारयेम, धिषणां, मुहुर्मुहुः ।

तेन, भक्तिरसं, अन्तरार्द्रतां, उद्वहेम, भवदङ्घ्रिचिन्तकाः ॥ ४ ॥

विस्फुटावयवभेदसुन्दरं, त्वद्वपुः सुचिरशीलनावशात् ।

अश्रमं, मनसि चिन्तयामहे, ध्यानयोगनिरताः, त्वदाश्रयाः ॥ ५ ॥

ध्यायतां, सकलमूर्तिमीदृशीम्, उन्मिषन्मधुरता, हृतात्मनाम् ।

सान्द्रमोदरसरूपमान्तरं, ब्रह्मरूपं, अयि तेऽवभासते ॥ ६ ॥

तत्समास्वदनरूपिणीं, स्थितिं, त्वत्समाधिमयि, विश्वनायक ।
आश्रिताः, पुनरतः परिच्युतौ, आरभेमहि च, धारणादिकम् ॥ ७ ॥

इत्थम्, अभ्यसननिर्भरोल्लसत्, त्वत्परात्मसुख, कल्पितोत्सवाः ।
मुक्तभक्तकुलमौलितां गताः, सञ्चरेम, शुकनारदादिवत् ॥ ८ ॥

त्वत्समाधिविजये तु यः पुनः, मङ्क्षु, मोक्षरसिकः क्रमेण वा ।
योगवश्यं, अनिलं षडाश्रयैः, उन्नयत्यज, सुषुम्नया शनैः ॥ ९ ॥

लिङ्गदेहमपि, सन्त्यजन्नथो, लीयते त्वयि परे, निराग्रहः ।
ऊर्ध्वलोककुतुकी तु मूर्धतः, सार्धमेव, करणैर्निरीयते ॥ १० ॥

अग्निवासर, वलर्क्षपक्षगैः, उत्तरायणजुषा च दैवतैः ।
प्रापितो, रविपदं भवत्परः, मोदवान्, ध्रुवपदान्तमीयते ॥ ११ ॥

आस्थितोऽथ, महरालये यदा, शेषवक्त्रदहनोष्मणार्द्यते ।
ईयते, भवदुपाश्रयस्तदा, वेधसः पदम्, अतः पुरैव वा ॥ १२ ॥

तत्र वा, तव पदेऽथवा वसन्, प्राकृतप्रलय, एति मुक्तताम् ।

स्वेच्छया खलु, पुरा विमुच्यते, संविभिद्य, जगदण्डं, ओजसा ॥ १३ ॥

तस्य च, क्षितिपयोमहोऽनिल, द्योमहत्प्रकृति, सप्तकावृती: ।

तत्तदात्मकतया, विशन् सुखी, याति, ते पदम्, अनावृतं विभो ॥ १४ ॥

अर्चिरादिगतिमीदृशीं, व्रजन्, विच्युतिं न भजते, जगत्पते ।

सच्चिदात्मका, भवत् गुणोदयान्, उच्चरन्तम्, अनिलेश, पाहि माम् ॥ १५ ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुर्थं दशकं समाप्तम् |

श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चमं दशकम्

व्यक्ताव्यक्तमिदं न किञ्चिदभवत्, प्राक्प्राकृतप्रक्षये,
मायायां, गुणसाम्यरुद्धविकृतौ, त्वय्यागतायां लयम् ।
नो मृत्युश्च तदा, अमृतं च समभूत्, नाह्नो, न रात्रेः, स्थितिः,
तत्र, एकस्त्वं, अशिष्यथाः किल, परानन्दप्रकाशात्मना ॥ १ ॥

कालः कर्म गुणाश्च जीवनिवहाः, विश्वं च कार्यं विभो,
चिल्लीलारतिं, एयुषि त्वयि तदा, निर्लीनतां, आययुः ।
तेषां नैव वदन्ति, असत्त्वमयि भोः, शक्त्यात्मना तिष्ठतां,
नो चेत्, किं, गगनप्रसूनसदृशां, भूयो भवेत् संभवः ॥ २ ॥

एवं च, द्विपरार्धकालविगतौ, ईक्षां, सिसृक्षात्मिकां,
बिभ्राणे त्वयि, चुक्षुभे, त्रिभुवनीभावाय, माया स्वयम् ।
मायातः खलु, कालशक्तिः, अखिलादृष्टं, स्वभावोऽपि च,
प्रादुर्भूय, गुणान्विकास्य, विदधुः, तस्याः, सहायक्रियाम् ॥ ३ ॥

मायासन्निहितः, अप्रविष्टवपुषा, साक्षीति गीतो भवान्,
भेदैस्तां, प्रतिबिंबितो विविशिवान्, जीवोऽपि, नैवापरः ।

कालादिप्रतिबोधिताऽथ, भवता, संचोदितं च स्वयं,
माया सा खलु, बुद्धितत्त्वं असृजत्, योसौ, महान् उच्यते ॥ ४ ॥

तत्रासौ, त्रिगुणात्मकोऽपि च महान्, सत्त्वप्रधानः स्वयं,
जीवेऽस्मिन् खलु, निर्विकल्पं अहमिति, उद्बोधनिष्पादकः ।
चक्रेऽस्मिन्, सविकल्पबोधकं, अहन्तत्त्वं महान् खलु असौ,
सम्पुष्टं, त्रिगुणैः, तमोऽतिबहुलं, विष्णो, भवत्प्रेरणात् ॥ ५ ॥

सोऽहं च, त्रिगुणक्रमात्, त्रिविधतां, आसाद्य वैकारिकः,
भूयस्तैजसतामसौ, इति भवन्, आद्येन, सत्त्वात्मना ।
देवान्, इन्द्रियमानिनोऽकृत, दिशा वातार्क,पाश्यश्विनः,
वह्नीन्द्राच्युतमित्रकान्, विधुविधि,श्रीरुद्रशारीरकान् ॥ ६ ॥

भूमन्, मानस,बुद्ध्यहंकृतिमिलच्चित्ताख्यवृत्त्यन्वितं,
तच्चान्तःकरणं विभो, तव बलात्, सत्त्वांश एवासृजत् ।
जातस्तैजसतो, दशेन्द्रियगणः, तत्तामसांशात्पुनः,
तन्मात्रं नभसो, मरुत्पुरपते, शब्दोऽजनि, त्वद्बलात् ॥ ७ ॥

शब्दात्, व्योम, ततः ससर्जिथ विभो, स्पर्शं ततो मारुतं,
तस्मात् रूपं, अतो महोऽथ च रसं, तोयं च, गन्धं महीम् ।
एवं माधव, पूर्वपूर्वकलनात्, आद्याद्यधर्मान्वितं,
भूतग्राममिमं, त्वमेव भगवन्, प्राकाशयः, तामसात् ॥ ८ ॥

एते, भूतगणाः, तथेन्द्रियगणाः, देवाश्च, जाताः पृथक्,
नो शेकुः, भुवनाण्डनिर्मितिविधौ, देवैः, अमीभिस्तदा ।
त्वं, नानाविधसूक्तिभिः, नुतगुणः, तत्वानि, अमूनि, आविशन्,
चेष्टाशक्तिं, उदीर्य, तानि घटयन्, हैरण्यं, अण्डं व्यधाः ॥ ९ ॥

अण्डं तत्खलु, पूर्वसृष्टसलिले, अतिष्ठत् सहस्रं समाः,
निर्भिन्दन् अकृथाः, चतुर्दशजगद्रूपं, विराडाह्वयम् ।
साहस्रैः, करपादमूर्धनिवहैः, निश्शेषजीवात्मकः,
निर्भातोऽसि, मरुत्पुराधिप, स मां त्रायस्व, सर्वामयात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चमं दशकं समाप्तम् ।
श्री हरये नमः । रमा रमण गोविन्द, गोविन्द । श्रीकृष्णार्पणमस्तु ।

# श्रीमन्नारायणीये षष्ठं दशकम्

एवं, चतुर्दशजगन्मयतां गतस्य, पातालं, ईश, तव पादतलं वदन्ति ।

पादोर्ध्वदेशं, अपि देव, रसातलं ते, गुल्फद्वयं खलु, महातलं, अद्भुतात्मन् ॥ १ ॥

जङ्घे, तलातलमथो, सुतलं च जानू, किञ्च, ऊरुभागयुगलं, वितलातले द्वे ।

क्षोणीतलं, जघनं, अम्बरमङ्ग नाभिः, वक्षश्च शक्रनिलयः, तव, चक्रपाणे ॥ २ ॥

ग्रीवा महः, तव मुखं च जनः, तपस्तुफालं, शिरस्तव, समस्तमयस्य सत्यम्

एवं, जगन्मयतनो, जगदाश्रितैरपि, अन्यैर्निबद्धवपुषे, भगवन्नमस्ते ॥ ३ ॥

त्वद्ब्रह्मरन्ध्रपदं, ईश्वर विश्वकन्द, छन्दांसि केशव, घनाः, तव, केशपाशाः ।

उल्लासि, चिल्लियुगलं, द्रुहिणस्य गेहं, पक्ष्माणि रात्रिदिवसौ, सविता च नेत्रे ॥ ४ ॥

निश्शेषविश्वरचना च, कटाक्षमोक्षः, कर्णौ दिशः, अश्वियुगलं, तव नासिके द्वे ।

लोभत्रपे च भगवन्, अधरोत्तरोष्ठौ, तारागणाश्च रदनाः, शमनश्च दंष्ट्रा ॥ ५ ॥

माया विलासहसितं, श्वसितं समीरः, जिह्वा जलं, वचनमीश, शकुन्तपङ्क्तिः ।

सिद्धादयः, स्वरगणाः, मुखरन्ध्रमग्निः, देवाः, भुजाः, स्तनयुगं तव, धर्मदेवः ॥ ६ ॥

पृष्ठंतु, अधर्म इह, देव, मनः सुधांशुः, अव्यक्तमेव, हृदयांबुजं, अम्बुजाक्ष ।

कुक्षिः समुद्रनिवहाः, वदनं तु सन्ध्ये, शेफः, प्रजापतिरसौ, वृषणौ च मित्रः ॥ ७ ॥

श्रोणीस्थलं, मृगगणाः, पदयोर्नखास्ते, हस्त्युष्ट्रसैन्धवमुखाः, गमनं तु कालः ।

विप्रादिवर्णभवनं, वदनाब्जबाहु,चारूरुयुग्मचरणं, करुणांबुधे ते ॥ ८ ॥

संसारचक्रं, अयि चक्रधर, क्रियास्ते, वीर्यं महासुरगणः, अस्थिकुलानि शैलाः ।

नाड्यः, सरित्समुदयः, तरवश्च रोमजीयात्, इदं वपुः, अनिर्वचनीयं, ईश ॥ ९ ॥

ईदृग्जगन्मयवपुस्तव, कर्मभाजां, कर्मावसानसमये, स्मरणीयमाहुः ।

तस्य अन्तरात्मवपुषे, विमलात्मने ते, वातालयाधिप, नमोऽस्तु, निरुन्धि रोगान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये षष्ठं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तमं दशकम्

एवं देव, चतुर्दशात्मकजगद्रूपेण, जातः पुनः,
तस्योर्ध्वं खलु, सत्यलोकनिलये, जातोऽसि, धाता स्वयम् ।
यं शंसन्ति, हिरण्यगर्भं, अखिलत्रैलोक्यजीवात्मकं,
योऽभूत्, स्फीतरजोविकार,विकसन्नाना,सिसृक्षारसः ॥ १ ॥

सोऽयं, विश्वविसर्गदत्तहृदयः, सम्पश्यमानः स्वयं,
बोधं खलु, अनवाप्य विश्वविषयं, चिन्ताकुलः, तस्थिवान् ।
तावत्त्वं जगतां पते, तप तपेत् एवं हि वैहायसीं,
वाणीं, एनं, अशिश्रवः, श्रुतिसुखां, कुर्वन्, तपःप्रेरणाम् ॥ २ ॥

कोऽसौ मां, अवदत् पुमानिति, जलापूर्णे, जगन्मण्डले,
दिक्षूद्वीक्ष्य, किमपि,अनीक्षितवता, वाक्यार्थं, उत्पश्यता ।
दिव्यं, वर्षसहस्रं, आत्ततपसा तेन, त्वं आराधितः,
तस्मै दर्शितवानसि, स्वनिलयं, वैकुण्ठं, एकाद्भुतम् ॥ ३ ॥

माया यत्र कदापि, नो विकुरुते, भाते, जगद्भ्यो बहिः,
शोकक्रोधविमोह,साध्वसमुखाः, भावास्तु, दूरं गताः ।

सान्द्रानन्दझरी च, यत्र, परमज्योतिःप्रकाशात्मके,

तत्ते धाम, विभावितं, विजयते, वैकुण्ठरूपं विभो ॥ ४ ॥

यस्मिन्नाम, चतुर्भुजाः, हरिमणिश्यामावदातत्विषः,

नानाभूषण,रत्नदीपितदिशः, राजत्,विमानालयाः ।

भक्तिप्राप्त,तथाविधोन्नतपदाः, दीव्यन्ति दिव्या जनाः,

तत्, ते धाम, निरस्तसर्वशमलं, वैकुण्ठरूपं, जयेत् ॥ ५ ॥

नानादिव्यवधूजनैः, अभिवृताः, विद्युल्लतातुल्यया,

विश्वोन्मादन,हृद्यगात्रलतया, विद्योतिताशान्तरा ।

त्वत्पादांबुज, सौरभैककुतुकात्, लक्ष्मीः, स्वयं लक्ष्यते,

यस्मिन्, विस्मयनीय,दिव्यविभवा, तत् ते पदं, देहि मे ॥ ६ ॥

तत्रैवं, प्रतिदर्शिते निजपदे, रत्नासनाध्यासितं,

भास्वत्कोटिलसत्किरीट,कटकाद्याकल्प,दीप्राकृति ।

श्रीवत्साङ्कितं, आत्तकौस्तुभमणिच्छायारुणं, कारणं-

विश्वेषां, तव रूपं, ऐक्षत विधिः, तत्ते विभो, भातु मे ॥ ७ ॥

कालांभोदकलाय,कोमलरुचीचक्रेण, चक्रं दिशां,
आवृण्वानं,उदारमन्दहसित,स्यन्दप्रसन्नाननम् ।
राजत्कम्बुगदारि,पङ्कजधर,श्रीमद्भुजामण्डलं,
स्रष्टुः, तुष्टिकरं, वपुस्तव विभो, मद्रोगमुद्वासयेत् ॥ ८ ॥

दृष्ट्वा, सम्भृतसम्भ्रमः, कमलभूः, त्वत्पादपाथोरुहे,
हर्षावेश,वशंवदो, निपतितः, प्रीत्या, कृतार्थीभवन् ।
जानास्येव, मनीषितं मम, विभो, ज्ञानं तत्, आपादय,
द्वैताद्वैत,भवत्स्वरूपपरमिति, आचष्ट, तं त्वां भजे ॥ ९ ॥

आताम्रे चरणे, विनम्रं, अथ तं, हस्तेन, हस्ते स्पृशन्,
बोधस्ते भविता, न सर्गविधिभिः, बन्धोऽपि, सञ्जायते ।
इत्याभाष्य गिरं, प्रतोष्य नितरां, तच्चित्तगूढः स्वयं,
सृष्टौ तं, समुदैरयः, स भगवन्, उल्लासय, उल्लाघताम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टमं दशकम्

एवं तावत्, प्राकृतप्रक्षयान्ते, ब्राह्मे कल्पे हि, आदिमे लब्धजन्मा ।

ब्रह्मा, भूयः, त्वत्त एवाप्य वेदान्, सृष्टिं चक्रे, पूर्वकल्पोपमानाम् ॥ १ ॥

सोऽयं, चतुर्युगसहस्रमितानि, अहानि, तावन्मिताश्च रजनीः, बहुशो निनाय ।

निद्रात्यसौ, त्वयि निलीय समं स्वसृष्टैः, नैमित्तिकप्रलयं, आहुरतोऽस्य रात्रिम् ॥ २ ॥

अस्मादृशां पुनः, अहर्मुखकृत्यतुल्यां, सृष्टिं करोत्यनुदिनं, सः, भवत्प्रसादात् ।

प्राग्ब्रह्मकल्पजनुषां च, परायुषां तु, सुप्तप्रबोधनसमास्ति, तदाऽपि सृष्टिः ॥ ३ ॥

पञ्चाशदब्दमधुना, स्ववयोर्धरूपं, एकं परार्धं, अतिवृत्य हि, वर्ततेऽसौ ।

तत्र अन्त्यरात्रिजनितान्, कथयामि भूमन्, पश्चाद्दिनावतरणे च, भवद्विलासान् ॥ ४ ॥

दिनावसानेऽथ, सरोजयोनिः, सुषुप्तिकामः, त्वयि सन्निलिल्ये ।

जगन्ति च त्वज्जठरं, समीयुः, तदेदमेकार्णवमास, विश्वम् ॥ ५ ॥

तवैव वेषे, फणिराजि शेषे, जलैकशेषे, भुवने स्म शेषे ।
आनन्द,सान्द्रानुभवस्वरूप:, स्वयोगनिद्रा, परिमुद्रितात्मा ॥ ६ ॥

कालाख्यशक्तिं, प्रलयावसाने, प्रबोधयेति, आदिशता किलादौ ।
त्वया प्रसुप्तं, परिसुप्तशक्तिव्रजेन, तत्र, अखिलजीवधाम्ना ॥ ७ ॥

चतुर्युगाणां च, सहस्रमेवं, त्वयि प्रसुप्ते पुन:, अद्वितीये ।
कालाख्यशक्ति:, प्रथमप्रबुद्धा, प्राबोधयत्, त्वां किल, विश्वनाथ ॥ ८ ॥

विबुध्य च त्वं, जलगर्भशायिन्, विलोक्य लोकान्, अखिलान् प्रलीनान् ।
तेष्वेव, सूक्ष्मात्मतया, निजान्तस्स्थितेषु विश्वेषु, ददाथ दृष्टिम् ॥ ९ ॥

तत:, त्वदीयात्, अयि नाभिरन्ध्रात्, उदञ्चितं, किंचन दिव्यपद्मम् ।
निलीननिश्शेष,पदार्थमालासंक्षेपरूपं, मुकुलायमानम् ॥ १० ॥

तदेतत्, अम्भोरुहकुड्मलं, ते कलेबरात्, तोयपथे, प्ररूढम् ।
बहिर्निरीतं, परित:, स्फुरद्भि:, स्वधामभि:, ध्वान्तं, अलं न्यकृन्तत् ॥ ११ ॥

संफुल्लपत्रे, नितरां विचित्रे, तस्मिन्, भवद्वीर्यधृते सरोजे ।
स पद्मजन्मा, विधिः, आविरासीत्, स्वयंप्रबुद्धाखिल,वेदराशिः ॥ १२ ॥

अस्मिन् परात्मन्, ननु पाद्मकल्पे, त्वमित्थं उत्थापितपद्मयोनिः ।
अनन्तभूमा, मम रोगराशिं, निरुन्धि, वातालयवास विष्णो ॥ १३ ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये नवमं दशकम्

स्थितस्स कमलोद्भवः, तव हि नाभिपङ्केरुहे,

कुतः स्वित्, इदं अम्बुधौ, उदितमिति, अनालोकयन् ।

तदीक्षणकुतूहलात्, प्रतिदिशं, विवृत्ताननः

चतुर्वदनतां, अगात्, विकसदष्ट,दृष्ट्यम्बुजाम् ॥ १ ॥

महार्णवविघूर्णितं, कमलमेव, तत्केवलं,

विलोक्य तदुपाश्रयं, तव तनुं तु, नालोकयन् ।

क एष कमलोदरे, महति, निस्सहायो ह्यहं,

कुतः स्वित्, इदमम्बुजं, समजनीति, चिन्तां अगात् ॥ २ ॥

अमुष्य हि सरोरुहः, किमपि कारणं, सम्भवेत्,

इति स्म कृतनिश्चयः, स खलु, नालरन्ध्राध्वना ।

स्वयोगबलविद्यया, समवरूढवान्, प्रौढधीः,

त्वदीयं, अतिमोहनं, न तु कलेबरं, दृष्टवान् ॥३॥

ततः, सकलनालिका,विवरमार्गगो, मार्गयन्,

प्रयस्य, शतवत्सरं, किमपि, नैव, संदृष्टवान् ।

निवृत्य, कमलोदरे, सुखनिषण्ण:, एकाग्रधी:
समाधिबलं, आदधे, भवदनुग्रहैकाग्रही ॥ ४ ॥

शतेन परिवत्सरै:, दृढसमाधि,बन्धोल्लसत्,
प्रबोधविशदीकृत:, स खलु, पद्मिनीसम्भव: ।
अदृष्टचरं, अद्भुतं, तव हि रूपं, अन्तर्दृशा,
व्यचष्ट, परितुष्टधी:, भुजगभोगभागाश्रयम् ॥ ५ ॥

किरीटमुकुटोल्लसत्,कटकहारकेयूरयुग्,
मणिस्फुरितमेखलं, सुपरिवीतपीताम्बरम् ।
कलायकुसुमप्रभं, गलतलोल्लसत्कौस्तुभं,
वपुस्तत्, अयि भावये, कमलजन्मने, दर्शितम् ॥ ६ ॥

श्रुतिप्रकरदर्शितप्रचुरवैभव, श्रीपते,
हरे जय जय, प्रभो, पदमुपैषि, दिष्ट्या, दृशो: ।
कुरुष्व धियं, आशु मे, भुवननिर्मितौ, कर्मठां,
इति द्रुहिणवर्णित,स्वगुणबंहिमा, पाहि माम् ॥ ७ ॥

लभस्व, भुवनत्रयीरचनदक्षतां, अक्षतां,
गृहाण मदनुग्रहं, कुरु तपश्च, भूयो, विधे ।
भवतु, अखिलसाधनी, मयि च भक्तिः, अत्युत्कटेति,
उदीर्य गिरं, आदधाः, मुदितचेतसं, वेधसम् ॥ ८ ॥

शतं कृततपाः, ततः स खलु, दिव्यसंवत्सरान्,
अवाप्य च तपोबलं, मतिबलं च, पूर्वाधिकम् ।
उदीक्ष्य किल कम्पितं, पयसि पङ्कजं, वायुना,
भवद्बलविजृम्भितः, पवनपाथसी, पीतवान् ॥ ९ ॥

तवैव कृपया पुनः, सरसिजेन, तेनैव सः,
प्रकल्प्य, भुवनत्रयीं, प्रववृते, प्रजानिर्मितौ ।
तथाविध,कृपाभरो, गुरुमरुत्पुराधीश्वर,
त्वं, आशु परिपाहि मां, गुरुदयोक्षितैः, ईक्षितैः ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये नवमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये दशमं दशकम्

वैकुण्ठ, वर्धितबलोऽथ, भवत्प्रसादात्, अम्भोजयोनिः, असृजत् किल जीवदेहान् ।

स्थास्नूनि, भूरुहमयानि, तथा तिरश्चां जातीः, मनुष्यनिवहानपि, देवभेदान् ॥ १ ॥

मिथ्याग्रहास्मिमतिरागविकोपभीतिः, अज्ञानवृत्तिं, इति, पञ्चविधां, स सृष्ट्वा ।

उद्दामतामसपदार्थ,विधानदूनः, तेने, त्वदीयचरणस्मरणं, विशुद्ध्यै ॥ २ ॥

तावत् ससर्ज मनसा, सनकं सनन्दं, भूयः सनातनमुनिं च, सनत्कुमारम्

ते सृष्टिकर्मणि तु, तेन नियुज्यमानाः, त्वत्पादभक्तिरसिकाः, जगृहुर्न वाणीम् ॥ ३ ॥

तावत् प्रकोपं, उदितं, प्रतिरुन्धतोऽस्य, भ्रूमध्यतोऽजनि, मृडः, भवदेकदेशः ।

नामानि मे कुरु, पदानि च, हा विरिञ्चेति, आदौ रुरोद किल, तेन स रुद्रनामा ॥ ४ ॥

एकादशाह्वयतया च, विभिन्नरूपं, रुद्रं विधाय, दयिताः, वनिताश्च दत्वा ।

तावन्ति, अदत्त च, पदानि, भवत्प्रणुन्नः, प्राह, प्रजाविरचनाय च, सादरं तम् ॥ ५ ॥

रुद्राभिसृष्टभयदाकृति,रुद्रसंघसम्पूर्यमाण,भुवनत्रयभीतचेताः ।

मा मा प्रजाः सृज, तपश्चर मङ्गलाय, इत्याचष्ट तं, कमलभूः, भवदीरितात्मा ॥ ६ ॥

तस्याथ सर्गरसिकस्य, मरीचिः, अत्रिः, तत्र, अङिगराः क्रतुमुनिः, पुलहः, पुलस्त्यः ।

अङ्गात्, अजायत भृगुश्च, वसिष्ठदक्षौ, श्रीनारदश्च भगवान्, भवदंघ्रिदासः ॥ ७ ॥

धर्मादिकान्, अभिसृजन्, अथ कर्दमं च, वाणीं विधाय, विधिः, अङ्गजसंकुलोऽभूत् ।

त्वद्बोधितैः, सनकदक्षमुखैः, तनूजैः, उद्बोधितश्च, विरराम, तमो विमुञ्चन् ॥ ८ ॥

वेदान् पुराणनिवहानपि, सर्वविद्याः, कुर्वन्, निजाननगणात्, चतुराननोऽसौ ।

पुत्रेषु तेषु, विनिधाय, स सर्गवृद्धिं अप्राप्नुवन्, तव पदाम्बुजं, आश्रितोभूत् ॥ ९ ॥

जानन् उपायं, अथ, देहमजो विभज्य, स्त्रीपुंसभावं, अभजत्, मनुतद्वधूभ्याम् ।

ताभ्यां च मानुषकुलानि, विवर्धयन्, त्वं, गोविन्द, मारुतपुराधिप, रुन्धि रोगान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये दशमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकादशं दशकम्

क्रमेण सर्गे, परिवर्धमाने, कदापि दिव्याः, सनकादयस्ते ।

भवद्विलोकाय, विकुण्ठलोकं, प्रपेदिरे, मारुतमन्दिरेश ॥ १ ॥

मनोज्ञनैश्रेयस,काननाद्यैः, अनेकवापी,मणिमन्दिरैश्च ।

अनोपमं तं, भवतो निकेतं, मुनीश्वराः, प्रापुः, अतीतकक्ष्याः ॥ २ ॥

भवद्दिदृक्षून्, भवनं विविक्षून्, द्वाःस्थौ जयस्तान्, विजयोऽपि, अरुन्धाम् ।

तेषां च चित्ते, पदमाप कोपः, सर्वं, भवत्प्रेरणयैव, भूमन् ॥ ३ ॥

वैकुण्ठलोकानुचितप्रचेष्टौ, कष्टौ युवां, दैत्यगतिं भजेतम् ।

इति प्रशप्तौ, भवदाश्रितौ तौ, हरिस्मृतिर्नः, अस्त्विति, नेमतुस्तान् ॥ ४ ॥

तदेतदाज्ञाय, भवान् अवाप्तः, सहैव लक्ष्म्या, बहिरम्बुजाक्ष ।

खगेश्वरांसार्पित,चारुबाहुः, आनन्दयन्, तान्, अभिराममूर्त्या ॥ ५ ॥

प्रसाद्य गीर्भिः, स्तुवतो मुनीन्द्रान्, अनन्यनाथौ, अथ पार्षदौ तौ ।

संरम्भयोगेन, भवैस्त्रिभिर्मां, उपेतं, इत्यात्तकृपं, न्यगादीः ॥ ६ ॥

त्वदीयभृत्यौ, अथ काश्यपात्तौ, सुरारिवीरौ, उदितौ दितौ द्वौ ।

सन्ध्यासमुत्पादन,कष्टचेष्टौ, यमौ च लोकस्य, यमाविवान्यौ ॥ ७ ॥

हिरण्यपूर्वः, कशिपुः किलैकः, परो, हिरण्याक्ष इति प्रतीतः ।

उभौ, भवन्नाथं, अशेषलोकं, रुषा न्यरुन्धां, निजवासनान्धौ ॥ ८ ॥

तयोः, हिरण्याक्षमहासुरेन्द्रः, रणाय धावन्, अनवाप्तवैरी ।

भवत्प्रियां क्ष्मां, सलिले निमज्य, चचार गर्वात्, निनदन् गदावान् ॥ ९ ॥

ततो जलेशात्, सदृशं भवन्तं, निशम्य, बभ्राम, गवेषयन्, त्वाम् ।

भक्तैकदृश्यः, स कृपानिधे त्वं, निरुन्धि रोगान्, मरुदालयेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकादशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्वादशं दशकम्

स्वायम्भुवो, मनुरथो, जनसर्गशीलो, दृष्ट्वा महीं, असमये
सलिले, निमग्नाम् ।

स्रष्टारं, आप शरणं, भवदङ्घ्रिसेवा, तुष्टाशयं, मुनिजनैः सह, सत्यलोके
॥ १ ॥

कष्टं, प्रजाः सृजति मयि, अवनी निमग्ना, स्थानं सरोजभव, कल्पय तत्
प्रजानाम् ।

इत्येवमेष कथितो, मनुना, स्वयंभूः, अम्भोरुहाक्ष, तव
पादयुगं, व्यचिन्तीत् ॥ २ ॥

हा हा विभो, जलमहं, न्यपिबं पुरस्तात्, अद्यापि, मज्जति
मही, किमहं, करोमि ।

इत्थं, त्वदङ्घ्रियुगलं, शरणं, यतोऽस्य, नासापुटात्, समभवः,
शिशुकलरूपी ॥ ३ ॥

अङ्गुष्ठमात्रवपुः, उत्पतितः पुरस्तात्, भूयोऽथ, कुम्भिसदृशः,
समजृम्भथास्त्वम् ।

अभ्रे, तथाविधं, उदीक्ष्य, भवन्तं, उच्चै-र्विस्मेरतां, विधिरगात्, सह
सूनुभिः स्वैः ॥ ४ ॥

कोऽसौ, अचिन्त्यमहिमा किटिः, उत्थितो मे नासापुटात्, किमु भवेत्,
अजितस्य माया ।

इत्थं विचिन्तयति, धातरि, शैलमात्रः, सद्यो भवन् किल, जगर्जिथ,
घोरघोरम् ॥ ५ ॥

तं, ते निनादमुपकर्ण्य, जनस्तपःस्थाः, सत्यस्थिताश्च
मुनयः, नुनुवुर्भवन्तम् ।

तत्स्तोत्रहर्षुलमनाः, परिणद्य भूयः, तोयाशयं, विपुलमूर्तिः, अवातरस्त्वम्
॥ ६ ॥

ऊर्ध्वप्रसारि,परिधूम्र,विधूतरोमा, प्रोत्क्षिप्तवालधिः, अवाङ्मुख,घोरघोणः

तूर्णप्रदीर्णजलदः, परिघूर्णदक्ष्णा, स्तोतृन् मुनीन्, शिशिरयन्, अवतेरिथ त्वम् ॥ ७ ॥

अन्तर्जलं, तदनु,संकुलनक्रचक्रं, भ्राम्यत्तिमिङ्गिलकुलं, कलुषोर्मिमालम् ।

आविश्य भीषणरवेण, रसातलस्थान्, आकम्पयन्, वसुमतीं, अगवेषयस्त्वम् ॥ ८ ॥

दृष्ट्वाऽथ, दैत्यहतकेन, रसातलान्ते, संवेशितां झटिति, कूटकिटिर्विभो त्वम् ।

आपातुकान्, अविगणय्य, सुरारिखेटान्, दंष्ट्राङ्कुरेण वसुधां, अदधाः सलीलम् ॥ ९ ॥

अभ्युद्धरन्, अथ धरां, दशनाग्रलग्न, मुस्ताङ्कुराङ्कित इव, अधिकपीवरात्मा ।

उद्धूत,घोरसलिलात्, जलधेरुदञ्चन्, क्रीडावराहवपुरीश्वर, पाहि रोगात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये द्वादशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रयोदशं दशकम्

हिरण्याक्षं तावत्, वरद, भवदन्वेषणपरं,
चरन्तं सांवर्ते पयसि, निजजङ्घा,परिमिते ।
भवद्भक्तो गत्वा, कपटपटुधीः, नारदमुनिः,
शनैरूचे, नन्दन् दनुजमपि, निन्दन्, तव बलम् ॥ १ ॥

स मायावी विष्णुः, हरति भवदीयां, वसुमतीं,
प्रभो, कष्टं कष्टं, किमिदं, इति तेनाभिगदितः ।
नदन्, क्वासौ क्वासौ, इति स मुनिना, दर्शितपथः,
भवन्तं, सम्प्रापत्, धरणिधरं, उद्यन्तं, उदकात् ॥ २ ॥

अहो, आरण्योऽयं मृग इति, हसन्तं, बहुतरैः
दुरुक्तैः, विध्यन्तं, दितिसुतं, अवज्ञाय, भगवन् ।
महीं दृष्ट्वा, दंष्ट्राशिरसि, चकितां स्वेन महसा,
पयोधौ, आधाय, प्रसभं, उदयुङ्क्थाः, मृधविधौ ॥ ३ ॥

गदापाणौ, दैत्ये त्वमपि हि, गृहीतोन्नतगदः,
नियुद्धेन क्रीडन्, घटघट,रवोद्घुष्ट,वियता ।

रणालोकौत्सुक्यात्, मिलति सुरसङ्घे, द्रुतममुं,
निरुन्ध्याः, सन्ध्यातः प्रथमं, इति धात्रा, जगदिषे ॥ ४ ॥

गदोन्मर्दे तस्मिन्, तव खलु गदायां, दितिभुवो
गदाघातात्, भूमौ झटिति, पतितायां, अहह! भोः ।
मृदुस्मेरास्यस्त्वं, दनुजकुल,निर्मूलनचणं,
महाचक्रं स्मृत्वा, करभुवि, दधानो, रुरुचिषे ॥ ५ ॥

ततः शूलं, कालप्रतिमरुषि दैत्ये विसृजति,
त्वयि छिन्दत्येनत्, करकलित,चक्रप्रहरणात् ।
समारुष्टो मुष्ट्या, स खलु, वितुदन्, त्वां समतनोत्,
गलन्माये, मायाः, त्वयि किल, जगन्मोहनकरीः ॥ ६ ॥

भवच्चक्रज्योतिष्कणलव,निपातेन विधुते,
ततो मायाचक्रे, विततघनरोषान्ध,मनसम् ।
गरिष्ठाभिः, मुष्टिप्रहृतिभिः, अभिघ्नन्तमसुरं,
कराग्रेण स्वेन, श्रवणपदमूले, निरवधीः ॥ ७ ॥

உ

महाकाय: सोऽयं, तव करसरोजप्रमथित:,

गलद्रक्तो वक्त्रात्, अपतत्, ऋषिभि:, श्लाघितहति: ।

तदा त्वां, उद्दामप्रमदभर,विद्योतिहृदया:,

मुनीन्द्रा:, सान्द्राभि:, स्तुतिभि:, अनुवन्, अध्वरतनुम् ॥ ८ ॥

त्वचि छन्द:, रोमस्वपि कुशगण:, चक्षुषि घृतं,

चतुर्होतारोऽङ्घ्रौ, स्रुगपि वदने च, उदर इडा ।

ग्रहा:, जिह्वायां ते परपुरुष, कर्णे च चमसा:,

विभो, सोमो वीर्यं, वरद, गलदेशेऽपि, उपसद: ॥ ९ ॥

मुनीन्द्रै: इत्यादिस्तवनमुखरै:, मोदितमना:

महीयस्या, मूर्त्या, विमलतरकीर्त्या च, विलसन् ।

स्वधिष्ण्यं सम्प्राप्त:, सुखरसविहारी, मधुरिपो,

निरुन्ध्या:, रोगं मे सकलमपि, वातालयपते ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रयोदशं दशकं समाप्तम् |

श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुर्दशं दशकम्

समनुस्मृततावकाङ्घ्रियुग्मः, स मनुः पङ्कज,सम्भवाङ्गजन्मा ।

निजं अन्तरं, अन्तरायहीनं, चरितं ते कथयन्, सुखं निनाय ॥ १ ॥

समये खलु, तत्र कर्दमाख्यो, द्रुहिणच्छायभवः, तदीयवाचा ।

धृतसर्गरसो, निसर्गरम्यं, भगवन्, त्वां, अयुतं समाः सिषेवे ॥ २ ॥

गरुडोपरि, कालमेघकम्रं, विलसत्केलिसरोज,पाणिपद्मम् ।

हसितोल्लसिताननं, विभो त्वं, वपुराविष्कुरुषे स्म, कर्दमाय ॥ ३ ॥

स्तुवते, पुलकावृताय तस्मै, मनुपुत्रीं दयितां, नवापि पुत्रीः ।

कपिलं च सुतं, स्वमेव पश्चात्, स्वगतिं चापि, अनुगृह्य, निर्गतोऽभूः ॥ ४ ॥

स मनुः शतरूपया, महिष्या, गुणवत्या, सुतया च देवहूत्या ।

भवदीरित,नारदोपदिष्टः, समगात् कर्दमं, आगतिप्रतीक्षम् ॥ ५ ॥

मनुनोपहृतां च, देवहूतिं, तरुणीरत्नमवाप्य, कर्दमोऽसौ ।

भवदर्चननिर्वृतोऽपि, तस्यां, दृढशुश्रूषणया, दधौ प्रसादम् ॥ ६ ॥

स पुनः, त्वदुपासनप्रभावात्, दयिताकामकृते, कृते विमाने ।

वनिताकुलसङ्कुलो, नवात्मा, व्यहरद्देवपथेषु, देवहूत्या ॥ ७ ॥

शतवर्षमथ, व्यतीत्य सोऽयं, नव कन्याः, समवाप्य, धन्यरूपाः ।

वनयानसमुद्यतोऽपि, कान्ताहितकृत्, त्वज्जननोत्सुको, न्यवात्सीत् ॥ ८ ॥

निजभर्तृगिरा, भवन्निषेवा-निरतायां, अथ, देव देवहूत्याम् ।

कपिलस्त्वं, अजायथाः, जनानां प्रथयिष्यन्, परमात्मतत्वविद्याम् ॥ ९ ॥

वनमेयुषि, कर्दमे प्रसन्ने, मतसर्वस्वं, उपादिशन्, जनन्यै ।

कपिलात्मक, वायुमन्दिरेश, त्वरितं त्वं परिपाहि मां, गदौघात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुर्दशं दशकं समाप्तम् ।

श्री हरये नमः । रमा रमण गोविन्द, गोविन्द । श्रीकृष्णार्पणमस्तु ।

# श्रीमन्नारायणीये पञ्चदशं दशकम्

मतिरिह गुणसक्ता, बन्धकृत्, तेषु, असक्ता तु,
अमृतकृत्, उपरुन्धे, भक्तियोगस्तु, सक्तिम् ।
महदनुगमलभ्या, भक्तिरेव, अत्र साध्या,
कपिलतनुरिति त्वं, देवहूत्यै, न्यगादीः ॥ १ ॥

प्रकृतिमहदहङ्काराश्च, मात्राश्च भूतानि,
अपि हृदपि, दशाक्षी, पूरुषः, पञ्चविंशः ।
इति, विदितविभागो, मुच्यतेऽसौ, प्रकृत्या,
कपिलतनुरिति त्वं, देवहूत्यै, न्यगादीः ॥ २ ॥

प्रकृतिगतगुणौघैः, नाज्यते पूरुषोऽयं,
यदि तु सजति तस्यां, तत् गुणाः, तं भजेरन् ।
मदनुभजनतत्वालोचनैः, साऽपि, अपेयात्
कपिलतनुरिति त्वं, देवहूत्यै, न्यगादीः ॥ ३ ॥

विमलमतिरुपात्तैः, आसनाद्यैर्मदङ्गं,
गरुड,समधिरूढं, दिव्य,भूषायुधाङ्कम् ।

रुचितुलिततमालं, शीलयेतानुवेलं,

कपिलतनुरिति त्वं, देवहूत्यै, न्यगादीः ॥४॥

मम, गुणगणलीलाकर्णनैः, कीर्तनाद्यैः

मयि, सुरसरिदोघप्रख्य,चित्तानुवृत्तिः ।

भवति, परमभक्तिः, सा हि मृत्योर्विजेत्री,

कपिलतनुरिति त्वं, देवहूत्यै, न्यगादीः ॥ ५ ॥

अहह, बहुलहिंसा,सञ्चितार्थैः कुटुम्बं,

प्रतिदिनं,अनुपुष्णन्, स्त्रीजितो, बाललाली ।

विशति हि, गृहसक्तो यातनां, मय्यभक्तः,

कपिलतनुरितित्वं, देवहूत्यै, न्यगादीः ॥ ६ ॥

युवतिजठरखिन्नो, जातबोधोऽपि अकाण्डे,

प्रसवगलितबोधः, पीडया, उल्लङ्घ्य बाल्यम् ।

पुनरपि बत, मुह्यत्येव, तारुण्यकाले,

कपिलतनुरिति त्वं, देवहूत्यै, न्यगादीः ॥ ७ ॥

पितृसुरगणयाजी, धार्मिको यो गृहस्थः,
स च निपतति काले, दक्षिणाध्वोप,गामी ।
मयि निहितं, अकामं कर्म तु, उदक्पथार्थं,
कपिल्तनुरिति त्वं, देवहूत्यै, न्यगादीः ॥ ८ ॥

इति, सुविदितवेद्यां, देव हे, देवहूतिं,
कृतनुतिमनुगृह्य, त्वं गतो, योगिसङ्घैः ।
विमलमतिरथाऽसौ, भक्तियोगेन मुक्ता,
त्वमपि, जनहितार्थं, वर्तसे, प्रागुदीच्याम् ॥ ९ ॥

परम, किमु बहूक्त्या, त्वत्पदाम्भोजभक्तिं,
सकलभयविनेत्रीं, सर्वकामोपनेत्रीम् ।
वदसि खलु, दृढं त्वं, तद्विधूयामयान् मे,
गुरुपवनपुरेश, त्वयि, उपाधत्स्व भक्तिम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चदशं दशकं समाप्तम् ।
श्री हरये नमः । रमा रमण गोविन्द, गोविन्द । श्रीकृष्णार्पणमस्तु ।

# श्रीमन्नारायणीये षोडशं दशकम्

दक्षो विरिञ्चतनयोऽथ मनोस्तनूजां, लब्ध्वा प्रसूतिमिह, षोडश चाप कन्याः ।

धर्मे त्रयोदश ददौ, पितृषु स्वधां च, स्वाहां हविर्भुजि, सतीं गिरिशे त्वदंशे ॥ १ ॥

मूर्तिर्हि, धर्मगृहिणी, सुषुवे भवन्तं, नारायणं, नरसखं, महितानुभावम् ।

यज्जन्मनि, प्रमुदिताः, कृततूर्यघोषाः, पुष्पोत्करान्, प्रववृषुः, नुनुवुः सुरौघाः ॥ २ ॥

दैत्यं सहस्रकवचं, कवचैः परीतं, साहस्रवत्सर,तपस्समराभिलव्यैः ।

पर्यायनिर्मिततपस्समरौ, भवन्तौ, शिष्टैककङ्कटममुं, न्यहतां सलीलम् ॥ ३ ॥

अन्वाचरन्, उपदिशन्नपि मोक्षधर्मं, त्वं भ्रातृमान्, बदरिकाश्रमं, अध्यवात्सीः ।

शक्रोऽथ, ते शमतपोबलनिस्सहात्मा, दिव्याङ्गनापरिवृतं, प्रजिघाय मारम् ॥ ४ ॥

कामो, वसन्तमलयानिल,बन्धुशाली, कान्ताकटाक्षविशिखैः, विकसद्विला सैः ।

विध्यन्मुहुर्मुहुः, अकम्पं, उदीक्ष्य च त्वां, भीतस्त्वयाऽथ जगदे, मृदुहासभाजा ॥ ५ ॥

भीत्याऽलं, अङ्गज वसन्त सुराङ्गना वः, मन्मानसं तु, इह जुषध्वं, इति ब्रुवाणः ।

त्वं विस्मयेन परितः, स्तुवतां, अथैषां, प्रादर्शयः, स्वपरिचारककातराक्षीः ॥ ६ ॥

सम्मोहनाय मिलिताः, मदनादयस्ते, त्वद्दासिकापरिमलैः किल, मोहमापुः ।

दत्तां त्वया च, जगृहुः, त्रपयैव, सर्वस्वर्वासिगर्वशमनीं, पुनः, उर्वशीं ताम् ॥ ७ ॥

दृष्ट्वोर्वशीं, तव कथां च निशम्य शक्रः, पर्याकुलोऽजनि, भवन्महिमावमर्शात् ।

एवं प्रशान्त,रमणीयतरावतारात्, त्वत्तोऽधिको वरद, कृष्णतनुस्त्वमेव ॥ ८ ॥

दक्षस्तु धातुः, अतिलालनया रजोऽन्धः, नात्यादृतस्त्वयि च कष्टं, अशान्तिरासीत् ।

येन व्यरुन्ध सः, भवत्तनुमेव शर्वं, यज्ञे च वैरपिशुने, स्वसुतां व्यमानीत् ॥ ९ ॥

क्रुद्धेशमर्दितमखः, स तु कृत्तशीर्षः, देवप्रसादितहरात्, अथ लब्धजीवः ।

त्वत्पूरितक्रतुवरः, पुनराप शान्तिं, स त्वं प्रशान्तिकर, पाहि मरुत्पुरेश ॥ १० ॥

**ॐ तत्सदिति श्रीमन्नारायणीये षोडशं दशकं समाप्तम् |**

**श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |**

# श्रीमन्नारायणीये सप्तदशं दशकम्

उत्तानपादनृपतेः, मनुनन्दनस्य, जाया बभूव सुरुचिः, नितरां अभीष्टा ।

अन्या, सुनीतिरिति, भर्तुः, अनादृता सा, त्वामेव नित्यं, अगतिः, शरणं गताऽभूत् ॥ १ ॥

अङ्के पितुः, सुरुचिपुत्रकं, उत्तमं तं, दृष्ट्वा ध्रुवः
किल, सुनीतिसुतोऽधिरोक्ष्यन् ।

आचिक्षिपे किल, शिशुः, सुतरां सुरुच्या, दुस्सन्त्यजा खलु, भवद्विमुखैः, असूया ॥ २ ॥

त्वन्मोहिते पितरि, पश्यति दारवश्ये, दूरं दुरुक्तिनिहतः, स गतो निजाम्बाम् ।

साऽपि, स्वकर्मगतिसन्तरणाय पुंसां, त्वत्पादमेव शरणं, शिशवे शशंस ॥ ३ ॥

आकर्ण्य सोऽपि, भवदर्चननिश्चितात्मा, मानी निरेत्य नगरात्
किल, पञ्चवर्षः ।

सन्दृष्टनारदनिवेदित,मन्त्रमार्गः, त्वां, आरराध तपसा, मधुकाननान्ते ॥ ४ ॥

ताते, विषण्णहृदये, नगरीं गतेन, श्रीनारदेन, परिसान्त्वितचित्तवृत्तौ ।

बालः, त्वदर्पितमनाः, क्रमवर्धितेन, निन्ये कठोरतपसा किल, पञ्चमासान् ॥ ५ ॥

तावत्तपोबलनिरुच्छ्वसिते, दिगन्ते, देवार्थितस्त्वं, उदयत्करुणार्द्रचेताः ।

त्वद्रूप,चिद्रसनिलीन मतेः पुरस्तात्, आविर्बभूविथ विभो, गरुडाधिरूढः ॥ ६ ॥

त्वद्दर्शनप्रमदभार,तरङ्गितं तं, दृग्भ्यां निमग्नमिव, रूपरसायने ते ।

तुष्टूषमाणं, अवगम्य, कपोलदेशे, संस्पृष्टवानसि दरेण, तथा, आऽदरेण ॥ ७ ॥

तावत्, विबोधविमलं, प्रणुवन्तमेनं, आभाषथास्त्वं, अवगम्य, तदीयभावम् ।

राज्यं चिरं समनुभूय, भजस्व भूयः, सर्वोत्तरं, ध्रुव, पदं, विनिवृत्तिहीनम् ॥ ८ ॥

इत्यूचुषि त्वयि गते, नृपनन्दनोऽसौ, आनन्दिताखिलजनो, नगरीमुपेतः ।

रेमे चिरं, भवदनुग्रहपूर्णकामः, ताते गते च वनं, आदृतराज्यभारः ॥ ९॥

यक्षेण देव निहते, पुनरुत्तमेऽस्मिन्, यक्षै: स युद्धनिरतो, विरतो मनूक्त्या
।

शान्त्या, प्रसन्नहृदयात्, धनदात्, उपेतात्, त्वद्भक्तिमेव सुद्रुढां,
अवृणोन्महात्मा ॥ १० ॥

अन्ते, भवत्पुरुषनीतविमानयातो, मात्रा समं, ध्रुवपदे, मुदितोऽयमास्ते ।

एवं, स्वभृत्यजनपालन,लोलधीस्त्वं, वातालयाधिप, निरुन्धि, मम
आमयौघान् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तदशं दशकं समाप्तम् |

श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टादशं दशकम्

जातस्य ध्रुवकुल एव तुङ्गकीर्तेः, अङ्गस्य व्यजनि सुतः, स वेननामा ।

तद्दोषव्यथितमतिः, स राजवर्यः, त्वत्पादे, निहितमनाः, वनं गतोऽभूत्
॥ १ ॥

पापोऽपि, क्षितितलपालनाय वेनः, पौराद्यैः, उपनिहितः, कठोरवीर्यः ।

सर्वेभ्यो, निजबलमेव, सम्प्रशंसन्, भूचक्रे, तव यजनानि,
अयं, न्यरौत्सीत् ॥ २ ॥

सम्प्राप्ते, हितकथनाय, तापसौघे, मत्तोऽन्यो भुवनपतिः, न कश्चनेति ।

त्वन्निन्दावचनपरो, मुनीश्वरैस्तैः, शापाग्नौ, शलभदशां, अनायि वेनः
॥ ३ ॥

तन्नाशात्, खलजनभीरुकैर्मुनीन्द्रैः, तन्मात्रा, चिरपरिरक्षिते, तदङ्गे ।

त्यक्ताघे, परिमथितात्, अथोरुदण्डात्, दोर्दण्डे, परिमथिते,
त्वमाविरासीः ॥ ४ ॥

विख्यातः पृथुरिति, तापसोपदिष्टैः, सूताद्यैः, परिणुत,भाविभूरिवीर्यः ।

वेनार्त्या, कबलितसम्पदं धरित्रीं, आक्रान्तां, निजधनुषा, समां, अकार्षीः
॥ ५ ॥

भूयस्तां, निजकुलमुख्यवत्सयुक्तैः, देवाद्यैः, समुचितचारुभाजनेषु ।

अन्नादीनि, अभिलषितानि, यानि तानि, स्वच्छन्दं, सुरभितनूं, अदूदुहस्त्वम् ॥ ६ ॥

आत्मानं यजति मखैः, त्वयि त्रिधामन्, आरब्धे, शततम,वाजिमेधयागे ।

स्पर्धालुः, शतमख एत्य नीचवेषः, हृत्वाऽश्वं, तव तनयात्, पराजितोऽभूत् ॥ ७ ॥

देवेन्द्रं, मुहुरिति, वाजिनं हरन्तं, वह्नौ तं, मुनिवरमण्डले, जुहूषौ ।

रुन्धाने, कमलभवे, क्रतोः समाप्तौ, साक्षात्त्वं मधुरिपुं, ऐक्षथाः, स्वयं स्वम् ॥ ८ ॥

तद्दत्तं, वरमुपलभ्य, भक्तिमेकां, गङ्गान्ते, विहितपदः, कदापि देव ।

सत्रस्थं, मुनिनिवहं, हितानि शंसन्, ऐक्षिष्ठाः, सनकमुखान्, मुनीन् पुरस्तात् ॥ ९ ॥

विज्ञानं, सनकमुखोदितं, दधानः, स्वात्मानं, स्वयमगमो, वनान्तसेवी ।

तत्तादृक्पृथुवपुरीश, सत्वरं मे, रोगौघं प्रशमय, वातगेहवासिन् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टादशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनविंशं दशकम्

पृथोस्तु नप्ता, पृथुधर्मकर्मठः, प्राचीनबर्हिः, युवतौ शतद्रुतौ ।
प्रचेतसो नाम, सुचेतसः सुतान्, अजीजनत्, त्वत्करुणाङ्कुरानिव ॥१॥

पितुः, सिसृक्षानिरतस्य शासनात्, भवत्तपस्या निरताः, दशापि ते ।
पयोनिधिं, पश्चिममेत्य तत्तटे, सरोवरं, सन्ददृशुर्मनोहरम् ॥२॥

तदा, भवत्तीर्थमिदं समागतः, भवो, भवत्सेवकदर्शनादृतः ।
प्रकाशं, आसाद्य पुरः प्रचेतसां, उपादिशत्, भक्ततमः, तव स्तवम् ॥३॥

स्तवं जपन्तः, तं, अमी जलान्तरे, भवन्तं, आसेविषतायुतं, समाः ।
भवत्सुखास्वादरसात्, अमीषु, इयान्, बभूव कालः, ध्रुववत्, न शीघ्रता॥

तपोभिः, एषां, अतिमात्रवर्धिभिः, स यज्ञहिंसानिरतोऽपि, पावितः ।
पिताऽपि तेषां, गृहयातनारद प्रदर्शितात्मा, भवदात्मतां ययौ ॥५॥

कृपाबलेनैव, पुरः प्रचेतसां, प्रकाशमागाः, पतगेन्द्रवाहनः ।
विराजि चक्रादि,वरायुधांशुभिः, भुजाभिः, अष्टाभिः, उदञ्चितद्युतिः
॥६॥

प्रचेतसां तावत्, अयाचतामपि, त्वमेव, कारुण्यभरात् वरानदाः ।
भवद्विचिन्ताऽपि, शिवाय देहिनां, भवत्वसौ, रुद्रनुतिश्च कामदा ॥७॥

अवाप्य कान्तां, तनयां महीरुहां, तया रमध्वं, दशलक्षवत्सरीम् ।
सुतोऽस्तु दक्षो, ननु तत्क्षणाच्च, मां प्रयास्यथेति, न्यगदो मुदैव तान् ॥८॥

ततश्च ते, भूतलरोधिनस्तरून्, क्रुधा दहन्तो, द्रुहिणेन वारिताः ।
द्रुमैश्च दत्तां, तनयामवाप्य तां, त्वदुक्तकालं, सुखिनोऽभिरेमिरे ॥९॥

अवाप्य दक्षं च सुतं, कृताध्वराः, प्रचेतसो, नारदलब्धया धिया ।
अवापुः, आनन्दपदं, तथाविधः, त्वमीश, वातालयनाथ, पाहि माम् ॥१०॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनविंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये विंशं दशकम्

प्रियव्रतस्य, प्रियपुत्रभूतात्, आग्नीध्रराजात्, उदितो हि नाभिः ।
त्वां दृष्टवान्, इष्टदं इष्टिमध्ये, तवैव तुष्ट्यै, कृतयज्ञकर्मा ॥ १ ॥

अभिष्टुतस्तत्र मुनीश्वरैस्त्वं, राज्ञः, स्वतुल्यं सुतं, अर्थ्यमानः ।
स्वयं जनिष्येऽहं, इति ब्रुवाणः, तिरोदधाः, बर्हिषि, विश्वमूर्ते ॥ २ ॥

नाभिप्रियायां, अथ मेरुदेव्यां, त्वं अंशतोऽभूः, ऋषभाभिधानः।
अलोकसामान्यगुणप्रभाव,प्रभाविताशेषजनप्रमोदः ॥ ३ ॥

त्वयि त्रिलोकीभृति, राज्यभारं, निधाय नाभिः, सह मेरुदेव्या ।
तपोवनं प्राप्य, भवन्निषेवी, गतः किल, आनन्दपदं पदं ते ॥ ४ ॥

इन्द्रः, त्वदुत्कर्षकृतात्, अमर्षात्, ववर्ष नास्मिन्, अजनाभवर्षे ।
यदा तदा त्वं, निजयोगशक्त्या, स्ववर्षमेनत्, व्यदधाः सुवर्षम् ॥ ५ ॥

जितेन्द्रदत्तां, कमनीं जयन्तीं, अथोद्वहन्, आत्मरताशयोऽपि ।
अजीजनः, तत्र शतं तनूजान्, एषां क्षितीशो, भरतोऽग्रजन्मा ॥ ६ ॥

नवाभवन्, योगिवराः, नवान्येतु, अपालयन् भारतवर्षखण्डान् ।
सैका त्वशीतिः, तव शेषपुत्राः, तपोबलात्, भूसुरभूयमीयुः ॥ ७ ॥

उक्त्वा सुतेभ्योऽथ, मुनीन्द्रमध्ये, विरक्तिभक्त्यन्वितमुक्तिमार्गम् ।
स्वयं गतः पारमहंस्यवृत्तिं, अधाः, जडोन्मत्तपिशाचचर्याम् ॥ ८ ॥

परात्मभूतोऽपि, परोपदेशं, कुर्वन् भवान्, सर्वनिरस्यमानः ।
विकारहीनो, विचचार कृत्स्नां, महीं, अहीनात्मरसाभिलीनः ॥ ९ ॥

शयुव्रतं, गोमृगकाक चर्यां, चिरं चरन्नाप्य, परं स्वरूपम् ।
दवाहृताङ्गः, कुटकाचले त्वं, तापान् मम, अपाकुरु, वातनाथ ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये विंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकविंशं दशकम्

मध्योद्भवे भुवः, इलावृतनाम्नि वर्षे, गौरीप्रधान,वनिताजनमात्रभाजि ।

शर्वेण, मन्त्रनुतिभिः समुपास्यमानं, सङ्कर्षणात्मकं, अधीश्वर, संश्रये त्वाम् ॥ १ ॥

भद्राश्वनामके, इलावृतपूर्ववर्षे, भद्रश्रवोभिः, ऋषिभिः, परिणूयमानम् ।

कल्पान्तगूढ,निगमोद्धरणप्रवीणं, ध्यायामि देव, हयशीर्षतनुं, भवन्तम् ॥ २ ॥

ध्यायामि, दक्षिणगते, हरिवर्षवर्षे, प्रह्लादमुख्यपुरुषैः, परिषेव्यमाणम् ।

उत्तुङ्गशान्तधवलाकृतिं, एकशुद्धज्ञानप्रदं, नरहरिं, भगवन् भवन्तम् ॥ ३ ॥

वर्षे प्रतीचि, ललितात्मनि केतुमाले, लीलाविशेष, ललितस्मित, शोभनाङ्गम् ।

लक्ष्म्या, प्रजापतिसुतैश्च, निषेव्यमाणं, तस्याः प्रियाय, धृतकामतनुं, भजे त्वाम् ॥ ४ ॥

रम्येऽपि, उदीचि खलु, रम्यकनाम्नि वर्षे, तद्वर्षनाथ,मनुवर्यसपर्यमाणम् ।

भक्तैकवत्सलं, अमत्सरहृत्सु भान्तं, मत्स्याकृतिं भुवननाथ, भजे भवन्तम् ॥ ५ ॥

वर्षं हिरण्मयसमाह्वयं, औत्तराहं, आसीनं, अद्रिधृतिकर्मठकामठाङ्गम् ।

संसेवते, पितृगणप्रवरोऽर्यमा यं, तं त्वां भजामि, भगवन्,
परचिन्मयात्मन् ॥ ६ ॥

किञ्च, उत्तरेषु कुरुषु, प्रियया धरण्या, संसेवितो, महितमन्त्रनुतिप्रभेदैः ।

दंष्ट्राग्रघृष्टघनपृष्ठगरिष्ठवर्ष्मा, त्वं पाहि, विज्ञनुत, यज्ञवराहमूर्ते ॥ ७ ॥

याम्यां दिशं भजति, किंपुरुषाख्यवर्षे, संसेवितो हनुमता, दृढभक्तिभाजा
।

सीताभिराम,परमाद्भुतरूपशाली, रामात्मकः परिलसन्, परिपाहि
विष्णो ॥ ८ ॥

श्रीनारदेन, सह भारतखण्डमुख्यैः, त्वं साङ्ख्ययोगनुतिभिः,
समुपास्यमानः ।

आकल्पकालमिह, साधुजनाभिरक्षी, नारायणो, नरसखः, परिपाहि
भूमन् ॥ ९ ॥

प्लाक्षेऽर्करूपं, अयि शाल्मले, इन्दुरूपं, द्वीपे भजन्ति, कुशनामनि,
वह्निरूपम् ।

क्रौञ्चेऽम्बुरूपं, अथ, वायुमयं च शाके, त्वां ब्रह्मरूपं, अयि पुष्करनाम्नि
लोकाः ॥ १० ॥

सर्वैः, ध्रुवादिभिः, उडुप्रकरैर्ग्रहैश्च, पुच्छादिकेषु, अवयवेषु, अभिकल्प्यमानैः ।

त्वं शिंशुमारवपुषा, महतामुपास्य:सन्ध्यासु, रुन्धि नरकं मम, सिन्धुशायिन् ॥ ११

पातालमूलभुवि, शेषतनुं भवन्तं, लोलैककुण्डलविराजि,सहस्रशीर्षम् ।

नीलाम्बरं, धृतहलं, भुजगाङ्गनाभिः जुष्टं, भजे, हर गदान् गुरुगेहनाथ ॥ १२ ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकविंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्वाविंशं दशकम्

अजामिलो नाम, महीसुरः पुरा, चरन् विभो, धर्मपथान्, गृहाश्रमी ।

गुरोर्गिरा, काननमेत्य दृष्टवान्, सुधृष्टशीलां, कुलटां, मदाकुलाम् ॥ १ ॥

स्वत: प्रशान्तोऽपि, तदाहृताशयः, स्वधर्मं उत्सृज्य, तया समारमन् ।

अधर्मकारी, दशमी भवन् पुनः, दधौ, भवन्नामयुते, सुते रतिम् ॥ २ ॥

स मृत्युकाले, यमराजकिङ्करान्, भयङ्करान्, त्रीन्, अभिलक्षयन् भिया ।

पुरा मनाक्, त्वत्स्मृतिवासनाबलात्, जुहाव, नारायणनामकं, सुतम्
॥ ३ ॥

दुराशयस्यापि, तदास्यनिर्गतत्वदीय,नामाक्षरमात्रवैभवात् ।

पुरोऽभिपेतुः, भवदीयपार्षदाः, चतुर्भुजाः, पीतपटाः, मनोहराः ॥ ४ ॥

अमुं च, संपश्य विकर्षतो भटान्, विमुञ्चत, इति, आरुरुधुर्बलादमी ।

निवारितास्ते च, भवज्जनैस्तदा, तदीयपापं, निखिलं, न्यवेदयन् ॥ ५ ॥

भवन्तु पापानि, कथं तु निष्कृते कृतेऽपि, भोः, दण्डनमस्ति पण्डिताः ।

न निष्कृतिः, किं विदिता भवादृशां, इति प्रभो, त्वत्पुरुषाः बभाषिरे
॥ ६ ॥

श्रुतिस्मृतिभ्यां, विहिता व्रतादयः, पुनन्ति पापं, न लुनन्ति वासनाम् ।

अनन्तसेवा तु, निकृन्तति द्वयीं, इति प्रभो, त्वत्पुरुषाः, बभाषिरे ॥ ७ ॥

अनेन भोः, जन्मसहस्रकोटिभिः, कृतेषु पापेष्वपि, निष्कृतिः कृता ।

यत्, अग्रहीन्नाम, भयाकुलो हरेः, इति प्रभो, त्वत्पुरुषाः बभाषिरे ॥ ८ ॥

नृणां, अबुद्ध्यापि, मुकुन्दकीर्तनं, दहत्यघौघान्, महिमास्य तादृशः ।
यथा, अग्निरेधांसि, यथा, औषधं गदान्, इति प्रभो, त्वत्पुरुषाः बभाषिरे ॥ ९ ॥

इतीरितैः, याम्यभटैरपासृते, भवद्भटानां च गणे, तिरोहिते ।
भवत्स्मृतिं, कंचन कालमाचरन्, भवत्पदं प्रापि, भवद्भटैरसौ ॥ १० ॥

स्वकिङ्करावेदन, शङ्कितो यमः, त्वदंघ्रिभक्तेषु, न गम्यतामिति ।
स्वकीयभृत्यान्, अशिशिक्षदुच्चकैः, स देव, वातालयनाथ, पाहि माम् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये द्वाविंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रयोविंशं दशकम्

प्राचेतसस्तु भगवन्, अपरो हि दक्षः, त्वत्सेवनं व्यधित, सर्गविवृद्धिकामः ।

आविर्बभूविथ तदा, लसदष्टबाहुः, तस्मै वरं ददिथ, तां च वधूं, असिक्नीम् ॥ १ ॥

तस्यात्मजास्तु, अयुतमीश, पुनस्सहस्रं, श्रीनारदस्य वचसा, तव मार्गमापुः ।

नैकत्रवासं, ऋषये, स मुमोच शापं, भक्तोत्तमस्तु ऋषिः, अनुग्रहमेव मेने ॥ २ ॥

षष्ट्या ततो दुहितृभिः, सृजतः कुलौघान्, दौहित्रसूनुः, अथ तस्य, स विश्वरूपः ।

त्वत्स्तोत्रवर्मितं, अजापयत्, इन्द्रमाजौ, देव, त्वदीयमहिमा खलु, सर्वजैत्रः ॥ ३ ॥

प्राक्शूरसेनविषये किल, चित्रकेतुः, पुत्राग्रहीः, नृपतिः, अङ्गिरसः प्रभावात् ।

लब्ध्वैकपुत्रं, अथ तत्र हते, सपत्नीसङ्घैः, अमुह्यदवशः, तव माययासौ ॥ ४ ॥

तं, नारदस्तु सममङ्गिरसा दयालुः, सम्प्राप्य तावत्, उपदर्श्य, सुतस्य जीवम् ।

कस्यास्मि, पुत्र इति, तस्य गिरा विमोहं त्यक्त्वा, त्वदर्चनविधौ, नृपतिं न्ययुङ्क्त ॥ ५ ॥

स्तोत्रं च मन्त्रमपि, नारदतोऽथ लब्ध्वा, तोषाय शेषवपुषो, ननु ते तपस्यन् ।

विद्याधराधिपतितां, स हि सप्तरात्रे, लब्ध्वापि, अकुण्ठमतिः, अन्वभजत्, भवन्तम् ॥ ६ ॥

तस्मै मृणालधवलेन, सहस्रशीर्ष्णा, रूपेण, बद्धनुतिसिद्धगणावृतेन ।

प्रादुर्भवन्, अचिरतो, नुतिभिः प्रसन्नः, दत्वा, आत्मतत्त्वमनुगृह्य, तिरोदधाथ ॥ ७ ॥

त्वद्भक्तमौलिः, अथ, सोऽपि च, लक्षलक्षं वर्षाणि, हर्षुलमनाः, भुवनेषु कामम् ।

सङ्गापयन् गुणगणं तव, सुन्दरीभिः, सङ्गातिरेकरहितो, ललितं चचार ॥ ८ ॥

अत्यन्तसङ्गविलयाय, भवत्प्रणुन्नः, नूनं स रूप्यगिरिमाप्य महत्समाजे ।

निश्शङ्कं, अङ्ककृतवल्लभं, अङ्गजारिं, तं शङ्करं परिहसन्, उमयाभिशेपे ॥ ९ ॥

निस्सम्भ्रमस्तु, अयं, अयाचितशापमोक्षः, वृत्रासुरत्वं,
उपगम्य, सुरेन्द्रयोधी ।

भक्त्या, आत्मतत्त्वकथनैः, समरे विचित्रं, शत्रोरपि भ्रमं, अपास्य, गतः
पदं ते ॥ १० ॥

त्वत्सेवनेन दितिः, इन्द्रवधोद्यताऽपि, तान्प्रत्युत, इन्द्रसुहृदो
मरुतोऽभिलेभे ।

दुष्टाशयेऽपि, शुभदैव, भवन्निषेवा, तत्तादृशस्त्वं, अव मां पवनालयेश ॥
११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रयोविंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुर्विंशं दशकम्

हिरण्याक्षे, पोत्रिप्रवरवपुषा देव, भवता
हते, शोकक्रोधग्लपितधृतिः, एतस्य, सहजः ।
हिरण्यप्रारम्भः कशिपुः, अमरारातिसदसि,
प्रतिज्ञां, आतेने, तव किल वधार्थं, मधुरिपो ॥ १ ॥

विधातारं घोरं, स खलु, तपसित्वा नचिरतः,
पुरः साक्षात्कुर्वन्, सुरनरमृगाद्यैः, अनिधनम् ।
वरं लब्ध्वा दृप्तो जगदिह, भवन्नायकमिदं,
परिक्षुन्दन्, इन्द्रात्, अहरत दिवं, त्वां अगणयन् ॥ २ ॥

निहन्तुं त्वां भूयः, तव पदं, अवाप्तस्य च रिपोः,
बहिर्दृष्टेः, अन्तर्दधिथ, हृदये, सूक्ष्मवपुषा ।
नदन्, उच्चैः, तत्रापि, अखिलभुवनान्ते च, मृगयन्,
भिया यातं, मत्वा, स खलु, जितकाशी, निववृते ॥ ३ ॥

ततोऽस्य प्रह्लादः, समजनि सुतो, गर्भवसतौ,
मुनेः, वीणापाणेः, अधिगत,भवद्भक्तिमहिमा ।

स वै, जात्या दैत्यः, शिशुरपि, समेत्य त्वयि रतिं,
गतः, त्वद्भक्तानां वरद, परमोदाहरणताम् ॥ ४ ॥

सुरारीणां हास्यं, तव चरणदास्यं निजसुते,
स दृष्ट्वा दुष्टात्मा, गुरुभिः, अशिशिक्षत्, चिरममुम् ।
गुरुप्रोक्तं चासौ, इदमिदं, अभद्राय दृढमिति,
अपाकुर्वन् सर्वं, तव चरणभक्त्यैव, ववृधे ॥ ५ ॥

अधीतेषु श्रेष्ठं, किमिति, परिपृष्टेऽथ तनये,
भवद्भक्तिं वर्यां, अभिगदति, पर्याकुल,धृतिः ।
गुरुभ्यो रोषित्वा, सहजमतिरस्येति, अभिविदन्,
वधोपायान्, अस्मिन् व्यतनुत, भवत्पादशरणे ॥ ६ ॥

स शूलैराविद्धः, सुबहु मथितो, दिग्गजगणैः,
महासर्पैर्दष्टोऽपि, अनशनगराहारविधुतः ।
गिरीन्द्रावक्षिप्तोऽपि, अहह! परमात्मन्, अयि विभो,
त्वयि न्यस्तात्मत्वात्, किमपि, न निपीडां, अभजत ॥ ७ ॥

ततः शङ्काविष्टः स पुनः, अतिदुष्टोऽस्य जनकः,
गुरूक्त्या तद्गेहे किल, वरुणपाशैः, तमरुणत् ।
गुरोश्च, असान्निध्ये स पुनः, अनुगान्, दैत्यतनयान्,
भवद्भक्तेस्तत्त्वं, परममपि, विज्ञानं, अशिषत् ॥ ८ ॥

पिता शृण्वन्, बालप्रकरमखिलं, त्वत्स्तुतिपरं,
रुषान्धः प्राहैनं, कुलहतक, कस्ते, बलमिति ।
बलं मे वैकुण्ठः, तव च, जगतां चापि स बलं,
स एव त्रैलोक्यं सकलं, इति धीरोऽयं, अगदीत् ॥ ९ ॥

अरे, क्वासौ क्वासौ, सकलजगदात्मा, हरिरिति,
प्रभिन्ते स्म स्तंभं, चलितकरवालो, दितिसुतः ।
अतः पश्चात्, विष्णो, न हि वदितुं, ईशोऽस्मि सहसा,
कृपात्मन्, विश्वात्मन्, पवनपुरवासिन्, मृडय माम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुर्विंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चविंशं दशकम्

स्तंभे घट्टयतो, हिरण्यकशिपोः कर्णौ, समाचूर्णयन्,
आघूर्णज्जगदण्ड,कुण्डकुहरो, घोरः, तवाभूत्, रवः ।
श्रुत्वा यं किल दैत्यराजहृदये, पूर्वं कदापि, अश्रुतं,
कम्पः कश्चन संपपात, चलितः, अप्यम्भोजभूः, विष्टरात् ॥ १ ॥

दैत्ये दिक्षु, विसृष्टचक्षुषि, महासंरम्भिणि, स्तम्भतः,
सम्भूतं, न मृगात्मकं, न मनुजाकारं, वपुस्ते विभो ।
किं किं भीषणं, एतत्, अद्भुतं इति, व्युद्भ्रान्तचित्ते असुरे,
विस्फूर्ज्जद्धवलोग्र,रोमविकसद्वर्ष्मा, समाजृम्भथाः ॥ २ ॥

तप्तस्वर्णसवर्ण,घूर्णदतिरूक्षाक्षं, सटाकेसर,
प्रोत्कम्पप्रणुकुम्बितांबरं, अहो जीयात्, तवेदं वपुः ।
व्यात्तव्याप्तमहादरीसखमुखं, खड्गोग्रवल्गन्महा,-
जिह्वानिर्गम,दृश्यमानसुमहा, दंष्ट्रायुगोड्डामरम् ॥ ३ ॥

उत्सर्पद्वलिभङ्गभीषणहनुं, ह्रस्वस्थवीयस्तर-
ग्रीवं, पीवरदोश्शतोद्गतनख,क्रूरांशुदूरोल्बणम् ।

व्योमोल्लङ्घि, घनाघनोपमघन,प्रध्वान,निर्धावित-
स्पर्धालुप्रकरं, नमामि भवतः, तन्नारसिंहं वपुः ॥ ४ ॥

नूनं विष्णुरयं, निहन्मि अमुमिति, भ्राम्यद्गदाभीषणं,
दैत्येन्द्रं, समुपाद्रवन्तं, अधृथाः, दोर्भ्यां, पृथुभ्यां, अमुम् ।
वीरो निर्गलितोऽथ, खड्गफलके, गृह्णन्, विचित्रश्रवान्,
व्यावृण्वन्, पुनः, आपपात, भुवनग्रासोद्यतं, त्वामहो ॥ ५ ॥

भ्राम्यन्तं, दितिजाधमं पुनरपि, प्रोद्गृह्य दोर्भ्यां जवात्,
द्वारेऽथ, ऊरुयुगे, निपात्य नखरान्, व्युत्खाय, वक्षोभुवि ।
निर्भिन्दन्, अधिगर्भनिर्भरगलद्रक्ताम्बु, बद्धोत्सवं,
पायं पायं, उदैरयो, बहु जगत्संहारि,सिंहारवान् ॥ ६ ॥

त्यक्त्वा तं हतमाशु, रक्तलहरीसिक्तोन्नमद्वर्ष्मणि,
प्रत्युत्पत्य समस्तदैत्यपटलीं, चाखाद्यमाने, त्वयि ।
भ्राम्यद्भूमि, विकम्पिताम्बुधिकुलं, व्यालोलशैलोत्करं,
प्रोत्सर्पत्खचरं, चराचरमहो, दुःस्थां, अवस्थां, दधौ ॥ ७ ॥

तावत्, मांसवपाकरालवपुषं, घोरान्त्रमालाधरं,
त्वां मध्येसभं, इद्धरोषं, उषितं, दुर्वार,गुर्वारवम् ।
अभ्येतुं, न शशाक कोपि भुवने, दूरे स्थिता:, भीरवा:,
सर्वे, शर्वविरिञ्चवासवमुखा:, प्रत्येकं, अस्तोषत ॥ ८ ॥

भूयोऽपि, अक्षतरोषधाम्नि भवति, ब्रह्माज्ञया, बालके
प्रह्लादे, पदयोर्नमति, अपभये, कारुण्य भाराकुल: ।
शान्तस्त्वं, करमस्य मूर्ध्नि, समधा:, स्तोत्रै:, अथ, उद्गायत:,
तस्य,अकामधियोऽपि, तेनिथ वरं, लोकाय, चानुग्रहम् ॥ ९ ॥

एवं नातितरौद्रचेष्टित, विभो, श्रीतापनीयाभिध,-
श्रुत्यन्तस्फुटगीत,सर्वमहिमन्, अत्यन्त,शुद्धाकृते ।
तत्तादृङ्निखिलोत्तरं, पुनरहो, कस्त्वां परो लङ्घयेत्,
प्रह्लादप्रिय, हे मरुत्पुरपते, सर्वामयात्, पाहि माम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चविंशं दशकं समाप्तम् |
श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षड्विंशं दशकम्

इन्द्रद्युम्नः, पाण्ड्यखण्डाधिराजः, त्वद्भक्तात्मा, चन्दनाद्रौ, कदाचित् ।
त्वत् सेवायां, मग्नधीः, आलुलोके, नैव अगस्त्यं प्राप्तं, आतिथ्यकामम् ॥ १ ॥

कुम्भोद्भूतिः, संभृतक्रोधभारः, स्तब्धात्मा त्वं, हस्तिभूयं, भजेति ।
शप्त्वाऽथैनं, प्रत्यगात्, सोऽपि लेभे, हस्तीन्द्रत्वं, त्वत्स्मृतिव्यक्तिधन्यम् ॥ २ ॥

दुग्धाम्भोधेः, मध्यभाजि त्रिकूटे, क्रीडन्, शैले, यूथपोऽयं, वशाभिः ।
सर्वान् जन्तून्, अत्यवर्तिष्ट शक्त्या, त्वद्भक्तानां, कुत्र नोत्कर्षलाभः ॥ ३ ॥

स्वेन स्थेम्ना, दिव्यदेशत्वशक्त्या, सोऽयं खेदान्, अप्रजानन् कदाचित् ।
शैलप्रान्ते, घर्मतान्तः सरस्यां, यूथैस्सार्धं, त्वत्प्रणुन्नोऽभिरेमे ॥ ४ ॥

हूहूस्तावत्, देवलस्यापि शापात्, ग्राहीभूतः, तज्जले वर्तमानः ।
जग्राहैनं, हस्तिनं पाददेशे, शान्त्यर्थं हि, श्रान्तिदोऽसि स्वकानाम् ॥ ५ ॥

त्वत्सेवायाः, वैभवात्, दुर्निरोधं, युध्यन्तं तं, वत्सराणां सहस्रम् ।

प्राप्ते काले, त्वत्पदैकाग्र्यसिध्यै, नक्राक्रान्तं, हस्तिवर्यं व्यधास्त्वम्
॥ ६ ॥

आर्तिव्यक्त,प्राक्तनज्ञानभक्तिः, शुण्डोत्क्षिप्तैः, पुण्डरीकैः, समर्चन् ।

पूर्वाभ्यस्तं, निर्विशेषात्मनिष्ठं, स्तोत्र श्रेष्ठं, सोऽन्वगादीत्, परात्मन् ॥ ७ ॥

श्रुत्वा स्तोत्रं, निर्गुणस्थं समस्तं, ब्रह्मेशाद्यैः, नाहमिति, अप्रयाते ।

सर्वात्मा त्वं, भूरिकारुण्यवेगात्, तार्क्ष्यारूढः, प्रेक्षितोऽभूः, पुरस्तात्
॥ ८ ॥

हस्तीन्द्रं तं, हस्तपद्मेन धृत्वा, चक्रेण, त्वं नक्रवर्यं, व्यदारीः ।

गन्धर्वेऽस्मिन्, मुक्तशापे, स हस्ती त्वत्सारूप्यं प्राप्य, देदीप्यते स्म
॥ ९ ॥

एतद्वृत्तं, त्वां च मां च, प्रगे यो गायेत्, सोऽयं, भूयसे, श्रेयसे स्यात् ।

इत्युक्त्वैनं, तेन सार्धं, गतस्त्वं, धिष्ण्यं विष्णो, पाहि वातालयेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये षड्विंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तविंशं दशकम्

दुर्वासाः, सुरवनिताप्तदिव्यमाल्यं, शक्राय स्वयमुपदाय, तत्र भूयः ।

नागेन्द्रप्रतिमृदिते, शशाप शक्रं, का क्षान्तिः, त्वदितर,देवतांशजानाम्
॥ १ ॥

शापेन, प्रथितजरेऽथ, निर्जरेन्द्रे, देवेष्वपि, असुरजितेषु, निष्प्रभेषु ।

शर्वाद्याः, कमलजमेत्य सर्वदेवाः, निर्वाणप्रभव, समं, भवन्तमापुः ॥ २ ॥

ब्रह्माद्यैः, स्तुतमहिमा, चिरं तदानीं, प्रादुष्यन्, वरद, पुरः परेण धाम्ना ।

हे देवाः, दितिजकुलैः, विधाय सन्धिं, पीयूषं, परिमथतेति, पर्यशास्त्वम्
॥ ३ ॥

सन्धानं, कृतवति, दानवैः सुरौघे, मन्थानं नयति, मदेन, मन्दराद्रिम् ।

भ्रष्टेऽस्मिन्, बदरमिवोद्वहन्, खगेन्द्रे, सद्यस्त्वं विनिहितवान्, पयःपयोधौ
॥ ४ ॥

आधाय, द्रुतमथ, वासुकिं वरत्रां, पाथोधौ, विनिहित,सर्वबीजजाले ।

प्रारब्धे, मथनविधौ, सुरासुरैस्तैः, व्याजात् त्वं, भुजगमुखे,
अकरोस्सुरारीन् ॥ ५ ॥

क्षुब्धाद्रौ, क्षुभितजलोदरे, तदानीं, दुग्धाब्धौ, गुरुतरभारतो, निमग्ने ।

देवेषु, व्यथिततमेषु, तत्प्रियैषी, प्राणैषीः, कमठतनुं, कठोरपृष्ठाम्
॥ ६ ॥

वज्रातिस्थिरतरकर्परेण, विष्णो, विस्तारात्, परिगतलक्षयोजनेन ।

अम्भोधेः, कुहरगतेन वर्ष्मणा त्वं, निर्मग्नं क्षितिधरनाथं, उन्निनेथ ॥ ७ ॥

उन्मग्ने, झटिति तदा, धराधरेन्द्रे, निर्मेथुः, दृढमिह, सम्मदेन सर्वे ।

आविश्य, द्वितयगणेऽपि, सर्पराजे, वैवश्यं, परिशमयन्, अवीवृधस्तान्
॥ ८ ॥

उद्दामभ्रमण,जवोन्नमद्गिरीन्द्र,न्यस्तैकस्थिरतर,हस्तपङ्कजं त्वाम् ।

अभ्रान्ते, विधिगिरिशादयः, प्रमोदात्, उद्भ्रान्ताः नुनुवुः, उपात्तपुष्पवर्षाः
॥ ९ ॥

दैत्यौघे, भुजगमुखानिलेन, तप्ते, तेनैव, त्रिदशकुलेऽपि, किञ्चिदार्ते ।

कारुण्यात्तव किल देव, वारिवाहाः, प्रावर्षन् अमरगणान्, न दैत्यसङ्घान्
॥ १० ॥

उद्भ्राम्यद्बहुतिमिनक्रचक्रवाले, तत्राब्धौ, चिरमथितेऽपि, निर्विकारे ।
एकस्त्वं, करयुगकृष्टसर्पराजः, संराजन्, पवनपुरेश, पाहि रोगात् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तविंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टाविंशं दशकम्

गरलं, तरलानलं पुरस्तात्, जलधेः, उद्विजगाल, कालकूटम् ।
अमरस्तुतिवादमोदनिघ्नो गिरिशः, तन्निपपौ, भवत्प्रियार्थम् ॥ १ ॥

विमथत्सु सुरासुरेषु, जाता सुरभिः, तां ऋषिषु, न्यधास्त्रिधामन् ।
हयरत्नं, अभूत्, अथेभरत्नं, द्युतरुश्च, अप्सरसः, सुरेषु तानि ॥ २ ॥

जगदीश, भवत्परा तदानीं, कमनीया, कमला, बभूव देवी ।
अमलां, अवलोक्य, यां विलोलः, सकलोऽपि, स्पृहयाम्बभूव लोकः ॥ ३ ॥

त्वयि दत्तहृदे, तदैव देव्यै, त्रिदशेन्द्रो, मणिपीठिकां, व्यतारीत् ।
सकलोपहृताभिषेचनीयैः, ऋषयः, तां, श्रुतिगीर्भिः, अभ्यषिञ्चन् ॥ ४ ॥

अभिषेकजलानुपाति,मुग्ध,त्वदपाङ्गैः, अवभूषिताङ्गवल्लीम् ।
मणिकुण्डलपीतचेलहार-प्रमुखैः, तां, अमरादयोऽन्वभूषन् ॥ ५ ॥

वरणस्रजं, आत्तभृङ्गनादां, दधती सा, कुचकुम्भमन्दयाना ।
पदशिञ्जित,मञ्जुनूपुरा त्वां, कलितव्रीलविलासं, आससाद ॥ ६ ॥

गिरिशद्रुहिणादि,सर्वदेवान्, गुणभाजोऽपि, अविमुक्तदोषलेशान् ।
अवमृश्य, सदैव सर्वरम्ये, निहिता त्वयि, अनयाऽपि, दिव्यमाला ॥ ७ ॥

उरसा, तरसा, ममानिथैनां, भुवनानां जननीं, अनन्यभावाम् ।
त्वदुरो,विलसत्तदीक्षणश्री-परिवृष्ट्या,परिपुष्टमास, विश्वम् ॥ ८ ॥

अतिमोहनविभ्रमा, तदानीं, मदयन्ती खलु, वारुणी तिरागात् ।
तमसः पदवीं, अदास्त्वमेनां, अतिसम्माननया, महासुरेभ्यः ॥ ९ ॥

तरुणाम्बुदसुन्दरस्तदा त्वं, ननु धन्वन्तरिः, उत्थितोऽम्बुराशेः ।
अमृतं कलशे वहन्, कराभ्यां, अखिलार्तिं हर, मारुतालयेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टाविंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनत्रिंशं दशकम्

उद्गच्छतस्तव करात्, अमृतं हरत्सुदैत्येषु, तानशरणान्, अनुनीय देवान् ।

सद्यस्तिरोदधिथ देव, भवत्प्रभावात्, उद्यत्स्वयूथ्यकलहाः, दितिजा बभूवुः ॥ १ ॥

श्यामां रुचाऽपि वयसाऽपि तनुं, तदानीं, प्राप्तोऽसि, तुङ्गकुचमण्डलभंगुरां, त्वम् ।

पीयूषकुम्भकलहं, परिमुच्य सर्वे, तृष्णाकुलाः प्रतिययुः, त्वदुरोजकुम्भे ॥ २ ॥

का त्वं मृगाक्षि, विभजस्व, सुधां इमां इति, आरूढरागविवशान्, अभियाचतोऽमून् ।

विश्वस्यते मयि कथं, कुलटाऽस्मि दैत्याः, इत्यालपन्नपि, सुविश्वसितान्, अतानीः ॥ ३ ॥

मोदात्, सुधाकलशं, एषु ददत्सु सा त्वं, दुश्चेष्टितं मम सहध्वं, इति ब्रुवाणा ।

पङ्क्तिप्रभेद,विनिवेशित,देवदैत्या, लीलाविलासगतिभिः, समदाः सुधां ताम् ॥ ४ ॥

अस्मासु, इयं प्रणयिणीति, असुरेषु तेषु जोषं स्थितेषु, अथ, समाप्य सुधां सुरेषु ।

त्वं भक्तलोकवशगः, निजरूपमेत्य, स्वर्भानुं, अर्धपरिपीतसुधं, व्यलावीः ॥ ५ ॥

त्वत्तः, सुधाहरणयोग्यफलं, परेषु दत्वा, गते त्वयि, सुरैः खलु ते, व्यगृह्णन् ।

घोरेऽथ मूर्छति रणे, बलिदैत्यमाया-व्यामोहिते सुरगणे, त्वं, इहाविरासीः ॥ ६ ॥

त्वं कालनेमिमथ, मालिमुखान्, जघन्थ, शक्रो जघान, बलिजम्भवलान्, सपाकान् ।

शुष्कार्द्रदुष्करवधे, नमुचौ च लूने, फेनेन नारदगिरा, न्यरुणो रणं त्वम् ॥ ७ ॥

योषावपुः, दनुजमोहनं, आहितं ते, श्रुत्वा, विलोकनकुतूहलवान्, महेशः ।

भूतैस्समं, गिरिजया च, गतः पदं ते, स्तुत्वा, अब्रवीदभिमतं, त्वमथो तिरोधाः ॥ ८ ॥

आरामसीमनि च, कन्दुकघातलीला,-लोलायमाननयनां, कमनीं मनोज्ञाम् ।

त्वामेष वीक्ष्य, विगलद्वसनां, मनोभूवेगात्, अनङ्गरिपुरङ्ग, समालिलिङ्ग ॥ ९ ॥

भूयोऽपि, विद्रुतवतीं, उपधाव्य देव:, वीर्यप्रमोक्षविकसत्, परमार्थबोध: ।

त्वन्मानितस्तव महत्त्वं, उवाच देव्यै, तत्तादृशस्त्वं, अव, वातनिकेतनाथ ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनत्रिंशं दशकं समाप्तम् |

श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रिंशं दशकम्

शक्रेण संयति हतोऽपि, बलिर्महात्मा, शुक्रेण जीविततनु:, क्रतुवर्धितोष्मा ।

विक्रान्तिमान्, भयनिलीनसुरां, त्रिलोकीं चक्रे वशे स:, तव चक्रमुखात्, अभीत: ॥ १ ॥

पुत्रार्तिदर्शनवशात्, अदितिर्विषण्णा, तं काश्यपं निजपतिं, शरणं प्रपन्ना ।

त्वत्पूजनं, तदुदितं हि, पयोव्रताख्यं, सा, द्वादशाहं, अचरत्, त्वयि भक्तिपूर्णा ॥ २ ॥

तस्यावधौ, त्वयि निलीनमतेः, अमुष्याः, श्यामः, चतुर्भुजवपुः, स्वयमाविरासीः ।

नम्रां च तामिह, भवत्तनयो भवेयं, गोप्यं मदीक्षणमिति, प्रलपन्, अयासीः ॥ ३ ॥

त्वं काश्यपे तपसि, सन्निदधत्तदानीं, प्राप्तोऽसि, गर्भमदितेः, प्रणुतो विधात्रा ।

प्रासूत च, प्रकटवैष्णवदिव्यरूपं, सा, द्वादशीश्रवणपुण्यदिने, भवन्तम् ॥ ४ ॥

पुण्याश्रमं तं, अभिवर्षति पुष्पवर्षैः, हर्षाकुले सुरकुले, कृततूर्यघोषे ।

बध्वाऽञ्जलिं, जय जयेति, नुतः पितृभ्यां, त्वं तत्क्षणे, पटुतमं, वटुरूपमाधाः ॥ ५ ॥

तावत्, प्रजापतिमुखैः, उपनीय, मौञ्जी-दण्डाजिनाक्षवलयादिभिः, अर्च्यमानः ।

देदीप्यमानवपुः, ईश, कृताग्निकार्यः, त्वं, प्रास्थिथाः, बलिगृहं, प्रकृताश्वमेधम् ॥ ६ ॥

गात्रेण, भाविमहिमोचितगौरवं, प्राक्, व्यावृण्वतेव, धरणीं चलयन्, अयासीः ।

छत्रं, परोष्मतिरणार्थं, इवादधानः, दण्डं च दानवजनेष्विव, सन्निधातुम् ॥ ७ ॥

तां, नर्मदोत्तरतटे, हयमेधशालां, आसेदुषि त्वयि, रुचा तव, रुद्धनेत्रैः ।

भास्वान् किमेषः, दहनो नु, सनत्कुमारः, योगी नु कोऽयमिति,
शुक्रमुखैः, शशङ्के ॥ ८ ॥

आनीतमाशु, भृगुभिः, महसाऽभिभूतैः, त्वां, रम्यरूपं,
असुरः, पुलकावृताङ्गः ।

भक्त्या समेत्य, सुकृती, परिणिज्य पादौ, तत्तोयं,
अन्वधृत, मूर्धनि, तीर्थतीर्थम् ॥ ९ ॥

प्रह्लादवंशजतया, क्रतुभिः, द्विजेषु विश्वासतो नु, तदिदं, दितिजोऽपि
लेभे ।

यत्, ते पदाम्बु, गिरिशस्य, शिरोभिलाल्यं, स त्वं
विभो, गुरुपुरालय, पालयेथाः ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रिंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकत्रिंशं दशकम्

प्रीत्या दैत्यः, तव तनुमहःप्रेक्षणात्, सर्वथाऽपि,
त्वामाराध्यन्, अजित, रचयन्नञ्जलिं, सञ्जगाद ।
मत्तः किं ते समभिलषितं, विप्रसूनो, वद त्वं,
वित्तं, भक्तं, भवनं, अवनीं वाऽपि, सर्वं प्रदास्ये ॥ १ ॥

तां, अक्षीणां बलिगिरं, उपाकर्ण्य, कारुण्यपूर्णोऽपि,
अस्योत्सेकं, शमयितुमनाः, दैत्यवंशं, प्रशंसन् ।
भूमिं, पादत्रयपरिमितां, प्रार्थयामासिथ त्वं,
सर्वं, देहि, इति तु निगदिते, कस्य हास्यं, न वा स्यात् ॥ २ ॥

विश्वेशं मां, त्रिपदं, इह किं याचसे, बालिशस्त्वं,
सर्वां भूमिं वृणु, किं अमुनेति, आलपत्, त्वां स दृप्यन् ।
यस्माद्दर्पात्, त्रिपदपरिपूर्त्यक्षमः, क्षेपवादान्,
बन्धं चासौ, अगमत्, अतदर्होऽपि, गाढोपशान्त्यै ॥ ३ ॥

पादत्रय्या, यदि न मुदितो, विष्टपैर्नापि तुष्येत्,
इत्युक्तेऽस्मिन् वरद, भवते, दातुकामेऽथ, तोयम् ।

दैत्याचार्यः, तव खलु परीक्षार्थिनः, प्रेरणात्तं,

मा मा देयं, हरिरयमिति, व्यक्तमेव, आबभाषे ॥ ४ ॥

याचत्येवं यदि स भगवान्, पूर्णकामोऽस्मि सोऽहं,

दास्याम्येव, स्थिरमिति वदन्, काव्यशप्तोऽपि, दैत्यः ।

विन्ध्यावल्या, निजदयितया, दत्तपाद्याय तुभ्यं,

चित्रं चित्रं, सकलमपि सः, प्रार्पयत्, तोयपूर्वम् ॥ ५ ॥

निस्सन्देहं, दितिकुलपतौ त्वयि, अशेषार्पणं तत्,

व्यातन्वाने, मुमुचुः, ऋषयः, सामराः, पुष्पवर्षम् ।

दिव्यं रूपं, तव च, तदिदं, पश्यतां विश्वभाजां,

उच्चैरुच्चैः, अवृधत्, अवधीकृत्य, विश्वाण्ड,भाण्डम् ॥ ६ ॥

त्वत्पादाग्रं, निजपदगतं, पुण्डरीकोद्भवोऽसौ,

कुण्डीतोयैः, असिचत्, अपुनात्, यज्जलं, विश्वलोकान् ।

हर्षोत्कर्षात्, सुबहु ननृते, खेचरैः, उत्सवेऽस्मिन्,

भेरीं निघ्नन्, भुवनमचरत्, जाम्बवान्, भक्तिशाली ॥ ७ ॥

तावद्दैत्यास्तु, अनुमतिं, ऋते भर्तुः, आरब्धयुद्धाः,
देवोपेतैः, भवदनुचरैः, सङ्गताः, भङ्गमापन् ।
कालात्माऽयं, वसति पुरतः, यद्वशात्, प्राग्जिताः स्मः,
किं वो युद्धैः, इति बलिगिरा, तेऽथ, पातालमापुः ॥ ८ ॥

पाशैर्बद्धं, पतगपतिना, दैत्यमुच्चैः, अवादीः,
तार्त्तीयीकं, दिश मम पदं, किं न, विश्वेश्वरोऽसि ।
पादं मूर्ध्नि, प्रणय भगवन्, इत्यकम्पं, वदन्तं,
प्रह्लादस्तं, स्वयमुपगतः, मानयन्, अस्तवीत्त्वाम् ॥ ९ ॥

दर्पोच्छित्त्यै, विहितमखिलं दैत्य, सिद्धोऽसि पुण्यैः,
लोकस्तेऽस्तु, त्रिदिवविजयी, वासवत्वं, च पश्चात् ।
मत्सायुज्यं भज च पुनरिति, अन्वगृह्णाः, बलिं तं,
विप्रैः, सन्तानितमखवरः, पाहि वातालयेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकत्रिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्वात्रिंशं दशकम्

पुरा, हयग्रीवमहासुरेण, षष्ठान्तरान्तोद्यदकाण्डकल्पे ।

निद्रोन्मुखब्रह्ममुखात्, हृतेषु वेदेषु, अधित्सः किल मत्स्यरूपम् ॥ १ ॥

सत्यव्रतस्य, द्रमिलाधिभर्तुः, नदीजले, तर्पयतः, तदानीम् ।

कराञ्जलौ सन्, ज्वलिताकृतिस्त्वं, अदृश्यथाः, कश्चन बालमीनः ॥ २ ॥

क्षिप्तं जले त्वां, चकितं विलोक्य, निन्ये, अम्बुपात्रेण, मुनिः स्वगेहम् ।

स्वल्पैः, अहोभिः, कलशीं च कूपं, वापीं सरश्च, आनशिषे, विभो त्वम् ॥ ३ ॥

योगप्रभावात्, भवदाज्ञयैव, नीतस्ततस्त्वं, मुनिना पयोधिम् ।

पृष्टोऽमुना, कल्पदिदृक्षुमेनं, सप्ताहमास्वेति, वदन्, अयासीः ॥ ४ ॥

प्राप्ते त्वदुक्तेऽहनि, वारिधारापरिप्लुते, भूमितले मुनीन्द्रः ।

सप्तर्षिभिः सार्धं, अपारवारिणि, उद्घूर्णमानः, शरणं ययौ त्वाम् ॥ ५ ॥

धरां, त्वदादेशकरीं अवाप्तां, नौरूपिणीं, आरुरुहुस्तदा ते ।

तत्कम्पकम्प्रेषु च तेषु भूयः, त्वं, अम्बुधेः, आविरभूर्महीयान् ॥ ६ ॥

झषाकृतिं, योजनलक्षदीर्घां, दधानं, उच्चैस्तरतेजसं त्वाम् ।
निरीक्ष्य तुष्टाः, मुनयस्त्वदुक्त्या, त्वत्तुङ्गशृङ्गे, तरणिं बबन्धुः ॥ ७ ॥

आकृष्टनौको, मुनिमण्डलाय प्रदर्शयन् विश्वजगद्विभागान् ।
संस्तूयमानो, नृवरेण तेन, ज्ञानं परं चोपदिशन्, अचारीः ॥ ८ ॥

कल्पावधौ, सप्तमुनीन् पुरोवत्, प्रस्थाप्य, सत्यव्रतभूमिपं तम् ।
वैवस्वताख्यं, मनुं, आदधानः, क्रोधात्, हयग्रीवं, अभिद्रुतोऽभूः ॥ ९ ॥

स्वतुङ्गशृङ्गक्षतवक्षसं तं, निपात्य दैत्यं, निगमान् गृहीत्वा ।
विरिञ्चये, प्रीतहृदे ददानः, प्रभञ्जनागारपते, प्रपायाः ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये द्वात्रिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रयत्रिंशं दशकम्

वैवस्वताख्यमनुपुत्र,नभागजात,

नाभागनामकनरेन्द्रसुतोऽम्बरीषः ।

सप्तार्णवावृतमहीदयितोऽपि रेमे,

त्वत्सङ्गिषु त्वयि च, मग्नमनास्सदैव ॥ १ ॥

त्वत्प्रीतये, सकलमेव वितन्वतोऽस्य,

भक्त्यैव देव, नचिरात्, अभृथाः प्रसादम् ।

येनास्य याचनं, ऋतेऽपि, अभिरक्षणार्थं,

चक्रं भवान्, प्रविततार, सहस्रधारम् ॥ २ ॥

स द्वादशीव्रतमथो, भवदर्चनार्थं,

वर्षं दधौ मधुवने, यमुनोपकण्ठे ।

पत्न्या समं, सुमनसा, महतीं वितन्वन्

पूजां, द्विजेषु विसृजन् पशुषष्टिकोटिम् ॥ ३ ॥

तत्राथ पारणदिने, भवदर्चनान्ते,

दुर्वाससाऽस्य मुनिना, भवनं प्रपेदे ।

भोक्तुं वृतश्चस नृपेण, परार्तिशीलः,
मन्दं जगाम यमुनां, नियमान्, विधास्यन् ॥ ४ ॥

राज्ञाऽथ, पारणमुहूर्तसमाप्तिखेदात्,
वारैव पारणं, अकारि, भवत्परेण ।
प्राप्तो मुनिस्तदथ, दिव्यदृशा विजानन्,
क्षिप्यन्, क्रुधा, उद्धृतजटो, वितितान कृत्याम् ॥ ५ ॥

कृत्यां च तां, असिधरां, भुवनं दहन्तीं,
अग्रेऽभिवीक्ष्यनृपतिः, न पदाच्चकम्पे ।
त्वद्भक्तबाधं, अभिवीक्ष्य, सुदर्शनं ते,
कृत्यानलं शलभयन्, मुनिं, अन्वधावीत् ॥ ६ ॥

धावन्, अशेषभुवनेषु, भिया स पश्यन्,
विश्वत्र, चक्रं, अपि ते गतवान्, विरिञ्चम् ।
कः कालचक्रं, अतिलङ्घयतीत्यपास्तः,
शर्वं ययौ, स च भवन्तं, अवन्दतैव ॥ ७ ॥

भूयो भवन्निलयमेत्य, मुनिं नमन्तं,
प्रोचे भवान्, अहं, ऋषे, ननु भक्तदासः ।
ज्ञानं तपश्च विनयान्वितमेव, मान्यं,
याहि, अम्बरीषपदमेव, भजेति भूमन् ॥ ८ ॥

तावत्समेत्य, मुनिना, स गृहीतपादः,
राजा, अपसृत्य, भवदस्त्रं, असौ, अनौषीत् ।
चक्रे गते, मुनिरदात्, अखिलाशिषोऽस्मै,
त्वद्भक्तिं, आगसि कृतेऽपि, कृपां च शंसन् ॥ ९ ॥

राजा प्रतीक्ष्य मुनिं, एकसमां, अनाश्वान्,
सम्भोज्य, साधु तं, ऋषिं, विसृजन् प्रसन्नम् ।
भुक्त्वा स्वयं, त्वयि ततोऽपि, दृढं रतोऽभूत्,
सायुज्यमाप च सः, मां, पवनेश, पायाः ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रयत्रिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुस्त्रिंशं दशकम्

गीर्वाणैरर्थ्यमानो, दशमुखनिधनं, कोसलेषु, ऋश्यशृङ्गे,
पुत्रीयां, इष्टिमिष्ट्वा, ददुषि, दशरथक्ष्माभृते, पायसाग्र्यम् ।
तद्भुक्त्या तत्पुरन्ध्रीष्वपि, तिसृषु समं, जातगर्भासु, जातो
रामस्त्वं लक्ष्मणेन, स्वयमथ, भरतेनापि, शत्रुघ्ननाम्ना ॥ १ ॥

कोदण्डी, कौशिकस्य क्रतुवरं, अवितुं, लक्ष्मणेनानुयातो,
यातोऽभूः, तातवाचा, मुनिकथित,मनुद्वन्द्व,शान्ताध्वखेदः ।
नृणां त्राणाय, बाणैः, मुनिवचनबलात्, ताटकां पाटयित्वा,
लब्ध्वास्मात्, अस्त्रजालं, मुनिवनमगमो देव, सिद्धाश्रमाख्यम् ॥ २ ॥

मारीचं द्रावयित्वा, मखशिरसि शरैः, अन्यरक्षांसि निघ्नन्,
कल्यां कुर्वन्नहल्यां, पथि, पदरजसा, प्राप्य वैदेहगेहम् ।
भिन्दानश्चान्द्रचूडं धनुः, अवनिसुतां, इन्दिरामेव लब्ध्वा,
राज्यं, प्रातिष्ठथास्त्वं, त्रिभिरपि च समं, भ्रातृवीरैः, सदारैः ॥ ३ ॥

आरुन्धाने रुषान्धे, भृगुकुल तिलके, संक्रमय्य स्वतेजः,
याते, यातोसि, अयोध्यां, सुखमिह निवसन्, कान्तया, कान्तमूर्ते ।

शत्रुघ्नेन, एकदाथो, गतवति भरते, मातुलस्याधिवासं,
तातारब्धोऽभिषेकः, तव किल विहतः, केकयाधीशपुत्र्या ॥ ४ ॥

तातोक्त्या यातुकामो वनं, अनुजवधूसंयुतः, चापधारः,
पौरान्, आरुध्य मार्गे, गुहनिलयगतः, त्वं, जटाचीरधारी ।
नावा सन्तीर्य गङ्गां, अधिपदवि पुनः, तं भरद्वाजं आरात्,
नत्वा, तद्वाक्यहेतोः, अतिसुखं अवसः, चित्रकूटे, गिरीन्द्रे ॥ ५ ॥

श्रुत्वा, पुत्रार्तिखिन्नं खलु, भरतमुखात्, स्वर्गयातं स्वतातं,
तप्तो, दत्वाऽम्बु तस्मै, निदधिथ भरते, पादुकां, मेदिनीं च ।
अत्रिं नत्वाऽथ, गत्वा वनमतिविपुलं दण्डकं, चण्डकायं
हत्वा दैत्यं, विराधं, सुगतिमकलयः, चारु भोः, शारभङ्गीम् ॥ ६ ॥

नत्वा अगस्त्यं, समस्ताशरनिकरसपत्राकृतिं, तापसेभ्यः,
प्रत्यश्रौषीः, प्रियैषी, तदनु च मुनिना, वैष्णवे, दिव्यचापे ।
ब्रह्मास्त्रे चापि दत्ते पथि, पितृसुहृदं, वीक्ष्य भूयो जटायुं,
मोदात्, गोदातटान्ते, परिरमसि पुरा, पञ्चवट्यां, वधूट्या ॥ ७ ॥

प्राप्ताया:, शूर्पणख्या:, मदनचलधृते:, अर्थनैर्निस्सहात्मा,
तां सौमित्रौ विसृज्य, प्रबलतमरुषा, तेन, निर्लूननासाम् ।
दृष्ट्वैनां रुष्टचित्तं, खरं, अभिपतितं, दूषणं च त्रिमूर्धं,
व्याहिंसी:, आशरानपि, अयुतसमधिकां, तत्क्षणात्, अक्षतोष्मा ॥ ८ ॥

सोदर्या,प्रोक्तवार्ताविवश,दशमुखादिष्ट,मारीचमाया-
सारङ्गं, सारसाक्ष्या स्पृहितं, अनुगत: प्रावधी:, बाणघातम् ।
तन्मायाक्रन्दनिर्यापित,भवदनुजां, रावण:, तामहार्षी:,
तेन आर्तोऽपि, त्वमन्त: किमपि मुदमधा:, तद्वधोपाय, लाभात् ॥ ९ ॥

भूयस्तन्वीं, विचिन्वन्, अहृत दशमुख:, त्वद्वधूं, मद्वधेनेति,
उक्त्वा, याते जटायौ दिवं, अथ सुहृद:, प्रातनो:, प्रेतकार्यम् ।
गृह्णानं तं कबन्धं, जघनिथ, शबरीं प्रेक्ष्य, पम्पातटे त्वं,
सम्प्राप्तो, वातसूनुं, भृशमुदितमना:, पाहि वातालयेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुस्त्रिंशं दशकं समाप्तम् |
श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चत्रिंशं दशकम्

नीतस्सुग्रीवमैत्रीं, तदनु हनुमता, दुन्दुभेः कायमुच्चैः,
क्षिप्त्वाङ्गुष्ठेन भूयः, लुलविथ, युगपत् पत्रिणा, सप्त सालान् ।
हत्वा, सुग्रीवघातोद्यतं, अतुलबलं वालिनं, व्याजवृत्त्या,
वर्षावेलां, अनैषीः, विरहतरलितः, त्वं, मतङ्गाश्रमान्ते ॥ १ ॥

सुग्रीवेण, अनुजोक्त्या सभयं, अभियता, व्यूहितां, वाहिनीं तां,
ऋक्षाणां वीक्ष्य दिक्षु, द्रुतमथ, दयितामार्गणाय अवनम्राम् ।
सन्देशं चाङ्गुलीयं, पवनसुतकरे प्रादिशो, मोदशाली,
मार्गे मार्गे, ममार्गे, कपिभिरपि तदा, त्वत्प्रिया, सप्रयासैः ॥ २ ॥

त्वद्वार्ताकर्णनोद्यद्गरुदुरुजव,सम्पाति, सम्पातिवाक्य-
प्रोत्तीर्णार्णोधिः, अन्तर्नगरि, जनकजां वीक्ष्य, दत्वाङ्गुलीयम् ।
प्रक्षुद्य, उद्यानं, अक्षक्षपणचणरणः, सोढबन्धो, दशास्यं
दृष्ट्वा, प्लुष्ट्वा च लङ्कां, झटिति, स हनुमान्, मौलिरत्नं, ददौ ते ॥ ३ ॥

त्वं सुग्रीवाङ्गदादि,प्रबलकपिचमूचक्र,विक्रान्तभूमी-
चक्रोऽभिक्रम्य, पारेजलधि, निशिचरेन्द्रानुजा,श्रीयमाणः ।

तत्प्रोक्तां शत्रुवार्तां, रहसि निशमयन्, प्रार्थनापार्थ्य,रोष-
प्रास्ताग्नेयास्त्र,तेजस्त्रसदुदधिगिरा, लब्धवान्, मध्यमार्गम् ॥ ४ ॥

कीशैः, आशान्तरोपाहृत,गिरिनिकरैः, सेतुं, आधाप्य यातो,
यातूनि आमर्द्य, दंष्ट्रानख,शिखरिशिला,सालशस्त्रैः, स्वसैन्यैः ।
व्याकुर्वन् सानुजस्त्वं, समरभुवि परं, विक्रमं शक्रजेत्रा,
वेगात्, नागास्त्रबद्धः, पतगपति गरुन्मारुतैः, मोचितोऽभूः ॥ ५ ॥

सौमित्रिस्तु, अत्र, शक्तिप्रहृतिगलदसुः, वातजानीतशैल-
घ्राणात्, प्राणानुपेतः, व्यकृणुत, कुसृतिश्लाघिनं, मेघनादम् ।
मायाक्षोभेषु, वैभीषणवचनहृतस्तम्भनः, कुम्भकर्णं
सम्प्राप्तं, कम्पितोर्वीतलं, अखिलचमूभक्षिणं, व्यक्षिणोस्त्वम् ॥ ६ ॥

गृह्णन्, जम्भारिसंप्रेषितरथकवचौ, रावणेनाभियुद्ध्यन्,
ब्रह्मास्त्रेण, अस्य भिन्दन्, गलततिं, अबलां, अग्निशुद्धां, प्रगृह्णन् ।
देवश्रेणीवरोज्जीवित,समरमृतैः, अक्षतैः, ऋक्षसङ्घैः,
लङ्काभर्त्रा च साकं, निजनगरमगाः, सप्रियः, पुष्पकेण ॥ ७ ॥

प्रीतो दिव्याभिषेकैः, अयुतसमधिकान् वत्सरान्, पर्यरंसीः,
मैथिल्यां पापवाचा, शिव! शिव!, किल तां, गर्भिणीं, अभ्यहासीः, ।
शत्रुघ्नेन अर्दयित्वा लवणनिशिचरं, प्रार्दयः शूद्रपाशं,
तावत् वाल्मीकिगेहे, कृतवसतिः, उपासूत, सीता, सुतौ ते ॥ ८ ॥

वाल्मीकेः, त्वत्सुतोद्गापित मधुरकृतेः, आज्ञया यज्ञवाटे,
सीतां, त्वयि आप्तुकामे, क्षितिमविशदसौ, त्वं च, कालार्थितोऽभूः ।
हेतोः, सौमित्रिघाती, स्वयमथ सरयूमग्न,निश्शेषभृत्यैः
साकं, नाकं प्रयातो, निजपदमगमो देव, वैकुण्ठमाद्यम् ॥ ९ ॥

सोऽयं मर्त्यावतारः, तव खलु नियतं, मर्त्यशिक्षार्थं, एवं
विश्लेषार्तिः, निरागस्त्यजनमपि, भवेत्, कामधर्मातिसक्त्या ।
नो चेत्, स्वात्मानुभूतेः, क्व नु तव मनसो विक्रिया, चक्रपाणे,
स त्वं, सत्त्वैकमूर्ते, पवनपुरपते, व्याधुनु, व्याधितापान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चत्रिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षट्त्रिंशं दशकम्

अत्रेः पुत्रतया पुरा त्वं, अनसूयायां हि, दत्ताभिधः,
जातः शिष्यनिबन्ध तन्द्रितमनाः, स्वस्थश्चरन्, कान्तया ।
दृष्टो भक्ततमेन, हैहयमहीपालेन तस्मै वरान्,
अष्टैश्वर्यमुखान्, प्रदाय ददिथ, स्वेनैव, चान्ते वधम् ॥ १ ॥

सत्यं कर्तुं, अथ अर्जुनस्य च वरं, तच्छक्तिमात्रानतं,
ब्रह्मद्वेषि, तदाखिलं नृपकुलं, हन्तुं च भूमेर्भरम् ।
सञ्जातो, जमदग्नितो भृगुकुले, त्वं रेणुकायां हरे,
रामो नाम, तदात्मजेषु, अवरजः, पित्रोरधाः, सम्मदम् ॥ २ ॥

लब्धाम्नायगणः, चतुर्दशवयाः, गन्धर्वराजे मनाक्,
आसक्तां किल, मातरं प्रति, पितुः क्रोधाकुलस्य, आज्ञया ।
ताताज्ञातिगसोदरैः समं, इमां छित्वाऽथ, शान्तात् पितुः,
तेषां, जीवनयोगं, आपिथ वरं, माता च ते, अदाद्वरान् ॥ ३ ॥

पित्रा मातृमुदे, स्तवाहृतवियद्धेनोः, निजादाश्रमात्,
प्रस्थायाथ, भृगोर्गिरा हिमगिरौ, आराध्य गौरीपतिम् ।
लब्ध्वा, तत्परशुं, तदुक्तदनुजच्छेदी, महास्त्रादिकं
प्राप्तो, मित्रं अथ, अकृतव्रणमुनिं प्राप्य, आगमः स्वाश्रमम् ॥ ४ ॥

आखेटोपगतोऽर्जुनः, सुरगवीसम्प्राप्तसम्पद्गणैः,
त्वत्पित्रा परिपूजितः पुरगतो, दुर्मन्त्रिवाचा पुनः ।
गां क्रेतुं सचिवं न्ययुङ्क्त, कुधिया तेनापि, रुन्धन्मुनि-
प्राणक्षेपसरोष,गोहतचमूचक्रेण, वत्सो हृतः ॥ ५ ॥

शुक्रोज्जीविततातवाक्यचलितक्रोधोऽथ, सख्या समं,
बिभ्रत्, ध्यातमहोदरोपनिहितं, चापं कुठारं, शरान् ।
आरूढः, सहवाहयन्तृकरथं, माहिष्मतीमाविशन्,
वाग्भिर्वत्समदाशुषि, क्षितिपतौ, सम्प्रास्तुथाः, सङ्गरम् ॥ ६ ॥

पुत्राणामयुतेन, सप्तदशभिश्च, अक्षौहिणीभिः, महा-
सेनानीभिः, अनेकमित्रनिवहैः, व्याजृम्भितायोधनः ।
सद्यः, त्वत्ककुठार,बाणविदलन्निश्शेषसैन्योत्करः,
भीतिप्रद्रुतनष्टशिष्टतनयः, त्वां, आपतत् हैहयः ॥ ७ ॥

लीलावारितनर्मदा,जलवलल्लङ्केशगर्वापह,
श्रीमद्बाहुसहस्रमुक्तबहुशस्त्रास्त्रं, निरुन्धन्नमुम् ।
चक्रे त्वय्यथ, वैष्णवेऽपि विफले, बुद्ध्वा हरिं त्वां मुदा,
ध्यायन्तं, छितसर्वदोषं, अवधीः, सोऽगात् परं ते पदम् ॥ ८ ॥

भूयोऽमर्षितहैहयात्मजगणैः, ताते हते रेणुकां,
आघ्नानां हृदयं निरीक्ष्य, बहुशः, घोरां प्रतिज्ञां, वहन् ।
ध्यानानीतरथायुधस्त्वं, अकृथाः, विप्रद्रुहः क्षत्रियान्,
दिक्चक्रेषु कुठारयन्, विशिखयन्, निःक्षत्रियां, मेदिनीम् ॥ ९ ॥

तातोज्जीवनकृत्, नृपालककुलं, त्रिस्सप्तकृत्वो जयन्,
सन्तर्प्याथ, समन्तपञ्चक,महारक्तह्रदौघे, पितृन् |
यज्ञे क्ष्मामपि, काश्यपादिषु दिशन्, साल्वेन युध्यन् पुनः,
कृष्णोऽमुं, निहनिष्यतीति शमितः, युद्धात्, कुमारैर्भवान् ॥ १० ॥

न्यस्यास्त्राणि, महेन्द्रभूभृति, तपस्तन्वन्, पुनर्मज्जितां,
गोकर्णावधि, सागरेण, धरणीं दृष्ट्वा अर्थितस्तापसैः ।
ध्यातेष्वास,धृतानलास्त्रचकितं सिन्धुं, स्रुवक्षेपणात्,
उत्सार्य, उद्धृतकेरलो, भृगुपते, वातेश, संरक्ष माम् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये षट्त्रिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तत्रिंशं दशकम्

सान्द्रानन्दतनो हरे ननु पुरा, दैवासुरे सङ्गरे,
त्वत्कृत्ता अपि, कर्मशेषवशतः, ये, ते न याता गतिम् ।
तेषां भूतलजन्मनां, दितिभुवां भारेण, दूरार्दिता,
भूमिः, प्राप विरिञ्चं, आश्रितपदं, देवैः पुरैवागतैः ॥ १ ॥

हा हा, दुर्जनभूरिभारमथितां, पाथोनिधौ पातुकां,
एतां पालय, हन्त, मे विवशतां, सम्पृच्छ, देवान् इमान् ।
इत्यादिप्रचुरप्रलापविवशां, आलोक्य धाता महीं,
देवानां वदनानि वीक्ष्य परितः, दध्यौ, भवन्तं, हरे ॥ २ ॥

ऊचे च, अम्बुजभूः, अमून् अयि सुराः, सत्यं धरित्र्या वचः,
नन्वस्या, भवतां च रक्षणविधौ, दक्षो हि, लक्ष्मीपतिः ।
सर्वे शर्वपुरस्सरा वयमितो, गत्वा पयोवारिधिं,
नत्वा तं, स्तुमहे, जवात्, इति ययुः, साकं तवाकेतनम् ॥ ३ ॥

ते, मुग्धानिलशालिदुग्धजलधेः, तीरं गताः सङ्गताः,
यावत्, त्वत्पदचिन्तनैकमनसः, तावत्, स पाथोजभूः ।

त्वद्वाचं हृदये निशम्य, सकलान् आनन्दयन् ऊचिवान्,
आख्यातः परमात्मना, स्वयमहं, वाक्यं तत् आकर्ण्यताम् ॥ ४ ॥

जाने दीनदशामहं, दिविषदां, भूमेश्च भीमैर्नृपैः,
तत्क्षेपाय, भवामि यादवकुले, सोऽहं समग्रात्मना ।
देवाः वृष्णिकुले भवन्तु कलया, देवाङ्गनाश्चावनौ,
मत्सेवार्थं इति, त्वदीयवचनं, पाथोजभूः ऊचिवान् ॥ ५ ॥

श्रुत्वा, कर्णरसायनं तव वचः, सर्वेषु, निर्वापित-
स्वान्तेषु, ईश, गतेषु, तावककृपापीयूष,तृप्तात्मसु ।
विख्याते, मधुरापुरे किल, भवत्सान्निध्यपुण्योत्तरे,
धन्यां, देवकनन्दनां, उदवहत्, राजा, स शूरात्मजः ॥ ६ ॥

उद्वाहावसितौ, तदीयसहजः, कंसोऽथ सम्मानयन्,
एतौ, सूततया गतः पथि रथे, व्योमोत्थया, त्वद्गिरा ।
अस्याः, त्वां, अतिदुष्टं, अष्टमसुतो हन्तेति, हन्तेरितः,
सन्त्रासात्, स तु हन्तुं, अन्तिकगतां, तन्वीं, कृपाणीं, अधात् ॥ ७ ॥

गृह्णानः, चिकुरेषु तां खलमतिः, शौरेश्चिरं सान्त्वनैः
नो मुञ्चन् पुनः, आत्मजार्पणगिरा, प्रीतोऽथ, यातो गृहान् ।
आद्यं, त्वत्सहजं तथाऽर्पितमपि, स्नेहेन नाहन्नसौ,
दुष्टानामपि देव, पुष्टकरुणा, दृष्टा हि धीः, एकदा ॥ ८ ॥

तावत्त्वन्मनसैव, नारदमुनिः, प्रोचे स भोजेश्वरं,
यूयं नन्वसुराः, सुराश्च यदवः. जानासि, किं न प्रभो ।
मायावी स हरिः, भवद्वधकृते, भावी, सुरप्रार्थनात्,
इत्याकर्ण्य, यदून्, अदूधुनदसौ, शौरेश्च, सूनून्, अहन् ॥ ९ ॥

प्राप्ते सप्तमगर्भतां, अहिपतौ, त्वत्प्रेरणान्मायया,
नीते माधव, रोहिणीं, त्वमपि भोः, सच्चित्सुखैकात्मकः ।
देवक्याः, जठरं विवेशिथ, विभो, संस्तूयमानः सुरैः,
स त्वं कृष्ण, विधूय रोगपटलीं, भक्तिं परां, देहि मे ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तत्रिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टात्रिंशं दशकम्

आनन्दरूप, भगवन्, अयि तेऽवतारे प्राप्ते, प्रदीप्तभवदङ्गनिरीयमाणैः ।

कान्तिव्रजैरिव, घनाघनमण्डलैर्द्यां, आवृण्वती विरुरुचे किल, वर्षवेला ॥ १ ॥

आशासु, शीतलतरासु, पयोदतोयैः, आशासिताप्तिविवशेषु च, सज्जनेषु ।

नैशाकरोदयविधौ, निशि मध्यमायां, क्लेशापहस्त्रिजगतां त्वं, इहाविरासीः ॥ २ ॥

बाल्यस्पृशाऽपि, वपुषा, दधुषा विभूतीः, उद्यत्किरीटकटकाङ्गद, हारभासा ।

शङ्खारि,वारिजगदापरिभासितेन, मेघासितेन, परिलेसिथ, सूतिगेहे ॥ ३ ॥

वक्षःस्थली,सुखनिलीनविलासि,लक्ष्मीमन्दाक्षलक्षितकटाक्ष,विमोक्षभेदैः ।

तन्मन्दिरस्य खलकंसकृतामलक्ष्मीं, उन्मार्जयन्निव, विरेजिथ, वासुदेव ॥

शौरिस्तु, धीरमुनिमण्डलचेतसोऽपि, दूरस्थितं वपुरुदीक्ष्य, निजेक्षणाभ्याम् ॥

आनन्दबाष्पपुलकोद्गमगद्गदार्द्रः, तुष्टाव, दृष्टिमकरन्दरसं, भवन्तम् ॥ ५ ॥

देव प्रसीद, परपूरुष,तापवल्ली, निर्लूनिदात्रसम,नेत्रकला,विलासिन् ।

खेदान्, अपाकुरु, कृपागुरुभिः कटाक्षैः, इत्यादि तेन, मुदितेन, चिरं, नुतोऽभूः ॥ ६ ॥

मात्रा च, नेत्रसलिलास्तृतगात्रवल्या, स्तोत्रैरभिष्टुतगुणः, करुणालयस्त्वम् ।

प्राचीनजन्मयुगलं, प्रतिबोध्य ताभ्यां, मातुर्गिरा दधिथ, मानुषबालवेषम् ॥ ७ ॥

त्वत्प्रेरितस्तदनु, नन्दतनूजया, ते व्यत्यासं, आरचयितुं, स हि शूरसूनुः ।

त्वां, हस्तयोरधित, चित्तविधार्यमार्यैः, अम्भोरुहस्थ,कलहंसकिशोररम्यम् ॥ ८ ॥

जाता तदा, पशुपसद्मनि, योगनिद्रा, निद्राविमुद्रितं, अथाकृत पौरलोकम् ।

त्वत्प्रेरणात्, किमिव चित्रं, अचेतनैर्यद्, द्वारैः स्वयं व्यघटि, सङ्घटितैः सुगाढम् ॥ ९ ॥

शेषेण, भूरिफणवारितवारिणाऽथ, स्वैरं प्रदर्शितपथो, मणिदीपितेन ।

त्वां धारयन्, स खलु, धन्यतमः प्रतस्थे, सोऽयं त्वमीश, मम नाशय, रोगवेगान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टात्रिंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनचत्वारिंशं दशकम्

भवन्तं अयमुद्वहन्, यदुकुलोद्वहो निस्सरन्,
ददर्श, गगनोच्चलज्जलभरां, कलिन्दात्मजाम् ।
अहो सलिलसञ्चयः, स पुनः, ऐन्द्रजालोदितः,
जलौघ इव, तत्क्षणात्, प्रपदमेयतां आययौ ॥ १ ॥

प्रसुप्तपशुपालिकां, निभृतं, आरुदद्बालिकां,
अपावृतकवाटिकां, पशुपवाटिकां आविशन् ।
भवन्तं अयमर्पयन्, प्रसवतल्पके तत्पदात्,
वहन्, कपटकन्यकां, स्वपुरमागतो वेगतः ॥ २ ॥

ततस्त्वदनुजारवक्षपितनिद्र,वेगद्रवद्-
भटोत्कर,निवेदितप्रसववार्तयैव, आर्तिमान् ।
विमुक्तचिकुरोत्करस्त्वरितं, आपतन् भोजराट्,
अतुष्ट इव दृष्टवान्, भगिनिकाकरे, कन्यकाम् ॥ ३ ॥

ध्रुवं कपटशालिनो, मधुहरस्य माया भवेत्,
असाविति किशोरिकां, भगिनिका,करालिङ्गिताम् ।

द्विपो नलिनिकान्तरादिव, मृणालिकामक्षिपन्,
अयं त्वदनुजां, अजां, उपलपट्टके पिष्टवान् ॥ ४ ॥

ततो भवदुपासको, झटिति मृत्युपाशादिव,
प्रमुच्य तरसैव सा, समधिरूढ,रूपान्तरा ।
अधस्तलं, अजग्मुषी, विकसदष्टबाहुस्फुरन्-
महायुधं, अहो गता किल, विहायसा दिद्युते ॥ ५ ॥

नृशंसतर कंस, ते किमु मया विनिष्पिष्टया,
बभूव, भवदन्तकः क्वचन चिन्त्यतां, ते हितम् ।
इति त्वदनुजा विभो, खलमुदीर्य तं, जग्मुषी,
मरुद्गणपणायिता, भुवि च, मन्दिराणि एयुषी ॥ ६ ॥

प्रगे पुनः, अगात्मजावचनं, ईरिताः, भूभुजा,
प्रलम्बबक,पूतनाप्रमुखदानवाः, मानिनः ।
भवन्निधनकाम्यया, जगति, बभ्रमुः निर्भयाः,
कुमारकविमारकाः, किमिव दुष्करं निष्कृपैः ॥ ७ ॥

ततः पशुपमन्दिरे, त्वयि मुकुन्द, नन्दप्रिया-
प्रसूतिशयनेशये, रुवति किञ्चित् अञ्चत्पदे ।
विबुध्य, वनिताजनैः, तनयसम्भवे घोषिते,
मुदा किमु वदाम्यहो, सकलमाकुलं गोकुलम् ॥ ८ ॥

अहो खलु यशोदया, नवकलायचेतोहरं,
भवन्तं, अलमन्तिके प्रथमं, आपिबन्त्या, दृशा ।
पुनः, स्तनभरं निजं, सपदि, पाययन्त्या मुदा,
मनोहरतनुस्पृशा, जगति, पुण्यवन्तो जिताः ॥ ९ ॥

भवत्कुशलकाम्यया, स खलु नन्दगोपस्तदा,
प्रमोदभरसङ्कुलो, द्विजकुलाय, किन्नाददात् ।
तथैव पशुपालकाः, किमु न मङ्गलं तेनिरे,
जगत्त्रितयमङ्गल, त्वमिह पाहि मां, आमयात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनचत्वारिंशं दशकं समाप्तम् ।
श्री हरये नमः । रमा रमण गोविन्द, गोविन्द । श्रीकृष्णार्पणमस्तु ।

# श्रीमन्नारायणीये चत्वारिंशं दशकम्

तदनु नन्दं, अमन्दशुभास्पदं, नृपपुरीं, करदानकृते गतम्।
समवलोक्य जगाद, भवत्पिता, विदितकंससहायजनोद्यमः ॥ १ ॥

अयि सखे, तव बालकजन्म, मां सुखयते अद्य, निजात्मजजन्मवत् ।
इति, भवत्पितृतां, व्रजनायके समधिरोप्य, शशंस, तमादरात् ॥ २ ॥

इह च सन्ति, अनिमित्तशतानि ते, कटकसीम्नि, ततो लघु गम्यताम् ।
इति च, तद्वचसा, व्रजनायको, भवदपायभिया, द्रुतमाययौ ॥ ३ ॥

अवसरे खलु तत्र च काचन, व्रजपदे मधुराकृतिः, अङ्गना ।
तरलषट्पदलालितकुन्तला, कपटपोतक, ते निकटं गता ॥ ४ ॥

सपदि सा, हृतबालकचेतना, निशिचरान्वयजा किल, पूतना ।
व्रजवधूष्विह, केयमिति क्षणं, विमृशतीषु, भवन्तं, उपाददे ॥ ५ ॥

ललितभावविलास,हृतात्मभिः, युवतिभिः प्रतिरोद्धुं, अपारिता ।
स्तनमसौ, भवनान्तनिषेदुषी, प्रददुषी भवते, कपटात्मने ॥ ६ ॥

समधिरुह्य तदङ्कं, अशङ्कितः त्वमथ, बालकलोपनरोषितः ।
महदिवाम्रफलं, कुचमण्डलं, प्रतिचुचूषिथ, दुर्विषदूषितम् ॥ ७ ॥

असुभिरेव समं धयति त्वयि, स्तनमसौ स्तनितोपमनिस्वना ।
निरपतत्, भयदायि निजं वपुः प्रतिगता, प्रविसार्य भुजावुभौ ॥ ८ ॥

भयदघोषण,भीषणविग्रह,श्रवणदर्शन,मोहितवल्लवे ।
व्रजपदे, तदुरःस्थलखेलनं, ननु भवन्तं, अगृह्णत, गोपिकाः ॥ ९ ॥

भुवनमङ्गलनामभिरेव, ते, युवतिभिर्बहुधा, कृतरक्षणः ।
त्वमयि वातनिकेतन,नाथ, मामगदयन्, कुरु तावकसेवकम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चत्वारिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकचत्वारिंशं दशकम्

व्रजेश्वरः, शौरिवचो निशम्य, समाव्रजन्, अध्वनि भीतचेताः ।
निष्पिष्ट,निश्शेषतरुं निरीक्ष्य, कञ्चित्पदार्थं, शरणं गतस्त्वाम् ॥ १ ॥

निशम्य, गोपीवचनात् उदन्तं, सर्वेऽपि गोपाः, भयविस्मयान्धाः ।
त्वत्पातितं, घोरपिशाचदेहं, देहुर्विदूरेऽथ, कुठारकृत्तम् ॥ २ ॥

त्वत्पीतपूतस्तनतच्छरीरात्, समुच्चलन्, उच्चतरो हि धूमः ।
शङ्कामधात्, आगरवः किमेषः, किं चान्दनो, गौल्गुलवोऽथवेति ॥ ३ ॥

मदङ्गसङ्गस्य फलं, न दूरे, क्षणेन तावत्, भवतामपि स्यात् ।
इत्युल्लपन्, वल्लवतल्लजेभ्यः, त्वं पूतनां, आतनुथाः सुगन्धिम् ॥ ४ ॥

चित्रं पिशाच्या, न हतः कुमारः, चित्रं पुरैवाकथि, शौरिणेदम् ।
इति प्रशंसन् किल, गोपलोको, भवन्मुखालोकरसे, न्यमाङ्क्षीत् ॥ ५ ॥

दिनेदिनेऽथ, प्रतिवृद्धलक्ष्मीः, अक्षीणमङ्गल्यशतो व्रजोऽयम् ।
भवन्निवासात्, अयि वासुदेव, प्रमोदसान्द्रः, परितो विरेजे ॥ ६ ॥

गृहेषु ते, कोमलरूपहास, मिथःकथासङ्कुलिताः, कमन्यः ।
वृत्तेषु कृत्येषु, भवन्निरीक्षासमागताः, प्रत्यहं, अत्यनन्दन् ॥ ७ ॥

अहो कुमारो, मयि दत्तदृष्टिः, स्मितं कृतं मां प्रति वत्सकेन ।
एह्येहि मां, इत्युपसार्य पाणिं, त्वयीश किं किं, न कृतं वधूभिः ॥ ८ ॥

भवद्वपुःस्पर्शनकौतुकेन, करात्करं, गोपवधूजनेन ।
नीतस्त्वं, आताम्रसरोजमाला,व्यालम्बिलोलम्बतुलां अलासीः ॥ ९ ॥

निपाययन्ती स्तनं, अङ्कगं त्वां, विलोकयन्ती वदनं, हसन्ती ।
दशां, यशोदा, कतमां न भेजे, स तादृशः पाहि, हरे गदान्माम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकचत्वारिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्विचत्वारिंशं दशकम्

कदापि जन्मर्क्षदिने, तव प्रभो, निमन्त्रितज्ञातिवधू,महीसुरा ।

महानसः, त्वां सविधे निधाय, सा, महानसादौ, ववृते व्रजेश्वरी ॥ १ ॥

ततो, भवत्त्राणनियुक्तबालक,प्रभीतिसङ्क्रन्दन,सङ्कुलारवैः ।

विमिश्रं,अश्रावि भवत्समीपतः, परिस्फुटद्दारु,चटच्चटारवः ॥ २ ॥

ततस्तदाकर्णनसम्भ्रमश्रम,प्रकम्पिवक्षोजभराः, व्रजाङ्गनाः ।

भवन्तं, अन्तर्ददृशुस्समन्ततः, विनिष्पतत् दारुणदारुमध्यगम् ॥ ३ ॥

शिशोः, अहो, किं किं, अभूत्, इति द्रुतं प्रधाव्य, नन्दः, पशुपाश्च भूसुराः ।

भवन्तं, आलोक्य, यशोदया धृतं, समाश्वसन्,अश्रुजलार्द्रलोचनाः ॥ ४ ॥

कस्को नु, कौतस्कुत एष विस्मयः, विशङ्कटं यत्, शकटं विपाटितम् ।

न कारणं किञ्चित्, इहेति ते स्थिताः, स्वनासिकादत्तकराः, त्वदीक्षकाः ॥ ५ ॥

कुमारकस्यास्य, पयोधरार्थिनः, प्ररोदने, लोलपदाम्बुजाहतम् ।

मया मया दृष्टम, अनो विपर्यगात्, इतीश, ते पालकबालकाः, जगुः ॥ ६ ॥

भिया तदा, किञ्चित्, अजानतामिदं, कुमारकाणाम्, अतिदुर्घटं वचः ।

भवत्प्रभावाविदुरैः, इतीरितं, मनागिवाशङ्क्यत, दृष्टपूतनैः ॥ ७ ॥

प्रवालताम्रं, किमिदं पदं क्षतं, सरोजरम्यौ नु, करौ विरोजितौ।

इति प्रसर्पत्करुणातरङ्गिताः, त्वदङ्गं, आपस्पृशुः, अङ्गनाजनाः ॥ ८ ॥

अये, सुतं देहि, जगत्पतेः कृपातरङ्गपातात्, परिपातं, अद्य मे ।

इति स्म सङ्गृह्य पिता त्वदङ्गकं, मुहुर्मुहुः, श्लिष्यति, जातकण्टकः ॥ ९ ॥

अनोनिलीनः किल हन्तुमागतः, सुरारिः, एवं भवता, विहिंसितः ।

रजोऽपि नो दृष्टं, अमुष्य तत्कथं, स शुद्धसत्त्वे त्वयि, लीनवान् ध्रुवम् ॥१०॥

प्रपूजितैः, तत्र ततो द्विजातिभिः, विशेषतो, लम्भितमङ्गलाशिषः ।

व्रजं, निजैर्बाल्यरसैर्विमोहयन्, मरुत्पुराधीश, रुजां जहीहि मे ॥११॥

ॐ तत्सदिति श्रीमन्नारायणीये द्विचत्वारिंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रिचत्वारिंशं दशकम्

त्वामेकदा, गुरुमरुत्पुरनाथ, वोढुं, गाढाधिरूढ,गरिमाणं, अपारयन्ती ।

माता निधाय शयने, किमिदं बतेति, ध्यायन्त्यचेष्टत गृहेषु, निविष्टशङ्का ॥ १ ॥

तावत् विदूरं, उपकर्णितघोरघोष,व्याजृम्भिपांसुपटली,परिपूरिताशः ।

वात्यावपुस्स किल दैत्यवरः, तृणावर्ताख्यो जहार, जनमानसहारिणं त्वाम् ॥ २ ॥

उद्दामपांसुतिमिराहत,दृष्टिपाते, द्रष्टुं किमपि, अकुशले, पशुपाललोके ।

हा, बालकस्य किमिति, त्वदुपान्तमाप्ता, माता, भवन्तमविलोक्य, भृशं रुरोद ॥ ३ ॥

तावत् स दानववरोऽपि च दीनमूर्तिः, भावत्कभार,परिधारणलूनवेगः ।

सङ्कोचमाप तदनु, क्षतपांसुघोषे, घोषे, व्यतायत, भवज्जननीनिनादः ॥ ४ ॥

रोदोपकर्णनवशात्, उपगम्य गेहं, क्रन्दत्सु नन्दमुखगोपकुलेषु, दीनः ।

त्वां दानवस्तु, अखिल,मुक्तिकरं मुमुक्षुः, त्वय्यप्रमुञ्चति पपात, वियत्प्रदेशात् ॥ ५ ॥

रोदाकुलास्तदनु गोपगणाः, बहिष्ठपाषाणपृष्ठभुवि, देहं, अतिस्थविष्ठम् ।

प्रैक्षन्त हन्त निपतन्तं, अमुष्य वक्षसि, अक्षीणमेव च भवन्तं, अलं हसन्तम् ॥ ६ ॥

ग्रावप्रपातपरिपिष्टगरिष्ठदेह-,भ्रष्टासुदुष्टदनुजोपरि, धृष्टहासम् ।

आघ्नानं, अम्बुजकरेण भवन्तमेत्य, गोपा दधुः, गिरिवरादिव नीलरत्नम् ॥ ७ ॥

एकैकमाशु, परिगृह्य, निकामनन्दन्,नन्दादिगोप, परिरब्धविचुम्बिताङ्गम् ।

आदातुकाम,परिशङ्कित,गोपनारी-,हस्ताम्बुजप्रपतितं, प्रणुमो भवन्तम् ॥ ८ ॥

भूयोऽपि किन्नु कृणुमः, प्रणतार्तिहारी, गोविन्द एव, परिपालयतात्, सुतं नः ।

इत्यादि, मातरपितृप्रमुखैः, तदानीं, सम्प्रार्थितः, त्वदवनाय, विभो, त्वमेव ॥ ९ ॥

वातात्मकं, दनुजमेवं, अयि प्रधून्वन्, वातोद्भवान्, मम गदान्, किमु, नो धुनोषि ।

किं वा करोमि, पुनरपि, अनिलालयेश, निश्शेषरोगशमनं, मुहुः, अर्थये त्वाम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रिचत्वारिंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुश्चत्वारिंशं दशकम्

गूढं, वसुदेवगिरा, कर्तुं ते, निष्क्रियस्य संस्कारान् ।
हृद्गतहोरातत्वो, गर्गमुनिस्त्वत् गृहं, विभो गतवान् ॥१॥

नन्दोऽथ नन्दितात्मा, बृन्दिष्टं मानयन्, अमुं यमिनाम् ।
मन्दस्मितार्द्रमूचे, त्वत्संस्कारान्, विधातुं, उत्सुकधीः ॥२॥

यदुवंशाचार्यत्वात्, सुनिभृतं, इदमार्य कार्यं इति कथयन् ।
गर्गो निर्गतपुलकः, चक्रे तव साग्रजस्य नामानि ॥३॥

कथमस्य नाम कुर्वे, सहस्रनाम्नो हि, अनन्तनाम्नो वा ।
इति नूनं गर्गमुनिः, चक्रे, तव नाम नाम, रहसि विभो ॥४॥

कृषिधातु,णकाराभ्यां, सत्तानन्दात्मतां, किलाभिलपत् ।
जगदघकर्षित्वं वा, कथयदृषिः, कृष्णनाम, ते व्यतनोत् ॥५॥

अन्यांश्च नामभेदान्, व्याकुर्वन्, अग्रजे च रामादीन् ।
अतिमानुषानुभावं, न्यगदत्, त्वां अप्रकाशयन् पित्रे ॥६॥

स्निह्यति यः, तव पुत्रे, मुह्यति स न मायिकैः, पुनः शोकैः ।
द्रुह्यति यः, स तु नश्येत्, इत्यवदत्ते महत्वं, ऋषिवर्यः ॥७॥

जेष्यति बहुतरदैत्यान्, नेष्यति निजबन्धुलोकं, अमलपदम् ।
श्रोष्यति, सुविमलकीर्तीः, अस्येति, भवद्विभूतिं, ऋषिरूचे ॥८॥

अमुनैव, सर्वदुर्गं तरितास्थ, कृतास्थं, अत्र तिष्ठध्वम् ।
हरिरेव, इत्यनभिलपन्, इत्यादि त्वां, अवर्णयत् स मुनिः ॥९॥

गर्गेऽथ निर्गतेऽस्मिन्, नन्दितनन्दादिनन्द्यमानस्त्वम् ।
मद्गदं, उद्गतकरुणो निर्गमय, श्रीमरुत्पुराधीश ॥१०॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुश्चत्वारिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चचत्वारिंशं दशकम्

अयि सबल मुरारे, पाणिजानुप्रचारैः,

किमपि, भवनभागान्, भूषयन्तौ भवन्तौ ।

चलितचरणकञ्जौ, मञ्जुमञ्जीर,शिञ्जा

श्रवणकुतुकभाजौ, चेरतुः चारुवेगात् ॥ १ ॥

मृदु मृदु विहसन्तौ, उन्मिषद्दन्तवन्तौ,

वदनपतितकेशौ, दृश्यपादाब्जदेशौ ।

भुजगलितकरान्त,व्यालगत्कङ्कणाङ्कौ,

मतिं अहरतं उच्चैः, पश्यतां, विश्वनृणाम् ॥ २ ॥

अनुसरति जनौघे, कौतुकव्याकुलाक्षे,

किमपि कृतनिनादं, व्याहसन्तौ, द्रवन्तौ ।

वलितवदनपद्मं, पृष्ठतो दत्तदृष्टी,

किमिव, न विदधाथे, कौतुकं वासुदेव ॥ ३ ॥

द्रुतगतिषु पतन्तौ, उत्थितौ लिप्तपङ्कौ,

दिवि, मुनिभिः, अपङ्कैः, सस्मितं वन्द्यमानौ ।

द्रुतमथ, जननीभ्यां, सानुकम्पं गृहीतौ,
मुहुरपि परिरब्धौ, द्राग्युवां चुम्बितौ च ॥ ४ ॥

स्नुतकुचभरं, अङ्के धारयन्ती, भवन्तं,
तरलमति, यशोदा, स्तन्यदा धन्यधन्या ।
कपटपशुप, मध्ये मुग्धहासाङ्कुरं ते,
दशनमुकुलहृद्यं, वीक्ष्य वक्त्रं जहर्ष ॥ ५ ॥

तदनुचरणचारी दारकैस्साकं, आरान्-
निलयततिषु, खेलन्, बालचापल्य,शाली ।
भवनशुकबिडालान्, वत्सकांश्चानुधावन्,
कथमपि, कृतहासैः गोपकैः, वारितोऽभूः ॥ ६ ॥

हलधरसहितस्त्वं, यत्र यत्रोपयातः,
विवशपतितनेत्राः, तत्र तत्रैव गोप्यः ।
विगलितगृहकृत्याः, विस्मृतापत्यभृत्याः,
मुरहर, मुहुः, अत्यन्ताकुलाः, नित्यमासन् ॥ ७ ॥

प्रतिनवनवनीतं, गोपिकादत्तमिच्छन्,
कलपदं उपगायन्, कोमलं क्वापि नृत्यन् ।
सदययुवतिलोकैः अर्पितं सर्पिरश्नन्,
क्वचन नवविपक्वं, दुग्धमपि आपिबस्त्वम् ॥ ८ ॥

मम खलु बलिगेहे, याचनं जातं, आस्तां,
इह पुनः, अबलानां, अग्रतः, नैव कुर्वे ।
इति विहितमतिः किं देव, सन्त्यज्य याच्ञां,
दधिघृतं, अहरस्त्वं, चारुणा, चोरणेन ॥ ९ ॥

तव दधिघृतमोषे, घोषयोषाजनानां,
अभजत, हृदि रोषो, नावकाशं न शोकः ।
हृदयमपि मुषित्वा, हर्षसिन्धौ न्यधास्त्वं,
स, मम शमय रोगान्, वातगेहाधिनाथ ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चचत्वारिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षड्चत्वारिंशं दशकम्

अयि देव पुरा किल त्वयि, स्वयमुत्तानशये, स्तनन्धये ।
परिजृम्भणतो, व्यपावृते वदने, विश्वमचष्ट वल्लवी ॥ १ ॥

पुनरप्यथ बालकैः समं, त्वयि लीलानिरते, जगत्पते ।
फलसञ्चयवञ्चनक्रुधा, तव मृद्भोजनं, ऊचुरर्भकाः ॥ २ ॥

अयि ते, प्रलयावधौ विभो, क्षितितोयादि,समस्तभक्षिणः ।
मृदुपाशनतो, रुजा भवेत्, इति भीता, जननी, चुकोप सा ॥ ३ ॥

अयि दुर्विनयात्मक त्वया, किं, मृत्सा बत वत्स, भक्षिता ।
इति मातृगिरं, चिरं विभो, वितथां त्वं, प्रतिजज्ञिषे हसन् ॥ ४ ॥

अयि ते, सकलैर्विनिश्चिते, विमतिश्चेद्वदनं, विदार्यताम् ।
इति मातृविभर्त्सितो मुखं, विकसत्पद्मनिभं, व्यदारयः ॥ ५ ॥

अपि मृल्लवदर्शनोत्सुकां, जननीं तां बहु तर्पयन्निव ।
पृथिवीं निखिलां न केवलं, भुवनान्यप्यखिलानि, अदीदृशः ॥ ६ ॥

कुहचित्, वनमम्बुधिः क्वचित्, क्वचिदभ्रं, कुहचिद्रसातलम् ।
मनुजा दनुजाः क्वचित् सुराः, ददृशे किं न तदा त्वदानने ॥ ७ ॥

कलशाम्बुधिशायिनं पुनः, परवैकुण्ठपदाधिवासिनम् ।
स्वपुरश्च निजार्भकात्मकं, कतिधा त्वां, न ददर्श सा मुखे ॥ ८ ॥

विकसद्भुवने मुखोदरे, ननु भूयोऽपि, तथाविधाननः ।
अनया स्फुटमीक्षितो भवान्, अनवस्थां जगतां, बतातनोत् ॥ ९ ॥

धृततत्वधियं तदा क्षणं, जननीं तां प्रणयेन मोहयन् ।
स्तनमम्ब दिशेत्युपासजन्, भगवन्, अत्भुतबाल पाहि माम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये षड्चत्वारिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तचत्वारिंशं दशकम्

एकदा, दधिविमाथकारिणीं, मातरं समुपसेदिवान्, भवान् ।
स्तन्यलोलुपतया निवारयन्, अङ्कमेत्य पपिवान्, पयोधरौ ॥ १ ॥

अर्धपीतकुचकुड्मले त्वयि, स्निग्धहासमधुराननाम्बुजे ।
दुग्धमीश दहने परिस्रुतं, धर्तुमाशु, जननी जगाम ते ॥ २ ॥

सामिपीतरसभङ्गसङ्गत,क्रोधभार,परिभूतचेतसा।
मन्थदण्डमुपगृह्य पाटितं, हन्त देव, दधिभाजनं त्वया ॥ ३ ॥

उच्चलद्ध्वनितमुच्चकैस्तदा, सन्निशम्य जननी, समाद्रुता ।
त्वद्यशोविसरवद्ददर्श, सा, सद्य एव, दधि विस्तृतं क्षितौ ॥ ४ ॥

वेदमार्गपरिमार्गितं रुषा, त्वामवीक्ष्य परिमार्गयन्त्यसौ ।
सन्ददर्श सुकृतिनी, उलूखले, दीयमाननवनीतं, ओतवे ॥ ५ ॥

त्वां प्रगृह्य बत, भीतिभावना,भासुराननसरोजं, आशु सा ।
रोषरूषितमुखी, सखीपुरो, बन्धनाय, रशनामुपाददे ॥ ६ ॥

बन्धुमिच्छति यमेव सज्जनः, तं भवन्तमयि, बन्धुमिच्छती ।
सा नियुज्य रशनागुणान् बहून्, द्व्यङ्गुलोनं, अखिलं किलैक्षत ॥ ७ ॥

विस्मितोत्स्मितसखीजनेक्षितां, स्विन्नसन्नवपुषं, निरीक्ष्य ताम् ।
नित्यमुक्तवपुरपि, अहो हरे, बन्धमेव, कृपयाऽन्वमन्यथाः ॥ ८ ॥

स्थीयतां चिरं, उलूखले खल, इत्यागता भवनमेव सा यदा ।
प्रागुलूखलबिलान्तरे तदा, सर्पिरर्पितं, अदन्, अवास्थिथाः ॥ ९ ॥

यद्यपाशसुगमो विभो भवान्, संयतः किमु सपाशयाऽनया ।
एवमादि, दिविजैरभिष्टुतः, वातनाथ, परिपाहि मां गदात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तचत्वारिंशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टचत्वारिंशं दशकम्

मुदा सुरौघैस्त्वं, उदारसम्मदैः, उदीर्य दामोदर इत्यभिष्टुतः ।

मृदूदरः, स्वैरमुलूखले लगन्, अदूरतो द्वौ, ककुभौ, उदैक्षथाः ॥ १ ॥

कुबेरसूनुः, नलकूबराभिधः, परो मणिग्रीव इति प्रथां गतः ।

महेशसेवाधिगतश्रियोन्मदौ, चिरं किल, त्वद्विमुखौ, अखेलताम् ॥ २ ॥

सुरापगायां, किल तौ मदोत्कटौ, सुरापगायद्बहुयौवतावृतौ ।

विवाससौ, केलिपरौ स नारदः, भवत्पदैकप्रवणो निरैक्षत ॥ ३ ॥

भिया प्रियालोकं, उपात्तवाससं, पुरो निरीक्ष्यापि, मदान्धचेतसौ ।

इमौ, भवद्भक्त्युपशान्तिसिद्धये, मुनिर्जगौ, शान्तिं ऋते, कुतः सुखम् ॥ ४ ॥

युवां, अवाप्तौ, ककुभात्मतां चिरं, हरिं निरीक्ष्याथ, पदं स्वमाप्नुतम् ।

इतीरितौ तौ, भवदीक्षणस्पृहां, गतौ, व्रजान्ते ककुभौ, बभूवतुः ॥ ५ ॥

अतन्द्रं, इन्द्रद्रुयुगं तथाविधं, समेयुषा, मन्थरगामिना त्वया ।

तिरायितोलूखलरोधनिर्धुतौ, चिराय जीर्णौ, परिपातितौ तरू ॥ ६ ॥

अभाजि, शाखिद्वितयं यदा त्वया, तदैव, तद्गर्भतलात्, निरेयुषा ।

महात्विषा, यक्षयुगेन तत्क्षणात्, अभाजि, गोविन्द, भवानपि स्तवैः
॥ ७ ॥

इह, अन्यभक्तोऽपि, समेष्यति क्रमात्, भवन्तं, एतौ खलु रुद्रसेवकौ ।

मुनिप्रसादात्, भवदङ्घ्रिं, आगतौ, गतौ, वृणानौ खलु, भक्तिमुत्तमाम् ॥
८ ॥

ततस्तरूद्दारणदारुणारव, प्रकम्पिसम्पातिनि, गोपमण्डले ।

विलज्जितत्वज्जननीमुखेक्षिणा, व्यमोक्षि, नन्देन भवान्, विमोक्षदः ॥ ९ ॥

महीरुहोः, मध्यगतो बत, अर्भको, हरेः प्रभावात्, अपरिक्षतोऽधुना ।

इति ब्रुवाणैः, गमितो गृहं भवान्, मरुत्पुराधीश्वर, पाहि मां गदात्
॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टचत्वारिंशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनपञ्चाशं दशकम्

भवत्प्रभावाविदुरा हि गोपा:, तरुप्रपातादिकमत्र गोष्ठे ।
अहेतुमुत्पातगणं विशङ्क्य, प्रयातुमन्यत्र मनो वितेनु: ॥ १ ॥

तत्रोपनन्दाभिधगोपवर्यो, जगौ, भवत्प्रेरणयैव नूनम् ।
इत: प्रतीच्यां, विपिनं मनोज्ञं, बृन्दावनं नाम, विराजतीति ॥ २ ॥

बृहद्वनं तत् खलु नन्दमुख्या:, विधाय, गौष्ठीनमथ क्षणेन ।
त्वदन्वितत्वज्जननीनिविष्ट,गरिष्ठयानानुगता विचेलु: ॥ ३ ॥

अनोमनोज्ञध्वनिधेनुपाली,खुरप्रणादान्तरतो, वधूभि: ।
भवद्विनोदालपिताक्षराणि, प्रपीय, नाज्ञायत, मार्गदैर्घ्यम् ॥ ४ ॥

निरीक्ष्य बृन्दावनं, ईश, नन्दत्प्रसूनकुन्दप्रमुख,द्रुमौघम् ।
अमोदथा:, शाद्वलसान्द्रलक्ष्म्या, हरिन्मणीकुट्टिम,पुष्टशोभम् ॥ ५ ॥

नवाकनिर्व्यूढ,निवासभेदेषु, अशेषगोपेषु, सुखासितेषु ।
वनश्रियं, गोपकिशोरपालीविमिश्रित:, पर्यक्, अलोकथास्त्वम् ॥ ६ ॥

अरालमार्गागतनिर्मलापां, मरालकूजाकृत,नर्मलापाम् ।
निरन्तरस्मेरसरोजवक्त्रां, कलिन्दकन्यां, समलोकयस्त्वम् ॥ ७ ॥

मयूरकेकाशतलोभनीयं, मयूखमालाशबलं, मणीनाम् ।
विरिञ्चिलोकस्पृशं, उच्चशृङ्गैः, गिरिं च गोवर्धनं, ऐक्षथास्त्वम् ॥ ८ ॥

समं ततो गोपकुमारकैस्त्वं, समन्ततो यत्र, वनान्तमागाः ।
ततस्ततस्तां, कुटिलामपश्यः, कलिन्दजां, रागवतीमिवैकाम् ॥ ९ ॥

तथाविधेऽस्मिन्, विपिने पशव्ये, समुत्सुको वत्सगणप्रचारे ।
चरन् सरामोऽथ, कुमारकैस्त्वं, समीरगेहाधिप, पाहि रोगात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनपञ्चाशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चाशं दशकम्

तरलमधुकृत् वृन्दे, बृन्दावनेऽथ मनोहरे,
पशुपशिशुभिः साकं, वत्सानुपालन,लोलुपः ।
हलधरसखो देव, श्रीमन्, विचेरिथ, धारयन्,
गवलमुरलीवेत्रं, नेत्राभिराम,तनुद्युतिः ॥ १ ॥

विहितजगतीरक्षं, लक्ष्मीकराम्बुजलालितं,
दधति, चरणद्वन्द्वं, बृन्दावने, त्वयि पावने ।
किमिव न बभौ, सम्पत्सम्पूरितं, तरुवल्लरी-
सलिल,धरणीगोत्रक्षेत्रादिकं, कमलापते ॥ २ ॥

विलसदुलपे, कान्तारान्ते, समीरणशीतले,
विपुलयमुनातीरे, गोवर्धनाचल,मूर्धसु ।
ललितमुरलीनादः सञ्चारयन्, खलु वात्सकं,
क्वचन दिवसे दैत्यं, वत्साकृतिं त्वं, उदैक्षथाः ॥ ३ ॥

रभसविलसत्पुच्छं, विच्छायतोऽस्य विलोकयन्,
किमपि वलितस्कन्धं, रन्ध्रप्रतीक्षं, उदीक्षितम् ।

तमथ चरणे बिभ्रत्, विभ्रामयन्, मुहुरुच्चकैः,
कुहचन महावृक्षे, चिक्षेपिथ, क्षतजीवितम् ॥ ४ ॥

निपतति महादैत्ये, जात्या दुरात्मनि तत्क्षणं,
निपतनजवक्षुण्णक्षोणीरुह,क्षतकानने ।
दिवि परिमिलत् वृन्दाः, वृन्दारकाः कुसुमोत्करैः,
शिरसि भवतो हर्षात्, वर्षन्ति नाम, तदा हरे ॥ ५ ॥

सुरभिलतमा मूर्धनि, ऊर्ध्वं कुतः कुसुमावली,
निपतति तवेत्युक्तो बालैः, सहेलं, उदैरयः ।
झटिति, दनुजक्षेपेण, ऊर्ध्वं गतस्तरुमण्डलात्,
कुसुमनिकरः सोऽयं, नूनं समेति, शनैरिति ॥ ६ ॥

क्वचन दिवसे, भूयो भूयस्तरे, परुषातपे,
तपनतनयापाथः, पातुं गताः, भवदादयः ।
चलितगरुतं प्रेक्षामासुः, बकं खलु, विस्मृतं,
क्षितिधरगरुच्छेदे, कैलासशैलं, इवापरम् ॥ ७ ॥

पिबति सलिलं गोपव्राते, भवन्तमभिद्रुतः,
स किल निगिलन्, अग्निप्रख्यं, पुनर्द्रुतं, उद्वमन् ।
दलयितुमगात्, त्रोट्याः कोट्या, तदा तु भवान्, विभो,
खलजनभिदाचुञ्चुः, चञ्चू प्रगृह्य, ददार, तम् ॥ ८ ॥

सपदि सहजां, सन्द्रष्टुं वा, मृतां खलु पूतनां,
अनुजं, अघमपि, अग्रे गत्वा, प्रतीक्षितुं, एव वा ।
शमननिलयं याते, तस्मिन् बके, सुमनोगणे
किरति, सुमनोवृन्दं, बृन्दावनात्, गृहं, ऐयथाः ॥ ९ ॥

ललितमुरलीनादं, दूरान्निशम्य, वधूजनैः,
त्वरितं, उपगम्य, आरात्, आरूढमोदं, उदीक्षितः ।
जनित,जननीनन्दानन्दः, समीरण,मन्दिर-
प्रथितवसते, शौरे, दूरीकुरुष्व, मम आमयान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चाशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

உ

# श्रीमन्नारायणीये एकपञ्चाशं दशकम्

कदाचन, व्रजशिशुभिः समं भवान्, वनाशने, विहितमतिः प्रगेतराम् ।

समावृतो, बहुतरवत्समण्डलैः, सतेमनैः, निरगमत्, ईश जेमनैः ॥१॥

विनिर्यतस्तव चरणाम्बुजद्वयात्, उदञ्चितं, त्रिभुवनपावनं रजः ।

महर्षयः, पुलकधरैः कलेबरैः, उदूहिरे, धृतभवदीक्षणोत्सवाः ॥२॥

प्रचारयति, अविरलशाद्वले तले, पशून् विभो, भवति समं कुमारकैः ।

अघासुरो, न्यरुणत्, अघाय वर्तनी, भयानकः, सपदि शयानकाकृतिः ॥३॥

महाचलप्रतिमतनोः, गुहानिभ-प्रसारितप्रथितमुखस्य, कानने ।

मुखोदरं, विहरणकौतुकाद्गताः, कुमारकाः किमपि, विदूरगे त्वयि ॥४॥

प्रमादतः प्रविशति पन्नगोदरं, क्वथत्तनौ, पशुपकुले सवात्सके ।

विदन्निदं, त्वमपि विवेशिथ प्रभो, सुहृज्जनं विशरणं, आशु रक्षितुम् ॥५॥

गलोदरे, विपुलितवर्ष्मणा त्वया, महोरगे लुठति, निरुद्धमारुते ।

द्रुतं भवान्, विदलितकण्ठमण्डलः, विमोचयन्, पशुपपशून्, विनिर्ययौ ॥६॥

क्षणं दिवि, त्वदुपगमार्थमास्थितं, महासुरप्रभवं, अहो महो महत् ।

विनिर्गते त्वयि तु, निलीनं अञ्जसा, नभःस्थले, ननृतुः, अथो जगुः सुराः ॥७॥

सविस्मयैः, कमलभवादिभिः सुरैः, अनुद्रुतः, तदनु गतः कुमारकैः ।

दिने पुनः, तरुणदशां उपेयुषि, स्वकैर्भवान, अतनुत भोजनोत्सवम् ॥८॥

विषाणिकामपि, मुरलीं नितम्बके निवेशयन्, कबलधरः कराम्बुजे ।

प्रहासयन्, कलवचनैः कुमारकान्, बुभोजिथ, त्रिदशगणैर्मुदा नुतः ॥९॥

सुखाशनं त्विह तव, गोपमण्डले, मखाशनात् प्रियमिव, देवमण्डले ।

इति स्तुतः, त्रिदशवरैर्जगत्पते, मरुत्पुरीनिलय, गदात् प्रपाहि माम् ॥१०॥

ॐ तत्सदिति श्रीमन्नारायणीये एकपञ्चाशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्विपञ्चाशं दशकम्

अन्यावतारनिकरेषु, अनिरीक्षितं ते, भूमातिरेकं, अभिवीक्ष्य तदाघमोक्षे ।

ब्रह्मा, परीक्षितुमनाः, स परोक्षभावं निन्येऽथ, वत्सकगणान्, प्रवितत्य मायाम् ॥१॥

वत्सानवीक्ष्य विवशे, पशुपोत्करे तान्, आनेतुकाम इव, धातृमतानुवर्ती ।

त्वं सामिभुक्तकबलो, गतवान्, तदानीं, भुक्तां, तिरोऽधित, सरोजभवः कुमारान् ॥२॥

वत्सायितस्तदनु गोपगणायितस्त्वं, शिक्यादिभाण्डमुरली,गवलादिरूपः ।

प्राग्वद्विहृत्य विपिनेषु चिराय सायं, त्वं माययाऽथ बहुधा, व्रजं, आययाथ ॥३॥

त्वामेव शिक्यगवलादिमयं, दधानः, भूयस्त्वमेव, पशुवत्सकबालरूपः ।

गोरूपिणीभिरपि, गोपवधूमयीभिः, आसादितोऽसि जननीभिः, अतिप्रहर्षात् ॥४॥

जीवं हि किञ्चित्,अभिमानवशात्स्वकीयं, मत्वा तनूज इति, रागभरं वहन्त्यः ।

आत्मानमेव तु भवन्तं, अवाप्य सूनुं, प्रीतिं ययुर्न कियतीं, वनिताश्च गावः ॥५॥

एवं प्रतिक्षणविजृम्भितहर्षभार,-निश्शेषगोपगणलालित,भूरिमूर्तिम् ।

त्वां, अग्रजोऽपि बुबुधे किल वत्सरान्ते, ब्रह्मात्मनोरपि, महान् युवयोर्विशेषः ॥६॥

वर्षावधौ, नवपुरातनवत्सपालान्, दृष्ट्वा विवेकमसृणे, द्रुहिणे विमूढे ।

प्रादीदृशः प्रतिनवान्, मकुटाङ्गदादि भूषां, चतुर्भुजयुजः, सजलाम्बुदाभान् ॥७॥

प्रत्येकमेव, कमलापरिलालिताङ्गान्, भोगीन्द्रभोगशयनान्, नयनाभिरामान् ।

लीलानिमीलितदृशः, सनकादियोगि-व्यासेवितान्, कमलभूः, भवतो ददर्श ॥८॥

नारायणाकृतिं, असंख्यतमां निरीक्ष्य, सर्वत्र सेवकमपि, स्वमवेक्ष्य धाता ।

मायानिमग्नहृदयो, विमुमोह यावत्, एको बभूविथ तदा, कबलार्धपाणिः ॥९॥

नश्यन्मदे, तदनु विश्वपतिं मुहुस्त्वां, नत्वा च नूतवति, धातरि धाम याते ।

पोतैः समं, प्रमुदितैः, प्रविशन् निकेतं, वातालयाधिप, विभो, परिपाहि रोगात् ॥१०॥

ॐ तत्सदिति श्रीमन्नारायणीये द्विपञ्चाशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रिपञ्चाशं दशकम्

अतीत्य बाल्यं, जगतां पते त्वं, उपेत्य पौगण्डवयो, मनोज्ञम् ।
उपेक्ष्य वत्सावनं, उत्सवेन, प्रावर्तथाः, गोगणपालनायाम् ॥ १ ॥

उपक्रमस्य, अनुगुणैव सेयं, मरुत्पुराधीश, तव प्रवृत्तिः ।
गोत्रापरित्राणकृतेऽवतीर्णः, तदेव देव, आरभथास्तदा यत् ॥ २ ॥

कदापि, रामेण समं वनान्ते, वनश्रियं वीक्ष्य चरन्, सुखेन ।
श्रीदामनाम्नः, स्वसखस्य वाचा, मोदादगाः, धेनुककाननं त्वम् ॥ ३ ॥

उत्तालतालीनिवहे त्वदुक्त्या, बलेन धूतेऽथ, बलेन दोर्भ्याम् ।
मृदुः खरश्चाभ्यपतत्पुरस्तात्, फलोत्करो, धेनुकदानवोऽपि ॥ ४ ॥

समुद्यतो, धेनुकपालनेऽहं, कथं वधं धेनुकं, अद्य कुर्वे ।
इतीव मत्वा ध्रुवं, अग्रजेन, सुरौघयोद्धारं, अजीघनस्त्वम् ॥ ५ ॥

तदीयभृत्यानपि जम्बुकत्वेन, उपागतान्, अग्रजसंयुतस्त्वम् ।
जम्बूफलानीव, तदा निरास्थः, तालेषु खेलन्, भगवन् निरास्थः ॥ ६ ॥

विनिघ्नति त्वय्यथ, जम्बुकौघं, सनामकत्वात्, वरुणस्तदानीम् ।
भयाकुलो, जम्बुकनामधेयं, श्रुतिप्रसिद्धं, व्यधितेति मन्ये ॥ ७ ॥

तवावतारस्य फलं, मुरारे, सञ्जातमद्येति, सुरैर्नुतस्त्वम् ।
सत्यं फलं जातं, इहेति हासी, बालैः समं, तालफलानि अभुङ्क्थाः ॥ ८ ॥

मधुद्रवस्रुन्ति बृहन्ति तानि, फलानि, मेदोभरभृन्ति भुक्त्वा ।
तृप्तैश्च दृप्तैः, भवनं फलौघं, वहद्भिरागाः खलु, बालकैस्त्वम् ॥ ९ ॥

हतो हतो, धेनुक इत्युपेत्य, फलान्यदद्भि, मधुराणि लोकैः ।
जयेति जीवेति, नुतो विभो त्वं, मरुत्पुराधीश्वर, पाहि रोगात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रिपञ्चाशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतु:पञ्चाशं दशकम्

त्वत्सेवोत्कस्सौभरिर्नाम, पूर्वं, कालिन्द्यन्तः, द्वादशाब्दम्, तपस्यन् ।

मीनव्राते, स्नेहवान् भोगलोले, तार्क्ष्यं साक्षात्, ऐक्षताग्रे, कदाचित् ॥ १ ॥

त्वद्वाहं तं, सक्षुधं तृक्षसूनुं, मीनं कञ्चित्, जक्षतं लक्षयन् सः ।

तप्तश्चित्ते, शप्तवान् अत्र चेत्त्वं, जन्तून् भोक्ता, जीवितं चापि, मोक्ता ॥ २ ॥

तस्मिन् काले, कालियः, क्ष्वेलदर्पात्, सर्पारातेः कल्पितं, भागं, अश्नन् ।

तेन क्रोधात्, त्वत्पदाम्भोजभाजा, पक्षक्षिप्तः, तद्दुरापं पयोऽगात् ॥ ३ ॥

घोरे तस्मिन्, सूरजानीरवासे, तीरे वृक्षाः, विक्षताः क्ष्वेलवेगात् ।

पक्षिव्राताः, पेतुरभ्रे पतन्तः, कारुण्यार्द्रं, त्वन्मनः, तेन जातम् ॥ ४ ॥

काले तस्मिन्, एकदा सीरपाणिं, मुक्त्वा याते, यामुनं काननान्तम् ।

त्वयि, उद्दामग्रीष्मभीष्मोष्मतप्ताः, गोगोपालाः, व्यापिबन् क्ष्वेलतोयम् ॥ ५ ॥

नश्यज्जीवान्, विच्युतान् क्ष्मातले तान्, विश्वान् पश्यन्, अच्युत, त्वं दयार्द्रः ।

प्राप्योपान्तं, जीवयामासिथ द्राक्, पीयूषाम्भो,वर्षिभिः, श्रीकटाक्षैः ॥ ६ ॥

किं किं जातो, हर्षवर्षातिरेकः, सर्वाङ्गेषु, इति, उत्थिताः गोपसङ्घाः ।

दृष्ट्वाऽग्रे त्वां, त्वत्कृतं तद्विदन्तः, त्वामालिङ्गन्, दृष्ट,नानाप्रभावाः ॥ ७ ॥

गावश्चैवं, लब्धजीवाः, क्षणेन, स्फीतानन्दाः, त्वां च दृष्ट्वा, पुरस्तात् ।

द्रागावव्रुः, सर्वतो हर्षबाष्पं, व्यामुञ्चन्त्यो, मन्दमुद्यन्, निनादाः ॥ ८ ॥

रोमाञ्चोऽयं, सर्वतो नः शरीरे, भूयसी, अन्तः काचित्, आनन्दमूर्छा ।

आश्चर्योऽयं, क्ष्वेलवेगो मुकुन्देति, उक्तो गोपैः, नन्दितो वन्दितोऽभूः ॥ ९ ॥

एवं भक्तान्, मुक्तजीवानपि त्वं, मुग्धापाङ्गैः, अस्तरोगान् तनोषि ।

तादृग्भूतस्फीत,कारुण्यभूमा, रोगात् पायाः, वायुगेहाधिनाथ ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुःपञ्चाशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चपञ्चाशं दशकम्

अथ वारिणि घोरतरं फणिनं, प्रतिवारयितुं, कृतधीर्भगवन् ।
द्रुतमारिथ, तीरगनीपतरुं, विषमारुत,शोषित,पर्णचयम् ॥ १ ॥

अधिरुह्य, पदाम्बुरुहेण च तं, नवपल्लवतुल्य,मनोज्ञरुचा ।
ह्रदवारिणि, दूरतरं न्यपतः, परिघूर्णित,घोरतरङ्गगणे ॥ २ ॥

भुवनत्रय,भारभृतो भवतो, गुरुभार,विकम्पि,विजृम्भिजला ।
परिमज्जयति स्म, धनुश्शतकं, तटिनी झटिति, स्फुटघोषवती ॥ ३ ॥

अथ दिक्षु विदिक्षु, परिक्षुभित भ्रमितोदर,वारिनिनादभरैः ।
उदकात्, उदगादुरगाधिपतिः, त्वदुपान्तं, अशान्तरुषाऽन्धमनाः ॥ ४ ॥

फणशृङ्गसहस्रविनिस्सृमर, ज्वलदग्निकणोग्र,विषाम्बुधरम् ।
पुरतः फणिनं, समलोकयथाः, बहुशृङ्गिणं, अञ्जनशैलमिव ॥ ५ ॥

ज्वलदक्षि परिक्षरदुग्रविष,श्वसनोष्मभरः, स महाभुजगः ।
परिदश्य भवन्तं, अनन्तबलं, समवेष्टयत्, अस्फुटचेष्टमहो ॥ ६ ॥

अविलोक्य भवन्तं, अथाकुलिते, तटगामिनि, बालकधेनुगणे ।
व्रजगेहतलेऽप्यनिमित्तशतं, समुदीक्ष्य गता यमुनां पशुपाः ॥ ७ ॥

अखिलेषु विभो, भवदीय दशां, अवलोक्य जिहासुषु, जीवभरम् ।
फणिबन्धनं, आशु विमुच्य जवात्, उदगम्यत, हासजुषा भवता ॥ ८ ॥

अधिरुह्य ततः फणिराजफणान्, ननृते भवता, मृदुपादरुचा ।
कलशिञ्जितनूपुरमञ्जुमिलत्, करकङ्कण,सङ्कुल,सङ्क्वणितम् ॥ ९ ॥

जहृषुः पशुपास्तुतुषुर्मुनयो, ववृषुः कुसुमानि, सुरेन्द्रगणाः ।
त्वयि नृत्यति मारुतगेहपते, परिपाहि स मां त्वं, अदान्तगदात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चपञ्चाशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षट्पञ्चाशं दशकम्

रुचिरकम्पितकुण्डलमण्डल:, सुचिरमीश, ननर्तिथ पन्नगे ।
अमरताडितदुन्दुभिसुन्दरं, वियति गायति, दैवतयौवते ॥१॥

नमति यद्यदमुष्य शिरो हरे, परिविहाय, तदुन्नतमुन्नतम् ।
परिमथन् पदपङ्करुहा चिरं, व्यहरथा:, करतालमनोहरम् ॥२॥

त्वदवभग्नविभुग्नफणागणे, गलितशोणितशोणितपाथसि ।
फणिपतौ, अवसीदति सन्नता:, तदबला:, तव माधव पादयो: ॥३॥

अयि पुरैव चिराय परिश्रुत, त्वदनुभावविलीनहृदो हि ता: ।
मुनिभिरपि,अनवाप्यपथै: स्तवै:, नुनुवुरीश, भवन्तमयन्त्रितम् ॥४॥

फणिवधूगणभक्तिविलोकन,प्रविकसत्करुणाकुलचेतसा ।
फणिपतिर्भवता, अच्युत, जीवितस्त्वयि समर्पित,मूर्तिरवानमत् ॥५॥

रमणकं व्रज वारिधिमध्यगं, फणिरिपु:, न करोति विरोधिताम् ।
इति भवद्वचनान्यतिमानयन्, फणिपतिर्निरगादुरगै: समम् ॥६॥

फणिवधूजनदत्तमणिव्रज-ज्वलितहार,दुकूलविभूषितः ।
तटगतैः प्रमदाश्रुविमिश्रितैः, समगथाः, स्वजनैर्दिवसावधौ ॥७॥

निशि पुनस्तमसा, व्रजमन्दिरं, व्रजितुं, अक्षम एव जनोत्करे ।
स्वपति, तत्र भवच्चरणाश्रये, दवकृशानुः, अरुन्ध समन्ततः ॥८॥

प्रबुधितान्, अथ पालय पालयेति, उदयदार्तरवान्, पशुपालकान् ।
अवितुमाशु पपाथ महानलं, किमिह चित्रं, अयं खलु ते मुखम् ॥९॥

शिखिनि वर्णत एव हि पीतता, परिलसति, अधुना, क्रिययाऽप्यसौ ।
इति नुतः, पशुपैर्मुदितैर्विभो, हर हरे, दुरितैःसह मे गदान् ॥१०॥

ॐ तत्सदिति श्रीमन्नारायणीये षट्पञ्चाशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तपञ्चाशं दशकम्

रामसखः क्वापि दिने, कामद भगवन्, गतो भवान् विपिनम् ।
सूनुभिरपि गोपानां, धेनुभिः, अभिसंवृतो, लसद्वेषः ॥ १ ॥

सन्दर्शयन् बलाय, स्वैरं बृन्दावनश्रियं, विमलाम् ।
काण्डीरैः सह बालैः, भाण्डीरकं, आगमो वटं क्रीडन् ॥ २ ॥

तावत्तावकनिधनस्पृहयालुः, गोपमूर्तिः, अदयालुः ।
दैत्यः प्रलम्बनामा, प्रलम्बबाहुं, भवन्तमापेदे ॥ ३ ॥

जानन्नप्यविजानन्निव, तेन समं, निबद्धसौहार्दः ।
वटनिकटे, पटुपशुपव्याबद्धं, द्वन्द्वयुद्धम, आरब्धाः ॥ ४ ॥

गोपान् विभज्य तन्वन्, सङ्घं, बलभद्रकं, भवत्कमपि ।
त्वद्बलभीतं दैत्यं, त्वद्बलगतं, अन्वमन्यथा भगवन् ॥ ५ ॥

कल्पितविजेतृवहने समरे, परयूथगं, स्वदयिततरम् ।
श्रीदामानं, अधत्थाः, पराजितो, भक्तदासतां प्रथयन् ॥ ६ ॥

एवं बहुषु विभूमन्, बालेषु वहत्सु वाह्यमानेषु ।
रामविजितः प्रलम्बो, जहार तं, दूरतो भवद्भीत्या ॥ ७ ॥

त्वद्दूरं गमयन्तं तं, दृष्ट्वा हलिनि, विहितगरिमभरे ।
दैत्यः, स्वरूपमागात्, यद्रूपात्, स हि बलोऽपि, चकितोऽभूत् ॥ ८ ॥

उच्चतया दैत्यतनोः, त्वन्मुखमालोक्य दूरतो रामः ।
विगतभयो दृढमुष्ट्या, भृशदुष्टं, सपदि पिष्टवानेनम् ॥ ९ ॥

हत्वा दानववीरं, प्राप्तं बलं, आलिलिङ्गिथ प्रेम्णा ।
तावन्मिलतोर्युवयोः, शिरसि कृता, पुष्पवृष्टिः, अमरगणैः ॥ १० ॥

आलम्बो भुवनानां, प्रालम्बं निधनमेवं, आरचयन् ।
कालं विहाय, सद्यः, लोलम्बरुचे, हरे, हरेः क्लेशान् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तपञ्चाशं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टपञ्चाशं दशकम्

त्वयि विहरणलोले, बालजालैः प्रलम्बप्रमथन,सविलम्बे, धेनवः,
स्वैरचाराः ।

तृणकुतुकनिविष्टाः, दूरदूरं चरन्त्यः, किमपि विपिनं, ऐषीकाख्यं,
ईषांबभूवुः ॥१॥

अनधिगतनिदाघक्रौर्य,बृन्दावनान्तात्, बहिरिदं, उपयाताः काननं,
धेनवस्ताः ।

तव विरहविषण्णाः, ऊष्मलग्रीष्मताप,प्रसरविसरदम्भस्याकुलाः, स्तम्भं,
आपुः ॥२॥

तदनु, सह सहायैः, दूरमन्विष्य शौरे, गलितसरणि,
मुञ्जारण्य,सञ्जात,खेदम् ।

पशुकुलं, अभिवीक्ष्य, क्षिप्रम् आनेतुम्, आरात्, त्वयि गतवति ही ही,
सर्वतोऽग्निः, जजृम्भे ॥

सकलहरिति दीप्ते, घोरभाङ्कारभीमे, शिखिनि विहतमार्गाः, अर्धदग्धाः,
इवार्ताः ।

अहह, भुवनबन्धो, पाहि पाहीति, सर्वे, शरणमुपगतास्त्वां, तापहर्तारं,
एकम् ॥४॥

अलमलं, अतिभीत्या, सर्वतो मीलयध्वं, दृशमिति तव वाचा, मीलिताक्षेषु, तेषु ।

क्व नु, दवदहनोऽसौ, कुत्र मुञ्जाटवी सा, सपदि, ववृतिरे ते हन्त, भाण्डीरदेशे ॥५॥

जय जय, तव माया केयं, ईशेति तेषां, नुतिभिः, उदितहासो, बद्धनानाविलासः ।

पुनरपि विपिनान्ते प्राचरः, पाटलादि-प्रसवनिकरमात्रग्राह्य,घर्मानु,भावे ॥६॥

त्वयि विमुखमिव, उच्चैस्तापभारं वहन्तं, तव भजनवत्, अन्तः पङ्कं, उच्छोषयन्तम् ।

तव भुजवत्, उदञ्चत् भूरितेजःप्रवाहं, तपसमयं, अनैषीः, यामुनेषु स्थलेषु ॥७॥

तदनु जलदजालैः, त्वद्वपुस्तुल्यभाभिः, विकसदमल,विद्युत्पीतवासोविलासैः ।

सकलभुवनभाजां, हर्षदां वर्षवेलां, क्षितिधरकुहरेषु, स्वैरवासी, व्यनैषीः ॥८॥

कुहरतलनिविष्टं, त्वां गरिष्ठं, गिरीन्द्रः, शिखिकुल,नवकेकाकाकुभिः, स्तोत्रकारी ।

स्फुटकुटज,कदम्बस्तोमपुष्पाञ्जलिं च, प्रविदधत्, अनुभेजे, देव, गोवर्धनोऽसौ ॥९॥

अथ शरदमुपेतां तां, भवद्भक्तचेतो, विमलसलिलपूरां, मानयन् काननेषु ।

तृणं, अमलवनान्ते, चारु सञ्चारयन् गाः, पवनपुरपते त्वं, देहि मे, देहसौख्यम् ॥१०॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टपञ्चाशं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनषष्टितमं दशकम्

त्वद्वपुर्नवकलायकोमलं, प्रेमदोहनं, अशेषमोहनम् ।
ब्रह्म तत्वपरचिन्मुदात्मकं, वीक्ष्य सम्मुमुहुः, अन्वहं स्त्रियः ॥ १ ॥

मन्मथोन्मथितमानसाः क्रमात्, त्वद्विलोकनरताः, ततस्ततः ।
गोपिकास्तव, न सेहिरे, हरे, काननोपगतिमपि, अहर्मुखे ॥ २ ॥

निर्गते भवति, दत्तदृष्टयः, त्वद्गतेन मनसा, मृगेक्षणाः ।
वेणुनादमुपकर्ण्य दूरतः, त्वद्विलासकथयाऽभिरेमिरे ॥ ३ ॥

काननान्तं, इतवान् भवानपि, स्निग्धपादपतले मनोरमे ।
व्यत्ययाकलितपादमास्थितः, प्रत्यपूरयत, वेणुनालिकाम् ॥ ४ ॥

मारबाणधृतखेचरीकुलं, निर्विकारपशुपक्षिमण्डलम् ।
द्रावणं च दृषदामपि, प्रभो, तावकं व्यजनि, वेणुकूजितम् ॥ ५ ॥

वेणुरन्ध्रतरलाङ्गुलीदलं, तालसञ्चलितपादपल्लवम् ।
तत् स्थितं, तव परोक्षमप्यहो, संविचिन्त्य, मुमुहुर्व्रजाङ्गनाः ॥ ६ ॥

निर्विशङ्कभवदङ्गदर्शिनीः, खेचरीः खगमृगान्, पशूनपि ।
त्वत्पदप्रणयि काननं च ताः, धन्यधन्यमिति, नन्वमानयन् ॥ ७ ॥

आपिबेयं, अधरामृतं कदा, वेणुभुक्तरसशेषमेकदा ।
दूरतो बत कृतं दुराशयेति, आकुला मुहुरिमाः समामुहन् ॥ ८ ॥

प्रत्यहं च, पुनरित्थमङ्गनाः, चित्तयोनिजनितात्, अनुग्रहात् ।
बद्धरागविवशास्त्वयि, प्रभो, नित्यमापुरिह, कृत्यमूढताम् ॥ ९ ॥

रागस्तावत्, जायते हि स्वभावात्,
मोक्षोपायो, यत्नतः, स्यात्, न वा स्यात् ।
तासां त्वेकं, तत्, द्वयं, लब्धमासीत्,
भाग्यं भाग्यं, पाहि, मां मारुतेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनषष्टितमं दशकं समाप्तम् ।
श्री हरये नमः । रमा रमण गोविन्द, गोविन्द । श्रीकृष्णार्पणमस्तु ।

# श्रीमन्नारायणीये षष्टितमं दशकम्

मदनातुरचेतसोऽन्वहं, भवदङ्घ्रिद्वयदास्यकाम्यया ।
यमुनातटसीम्नि सैकतीं, तरलाक्ष्यो गिरिजां, समार्चिचन् ॥ १ ॥

तव नामकथारताः समं, सुदृशः प्रातरुपागता नदीम् ।
उपहारशतैः, अपूजयन्, दयितो नन्दसुतो, भवेदिति ॥ २ ॥

इति मासं, उपाहितव्रताः, तरलाक्षीः, अभिवीक्ष्य ता भवान् ।
करुणामृदुलो नदीतटं, समयासीत्, तदनुग्रहेच्छया ॥ ३ ॥

नियमावसितौ निजाम्बरं, तटसीमन्यवमुच्य तास्तदा ।
यमुनाजलखेलनाकुलाः, पुरतस्त्वां, अवलोक्य लज्जिताः ॥ ४ ॥

त्रपया, नमिताननास्वथो, वनितास्वम्बरजालमन्तिके ।
निहितं परिगृह्य भूरुहो विटपं त्वं, तरसाऽधिरूढवान् ॥ ५ ॥

इह तावत्, उपेत्य नीयतां वसनं वः सुदृशो, यथायथम् ।
इति नर्ममृदुस्मिते त्वयि ब्रुवति, व्यामुमुहे वधूजनैः ॥ ६ ॥

अयि जीव चिरं, किशोर, नस्तव दासीः, अवशीकरोषि किम् ।
प्रदिशाम्बरं, अम्बुजेक्षणेति, उदितस्त्वं, स्मितमेव दत्तवान् ॥ ७ ॥

अधिरुह्य तटं, कृताञ्जलीः, परिशुद्धाः, स्वगतीर्निरीक्ष्य ताः ।
वसनान्यखिलान्यनुग्रहं, पुनरेवं गिरमप्यदा, मुदा ॥ ८ ॥

विदितं ननु वो, मनीषितं, वदितारस्त्विह योग्यमुत्तरम् ।
यमुनापुलिने, सचन्द्रिकाः, क्षणदाः, इत्यबलास्त्वमूचिवान् ॥ ९ ॥

उपकर्ण्य, भवन्मुखच्युतं, मधुनिष्यन्दि वचो मृगीदृशः ।
प्रणयादयि, वीक्ष्य वीक्ष्य ते वदनाब्जं, शनकैः, गृहं गताः ॥ १० ॥

इति नन्वनुगृह्य वल्लवीः, विपिनान्तेषु पुरेव सञ्चरन् ।
करुणाशिशिरो, हरे, हर त्वरया मे, सकलामयावलिम् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये षष्टितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकषष्टितमं दशकम्

ततश्च बृन्दावनतोऽतिदूरतः, वनं गतस्त्वं खलु, गोपगोकुलैः ।

हृदन्तरे, भक्ततरद्विजाङ्गनाः, कदम्बकानुग्रहणाग्रहं, वहन् ॥ १ ॥

ततो निरीक्ष्य, अशरणे वनान्तरे, किशोरलोकं, क्षुधितं तृषाकुलम् ।

अदूरतो, यज्ञपरान् द्विजान् प्रति, व्यसर्जयो, दीदिवियाचनाय तान् ॥ २ ॥

गतेष्वथो तेषु, अभिधाय तेऽभिधां, कुमारकेषु, ओदनयाचिषु प्रभो ।

श्रुतिस्थिरा अपि, अभिनिन्युः, अश्रुतिं, न किञ्चिदूचुश्च, महीसुरोत्तमाः ॥ ३ ॥

अनादरात् खिन्नधियो हि बालकाः, समाययुः, युक्तमिदं हि यज्वसु ।

चिरात्, अभक्ताः खलु ते महीसुराः, कथं हि भक्तं, त्वयि तैः समर्प्यते ॥ ४ ॥

निवेदयध्वं, गृहिणीजनाय मां, दिशेयुरन्नं, करुणाकुला इमाः ।

इति स्मितार्द्रं, भवतेरिता गताः, ते दारकाः, दारजनं ययाचिरे ॥ ५ ॥

गृहीतनाम्नि त्वयि, सम्भ्रमाकुलाः, चतुर्विधं भोज्यरसं, प्रगृह्य ताः ।

चिरं, धृतत्वत्प्रविलोकनाग्रहाः, स्वकैर्निरुद्धा अपि, तूर्णमाययुः ॥ ६ ॥

विलोलपिञ्छं चिकुरे, कपोलयोः समुल्लसत्कुण्डलं, आर्द्रमीक्षिते ।

निधाय बाहुं, सुहृदंससीमनि, स्थितं भवन्तं, समलोकयन्त ताः ॥ ७ ॥

तदा च काचित्, त्वदुपागमोद्यता, गृहीतहस्ता, दयितेन यज्वना ।

तदेव सञ्चिन्त्य भवन्तं, अञ्जसा, विवेश कैवल्यं, अहो कृतिन्यसौ ॥ ८ ॥

आदाय भोज्यानि, अनुगृह्य ताः पुनः, त्वदङ्गसङ्गस्पृहया, उज्झतीर्गृहम् ।

विलोक्य यज्ञाय विसर्जयन्, इमाः, चकर्थ, भर्तॄनपि, तासु, अगर्हणान् ॥ ९ ॥

निरूप्य दोषं निजं, अङ्गनाजने विलोक्य भक्तिं च, पुनर्विचारिभिः ।

प्रबुद्धतत्त्वैस्त्वं, अभिष्टुतो द्विजैः, मरुत्पुराधीश, निरुन्धि मे गदान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकषष्टितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्विषष्टितमं दशकम्

कदाचिद्गोपालान्, विहितमखसम्भार,विभवान्,

निरीक्ष्य त्वं शौरे, मघवमदं, उद्ध्वंसितुमनाः ।

विजानन्नप्येतान्, विनयमृदु, नन्दादिपशुपान्,

अपृच्छः, को वाऽयं जनक, भवतां, उद्यम इति ॥ १ ॥

बभाषे नन्दस्त्वां, सुत, ननु विधेयो, मघवतो

मखो, वर्षे वर्षे, सुखयति, स वर्षेण पृथिवीम् ।

नृणां वर्षायत्तं, निखिलमुपजीव्यं महितले,

विशेषात्, अस्माकं, तृणसलिलजीवा हि, पशवः ॥ २ ॥

इति श्रुत्वा वाचं पितुः, अयि भवान्, आह सरसं,

धिगेतत्, नो सत्यं, मघवजनिता, वृष्टिरिति यत् ।

अदृष्टं जीवानां, सृजति खलु वृष्टिं, समुचितां,

महारण्ये, वृक्षाः, किमिव बलिं, इन्द्राय ददते ॥ ३ ॥

इदं तावत् सत्यं, यदिह पशवो नः कुलधनं,

तदाजीव्याय, असौ बलिः, अचलभर्त्रे, समुचितः ।

सुरेभ्योपि, उत्कृष्टाः, ननु, धरणिदेवाः, क्षितितले,

ततः, तेपि, आराध्याः, इति जगदिथ, त्वं निजजनान् ॥ ४ ॥

भवद्वाचं श्रुत्वा, बहुमतियुतास्तेऽपि, पशुपाः,

द्विजेन्द्रान्, अर्चन्तो, बलिं अददुः, उच्चैः, क्षितिभृते ।

व्यधुः प्रादक्षिण्यं, सुभृशमनमन्, आदरयुताः,

त्वमादश्शैलात्मा, बलिमखिलं, आभीर,पुरतः ॥ ५ ॥

अवोचश्चैवं तान्, किमिह, वितथं मे निगदितं,

गिरीन्द्रो नन्वेषः, स्वबलिं, उपभुङ्क्ते, स्ववपुषा ।

अयं गोत्रो, गोत्रद्विषि च कुपिते, रक्षितुं, अलं

समस्तान्, इत्युक्ताः, जहृषुः, अखिलाः, गोकुलजुषः ॥ ६ ॥

परिप्रीता याताः खलु, भवदुपेताः, व्रजजुषः,

व्रजं यावत्तावत्, निजमख,विभङ्गं निशमयन् ।

भवन्तं जानन्नपि, अधिकरजसाऽऽक्रान्तहृदयः,

न सेहे, देवेन्द्रः, त्वदुप,रचितात्मोन्नतिरपि ॥ ७ ॥

मनुष्यत्वं यातो, मधुभिदपि, देवेष्वविनयं,
विधत्ते चेत्, नष्टस्त्रिदशसदसां, कोऽपि महिमा ।
ततश्च ध्वंसिष्ये, पशुपहतकस्य श्रियमिति,
प्रवृत्तस्त्वां जेतुं, स किल मघवा, दुर्मदनिधिः ॥ ८ ॥

त्वदावासं हन्तुं, प्रलयजलदान्, अम्बरभुवि,
प्रहिण्वन्, बिभ्राणः  कुलिशं, अयमभ्रेभगमनः ।
प्रतस्थे, अन्यैः, अन्तर्दहनमरुदाद्यैर्विहसितः,
भवन्माया नैव, त्रिभुवनपते, मोहयति कम् ॥ ९ ॥

सुरेन्द्रः, क्रुद्धश्चेत्, द्विजकरुणया, शैलकृपयापि,
अनातङ्कः, अस्माकं नियतः, इति, विश्वास्य, पशुपान् ।
अहो किन्नायातो, गिरिभिदिति, सञ्चिन्त्य निवसान्,
मरुद्गेहाधीश, प्रणुद, मुरवैरिन्, मम गदान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये द्विषष्टितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रिषष्टितमं दशकम्

ददृशिरे किल तत्क्षणं, अक्षत,स्तनितजृम्भितकम्पितदिक्तटा: ।

सुषमया, भवदङ्गतुलां गता:, व्रजपदोपरि वारिधरास्त्वया ॥ १ ॥

विपुलकरकमिश्रै:, तोयधारानिपातै:, दिशिदिशि पशुपानां, मण्डले, दण्ड्यमाने ।

कुपितहरिकृतात्, न:, पाहि पाहीति, तेषां वचनं, अजित, श्रृण्वन्, मा बिभीत, इत्यभाणी: ॥

कुल इह खलु, गोत्रो दैवतं, गोत्रशत्रोर्विहितमिह, स रुन्ध्यात्, को नु व:, संशयोऽस्मिन् ।

इति, सहसितवादी, देव, गोवर्द्धनाद्रिं, त्वरितं, उदमुमूलो, मूलतो, बालदोर्भ्याम् ॥ ३ ॥

तदनु, गिरिवरस्य, प्रोद्धृतस्यास्य तावत्, सिकतिलमृदुदेशे, दूरतो, वारितापे ।

परिकरपरिमिश्रान्, धेनुगोपान्, अधस्तात्, उपनिदधत्, अधत्था:, हस्तपद्मेन, शैलम् ॥ ४ ॥

भवति विधृतशैले, बालिकाभिर्वयस्यै:, अपि विहितविलासं, केलिलापादि,लोले ।

सविधमिलितधेनू:, एकहस्तेन कण्डूयति सति, पशुपाला:, तोषमैषन्त सर्वे ॥ ५ ॥

अतिमहान्, गिरिरेष तु वामके, करसरोरुहि तं, धरते चिरम् ।
किमिदं, अद्भुतं, अद्रिबलं न्विति, त्वदवलोकिभिः, आकथि गोपकैः ॥ ६ ॥

अहह धाष्ट्यँ, अमुष्य वटोः, गिरिं, व्यथितबाहुः, असौ अवरोपयेत् ।
इति हरिः, त्वयि बद्धविगर्हणः, दिवससप्तकं,उग्रमवर्षयत् ॥ ७ ॥

अचलति, त्वयि देव पदात् पदं, गलितसर्वजले च, घनोत्करे ।
अपहृते मरुता, मरुतां पतिः, त्वदभिशङ्कितधीः, समुपाद्रवत् ॥ ८ ॥

शममुपेयुषि वर्षभरे, तदा, पशुपधेनुकुले च, विनिर्गते ।
भुवि विभो, समुपाहितभूधरः, प्रमुदितैः, पशुपैः परिरेभिषे ॥ ९ ॥

धरणिमेव पुरा, धृतवानसि, क्षितिधरोद्धरणे, तव कः श्रमः ।
इति नुतस्त्रिदशैः कमलापते, गुरुपुरालय, पालय मां गदात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रिषष्टितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुष्षष्टितमं दशकम्

आलोक्य शैलोद्धरणादिरूपं, प्रभावं, उच्चैस्तव गोपलोकाः ।
विश्वेश्वरं त्वां, अभिमत्य विश्वे, नन्दं, भवज्जातकम्, अन्वपृच्छन् ॥ १ ॥

गर्गोदितो, निर्गदितो निजाय वर्गाय तातेन, तव प्रभावः ।
पूर्वाधिकस्त्वयि, अनुराग एषाम्, ऐधिष्ट तावत्, बहुमानभारः ॥ २ ॥

ततोऽवमानोदित,तत्त्वबोधः, सुराधिराजः, सह दिव्यगव्या।
उपेत्य तुष्टाव, स नष्टगर्वः, स्पृष्ट्वा पदाब्जं, मणिमौलिना ते ॥ ३ ॥

स्नेहस्नुतैस्त्वां, सुरभिः पयोभिः, गोविन्दनामाङ्कितं, अभ्यषिञ्चत् ।
ऐरावतोपाहृत,दिव्यगङ्गापाथोभिः, इन्द्रोऽपि च, जातहर्षः ॥ ४ ॥

जगत्त्रयीशे त्वयि, गोकुलेशे, तथाऽभिषिक्ते सति, गोपवाटः ।
नाकेऽपि, वैकुण्ठपदेऽपि, अलभ्यां श्रियं प्रपेदे, भवतः प्रभावात् ॥ ५ ॥

कदाचित्, अन्तर्यमुनं प्रभाते, स्नायन् पिता, वारुणपूरुषेण ।
नीतस्त्वं, आनेतुमगाः पुरीं त्वं, तां वारुणीं, कारणमर्त्यरूपः ॥ ६ ॥

ससम्भ्रमं, तेन जलाधिपेन, प्रपूजितस्त्वं, प्रतिगृह्य तातम् ।

उपागतः, तत्क्षणमात्मगेहं, पिताऽवदत्, तच्चरितं निजेभ्यः ॥ ७ ॥

हरिं विनिश्चित्य, भवन्तमेतान्, भवत्पदालोकनबद्धतृष्णान् ॥

निरीक्ष्य, विष्णो परमं पदं तत्, दुरापमन्यैः, त्वं, अदीदृशस्तान् ॥ ८ ॥

स्फुरत्परानन्दरसप्रवाह,प्रपूर्णकैवल्य,महापयोधौ ।

चिरं निमग्नाः खलु, गोपसङ्घाः, त्वयैव भूमन्, पुनरुद्धृतास्ते ॥ ९ ॥

करबदरवदेवं देव, कुत्रावतारे, निजपदमनवाप्यं, दर्शितं भक्तिभाजाम् ।

तदिह, पशुपरूपी, त्वं हि साक्षात् परात्मा, पवनपुरनिवासिन्, पाहि मां आमयेभ्यः ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुष्षष्टितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चषष्टितमं दशकम्

गोपीजनाय कथितं, नियमावसाने, मारोत्सवं त्वमथ, साधयितुं प्रवृत्तः ।

सान्द्रेण चान्द्रमहसा, शिशिरीकृताशे, प्रापूरयो मुरलिकां, यमुनावनान्ते ॥ १ ॥

सम्मूर्छनाभिः, उदितस्वरमण्डलाभिः, सम्मूर्छयन्तमखिलं, भुवनान्तरालम् ।

त्वद्वेणुनादमुपकर्ण्य, विभो तरुण्यः, तत्तादृशं कमपि, चित्तविमोहमापुः ॥ २ ॥

ताः, गेहकृत्यनिरताः, तनयप्रसक्ताः, कान्तोपसेवनपराश्च, सरोरुहाक्ष्यः ।

सर्वं विसृज्य, मुरलीरवमोहितास्ते, कान्तारदेशं, अयि, कान्ततनो समेताः ॥३॥

काश्चिन्निजाङ्गपरिभूषणं, आदधानाः, वेणुप्रणादमुपकर्ण्य, कृतार्धभूषाः ।

त्वामागता ननु, तथैव, विभूषिताभ्यः, ता एव, संरुरुचिरे, तव लोचनाय ॥४॥

हारं नितम्बभुवि, काचन धारयन्ती, काञ्चीं च कण्ठभुवि देव, समागता त्वाम् ।

हारित्वं, आत्मजघनस्य मुकुन्द, तुभ्यं, व्यक्तं बभाष इव, मुग्धमुखी विशेषात् ॥५॥

काचित्, कुचे पुनः, असज्जितकञ्चुलीका, व्यामोहतः, परवधूभिः, अलक्ष्यमाणा ।

त्वामाययौ, निरुपमप्रणयातिभार-,राज्याभिषेकविधये, कलशीधरेव ॥६॥

काश्चित्, गृहात् किल निरेतुं, अपारयन्त्यः, त्वामेव देव, हृदये, सुदृढं विभाव्य ।

देहं विधूय, परचित्सुखरूपमेकं, त्वामाविशन्, परमिमाः, ननु, धन्यधन्याः ॥७॥

जारात्मना, न परमात्मतया स्मरन्त्यः, नार्यो गताः, परमहंसगतिं क्षणेन ।

तं त्वां, प्रकाशपरमात्मतनुं कथञ्चित्, चित्ते वहन्, अमृतं, अश्रमं, अश्नुवीय ॥८॥

अभ्यागताभिः, अभितो व्रजसुन्दरीभिः, मुग्धस्मितार्द्रवदनः, करुणावलोकी ।

निस्सीमकान्तिजलधिः, त्वमवेक्ष्यमाणः, विश्वैकहृद्य, हर मे, पवनेश रोगान् ॥९॥

ॐ तत्सदिति श्रीमन्नारायणीये  पञ्चषष्टितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षड्षष्टितमं दशकम्

उपयातानां सुदृशां, कुसुमायुधबाणपात, विवशानाम् ।
अभिवाञ्छितं विधातुं, कृतमतिरपि ताः, जगाथ वाममिव ॥ १ ॥

गगनगतं मुनिनिवहं, श्रावयितुं जगिथ, कुलवधूधर्मम् ।
धर्म्यं खलु ते वचनं, कर्म तु नो निर्मलस्य विश्वास्यम् ॥ २ ॥

आकर्ण्य, ते प्रतीपां वाणीं, एणीदृशः परं दीनाः ।
मा मा करुणासिन्धो परित्यज, इत्यतिचिरं विलेपुस्ताः ॥ ३ ॥

तासां रुदितैर्लपितैः, करुणाकुलमानसो, मुरारे त्वम् ।
ताभिस्समं प्रवृत्तो, यमुनापुलिनेषु, काममभिरन्तुम् ॥ ४ ॥

चन्द्रकरस्यन्दलसत्सुन्दरयमुना,तटान्तवीथीषु ।
गोपीजनोत्तरीयैः,आपादितसंस्तरे, न्यषीदस्त्वम् ॥ ५ ॥

सुमधुरनर्मालपनैः, करसंग्रहणैश्च चुम्बनोल्लासैः ।
गाढालिङ्गनसङ्गैः, त्वमङ्गनालोकं, आकुलीचकृषे ॥ ६ ॥

वासोहरणदिने, यद्वासोहरणं प्रतिश्रुतं तासाम् ।
तदपि विभो, रसविवशस्वान्तानां, कान्त, सुभ्रुवामदधाः ॥ ७ ॥

कन्दलितघर्मलेशं, कुन्दमृदुस्मेरवक्त्रपाथोजम् ।
नन्दसुत, त्वां त्रिजगत्सुन्दरं, उपगूह्य, नन्दिता बालाः ॥ ८ ॥

विरहेष्वङ्गारमयः, शृङ्गारमयश्च सङ्गमे हि त्वम् ।
नितरां, अङ्गारमयः, तत्र पुनस्सङ्गमेऽपि चित्रमिदम् ॥ ९ ॥

राधातुङ्गपयोधर,साधुपरीरम्भलोलुपात्मानम् ।
आराधये भवन्तं, पवनपुराधीश, शमय, सकलगदान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये षड्षष्टितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तषष्टितमं दशकम्

स्फुरत्परानन्दरसात्मकेन, त्वया, समासादितभोगलीलाः ।
असीमं, आनन्दभरं प्रपन्नाः, महान्तमापुः, मदमम्बुजाक्ष्यः ॥ १ ॥

निलीयतेऽसौ मयि, मय्यमायं, रमापतिः, विश्वमनोभिरामः ।
इति स्म सर्वाः, कलिताभिमानाः, निरीक्ष्य गोविन्द, तिरोहितोऽभूः ॥ २ ॥

राधाभिधां तावत्, अजातगर्वां, अतिप्रियां, गोपवधूं मुरारे ।
भवानुपादाय, गतो विदूरं, तया सह, स्वैरविहारकारी ॥ ३ ॥

तिरोहितेऽथ त्वयि, जाततापाः, समं समेताः कमलायताक्ष्यः ।
वने वने त्वां, परिमार्गयन्त्यः, विषादमापुः,भगवन्, अपारम् ॥ ४ ॥

हा चूत, हा चम्पक, कर्णिकार, हा मल्लिके, मालति, वालवल्यः ।
किं वीक्षितो, नो हृदयैकचोरः, इत्यादि ताः, त्वत्प्रवणाः, विलेपुः ॥ ५ ॥

निरीक्षितोऽयं, सखि पङ्कजाक्षः, पुरो ममेति, आकुलमालपन्ती ।
त्वां, भावनाचक्षुषि, वीक्ष्य काचित्, तापं सखीनां, द्विगुणीचकार ॥ ६ ॥

त्वदात्मिकास्ता:, यमुनातटान्ते, तवानुचक्रु: किल चेष्टितानि ।
विचित्य भूयोऽपि, तथैव मानात्, त्वया वियुक्तां, ददृशुश्च राधाम् ॥ ७ ॥

तत: समं ता:, विपिने समन्तात्, तमोवतारावधि, मार्गयन्त्य: ।
पुनर्विमिश्रा:, यमुनातटान्ते, भृशं विलेपुश्च, जगुर्गुणांस्ते ॥ ८ ॥

तथा व्यथासङ्कुलमानसानां, व्रजाङ्गनानां, करुणैकसिन्धो ।
जगत्त्रयीमोहनमोहनात्मा, त्वं प्रादुरासी:, अयि मन्दहासी ॥ ९ ॥

सन्दिग्धसन्दर्शनं, आत्मकान्तं, त्वां वीक्ष्य तन्व्य:, सहसा तदानीम् ।
किं किं न चक्रु:, प्रमदातिभारात्, स त्वं गदात्, पालय मारुतेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तषष्टितमं दशकं समाप्तम् |
श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टषष्टितमं दशकम्

तव विलोकनात्, कृष्ण! गोपिकाजना:, प्रमदसङ्कुला: कृष्ण!, पङ्कजेक्षण ।

अमृतधारया, कृष्ण! संप्लुता इव, स्तिमिततां दधु:, कृष्ण! त्वत्पुरोगता: ॥ १ ॥

तदनु काचन कृष्ण! त्वत्कराम्बुजं, सपदि गृह्णती, कृष्ण! निर्विशङ्कितम् ।

घनपयोधरे, कृष्ण! सन्निधाय सा, पुलकसंवृता, कृष्ण! तस्थुषी चिरम् ॥ २ ॥

तव विभोऽपरा, कृष्ण! कोमलं भुजं, निजगलान्तरे, कृष्ण! पर्यवेष्टयत् ।

गलसमुद्गतं, कृष्ण! प्राणमारुतं, प्रतिनिरुन्धतीव, कृष्ण! अतिहर्षुला ॥ ३ ॥

अपगतत्रपा कापि कामिनी, तव मुखाम्बुजात्, कृष्ण! पूगचर्वितम् ।

प्रतिगृहय्य, तद्वक्त्रपङ्कजे, निदधती गता, कृष्ण!  पूर्णकामताम् ॥ ४ ॥

विकरुणो वने कृष्ण! संविहाय मां, अपगतोऽसि का, कृष्ण! त्वामिह स्पृशेत् ।

इति सरोषया, कृष्ण! तल्पदेकया, सजललोचनं, कृष्ण! वीक्षितो भवान् ॥ ५ ॥

इति मुदाऽऽकुलैः कृष्ण! वल्लवीजनैः, सममुपागतो, यामुने तटे ।

मृदुकुचाम्बरैः कृष्ण! कल्पितासने, घुसृणभासुरे, कृष्ण! पर्यशोभथाः ॥ ६ ॥

कतिविधा कृपा, कृष्ण! केऽपि सर्वतो, धृतदयोदयाः कृष्ण! केचिदाश्रिते ।

कतिचित्, ईदृशा कृष्ण! मादृशेष्वपीति, अभिहितो भवान्, कृष्ण! वल्लवीजनैः ॥ ७ ॥

अयि कुमारिकाः कृष्ण! नैव शङ्क्यतां, कठिनता मयि कृष्ण! प्रेमकातरे ।

मयि तु चेतसो, वोऽनुवृत्तये, कृतमिदं मयेत्यूचिवान् भवान् ॥ ८ ॥

अयि निशम्यतां, कृष्ण! जीववल्लभाः, प्रियतमो जनो, नेदृशो मम ।

तदिह रम्यतां, कृष्ण! रम्ययामिनीषु, अनुपरोधमिति, कृष्ण! आलपो विभो ॥ ९ ॥

इति गिराधिकं, कृष्ण! मोदमीदुरैः, व्रजवधूजनैः कृष्ण! साकमारमन् ।

कलितकौतुको, रासखेलने, गुरुपुरीपते, पाहि मां गदात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टषष्टितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनसप्ततितमं दशकम्

केशपाशधृत,पिञ्छिकावितति,सञ्चलन्मकरकुण्डलं,
हारजाल,वनमालिकाललितं, अङ्गरागघनसौरभम् ।
पीतचेलधृतकाञ्चिकाञ्चितं, उदञ्चदंशुमणिनूपुरं
रासकेलिपरिभूषितं, तव हि रूपमीश, कलयामहे ॥ १ ॥

तावदेव कृतमण्डने, कलित,कञ्चुलीककुचमण्डले,
गण्डलोलमणिकुण्डले, युवतिमण्डलेऽथ, परिमण्डले ।
अन्तरा सकलसुन्दरीयुगलं, इन्दिरारमण, सञ्चरन्,
मञ्जुलां तदनु, रासकेलि, मयि कञ्जनाभ, समुपादधाः ॥ २ ॥

वासुदेव, तव भासमानमिह, रासकेलिरससौरभं,
दूरतोऽपि खलु, नारदागदितं, आकलय्य, कुतुकाकुला ।
वेषभूषण,विलासपेशल,विलासिनीशतसमावृता,
नाकतो युगपदागता, वियति वेगतोऽथ, सुरमण्डली ॥ ३ ॥

वेणुनादकृततानदानकलगानराग,गतियोजना,
लोभनीय,मृदुपादपातकृततालमेलनमनोहरम् ।
पाणिसंक्वणितकङ्कणं च, मुहुरंसलम्बितकराम्बुजं,
श्रोणिबिम्बचलदम्बरं भजत, रासकेलिरसडम्बरम् ॥ ४ ॥

श्रद्धया, विरचितानुगानकृततारतार,मधुरस्वरे,
नर्तनेऽथ, ललिताङ्गहार,लुलिताङ्गहार,मणिभूषणे ।
सम्मदेन कृतपुष्पवर्षं,अलमुन्मिषद्दिविषदां कुलं,
चिन्मये त्वयि, निलीयमानमिव, सम्मुमोह, सवधूकुलम् ॥ ५ ॥

स्विन्नसन्नतनुवल्लरी तदनु, कापि नाम, पशुपाङ्गना,
कान्तं, अंसं, अवलम्बते स्म, भृश तान्तिभारमुकुलेक्षणा ॥
काचिदाचलितकुन्तला, नवपटीरसारघनसौरभं,
वञ्चनेन तव सञ्चुचुम्ब भुजं, अञ्चितोरुपुलकाङ्कुरम् ॥ ६ ॥

कापि गण्डभुवि, सन्निधाय निजगण्डमाकुलितकुण्डलं,
पुण्यपूरनिधिः, अन्ववाप, तव पूगचर्वितरसामृतम् ।
इन्दिराविहृतिमन्दिरं, भुवनसुन्दरं हि नटनान्तरे,
त्वामवाप्य दधुरङ्गनाः किमु, न सम्मदोन्मद,दशान्तरम् ॥ ७ ॥

गानमीश विरतं क्रमेण किल, वाद्यमेलनमुपारतं,
ब्रह्मसम्मदरसाकुलाः सदसि, केवलं ननृतुरङ्गनाः ।
नाविदन्नपि च नीविकां, किमपि कुन्तलीमपि च, कञ्चुलीं,
ज्योतिषामपि कदम्बकं, दिवि विलम्बितं, किमपरं ब्रुवे ॥ ८ ॥

मोदसीम्नि भुवनं विलाप्य, विहृतिं समाप्य च ततो विभो,
केलिसम्मृदित,निर्मलाङ्गनव,घर्मलेश,सुभगात्मनाम् ।
मन्मथासहनचेतसां, पशुपयोषितां सुकृतचोदितः,
तावदाकलितमूर्तिरादधिथ, मारवीरपरमोत्सवान् ॥ ९ ॥

केलिभेदपरिलोलिताभिः,अतिलालिताभिः,अबलालिभिः,
स्वैरमीश ननु, सूरजापयसि, चारुनाम, विहृतिं व्यधाः ।
काननेऽपि च विसारिशीतल,किशोरमारुतमनोहरे,
सूनसौरभं, अये विलेसिथ, विलासिनीशतविमोहनम् ॥ १० ॥

कामिनीरिति हि, यामिनीषु खलु, कामनीयकनिधे भवान्,
पूर्णसम्मदरसार्णवं, कमपि, योगिगम्यमनुभावयन् ।
ब्रह्मशङ्करमुखानपीह, पशुपाङ्गनासु बहुमानयन्,
भक्तलोकगमनीयरूप, कमनीय कृष्ण, परिपाहि माम् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनसप्ततितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्ततितमं दशकम्

इति त्वयि रसाकुलं, रमितवल्लभे वल्लवाः,
कदापि पुरं, अम्बिकाकमितुः, अम्बिकाकानने ।
समेत्य भवता समं, निशि निषेव्य दिव्योत्सवं,
सुखं सुषुपुः, अग्रसीद्व्रजपं, उग्रनागस्तदा ॥ १ ॥

समुन्मुखमथोल्मुकैः, अभिहतेऽपि तस्मिन् बलात्,
अमुञ्चति, भवत्पदे, न्यपति, पाहि पाहीति, तैः ।
तदा खलु पदा भवान्, समुपगम्य पस्पर्श तं,
बभौ स च निजां तनुं, समुपसाद्य वैद्याधरीम् ॥ २ ॥

सुदर्शनधर प्रभो, ननु, सुदर्शनाख्योऽस्म्यहं,
मुनीन् क्वचिदपाहसं, त इह मां व्यधुः, वाहसम् ।
भवत्पदसमर्पणात्, अमलतां गतोऽस्मीत्यसौ,
स्तुवन् निजपदं ययौ, व्रजपदं च गोपा मुदा ॥ ३ ॥

कदापि खलु सीरिणा विहरति त्वयि, स्त्रीजनैः,
जहार धनदानुगः, स किल शङ्खचूडोऽबलाः ।

अतिद्रुतमनुद्रुतः, तमथ मुक्तनारीजनं,
रुरोजिथ, शिरोमणिं, हलभृते च, तस्याददाः ॥ ४ ॥

दिनेषु च, सुहृज्जनैस्सह, वनेषु लीलापरं,
मनोभव, मनोहरं, रसित,वेणुनादामृतम् ।
भवन्तं, अमरीदृशां, अमृतपारणादायिनं,
विचिन्त्य, किमु नालपन्, विरहतापिताः, गोपिकाः ॥ ५ ॥

भोजराजभृतकस्त्वथ कश्चित्, कष्टदुष्टपथदृष्टिररिष्टः ।
निष्ठुराकृतिः, अपष्ठुनिनादस्तिष्ठते स्म, भवते वृषरूपी ॥ ६ ॥

शाक्वरोऽथ जगतीधृतिहारी, मूर्तिमेष बृहतीं प्रदधानः ।
पङ्क्तिमाशु परिघूर्ण्य पशूनां, छन्दसां निधिं, अवाप भवन्तम् ॥ ७ ॥

तुङ्गशृङ्गमुखमाश्वभियन्तं, संगृहय्य रभसात्, अभियं तम् ।
भद्ररूपमपि, दैत्यमभद्रं, मर्दयन्, अमदयः सुरलोकम् ॥ ८ ॥

चित्रमद्य भगवन् वृषघातात्, सुस्थिराऽजनि वृषस्थितिरुर्व्याम् ।
वर्धते च वृषचेतसि भूयान् मोदः, इत्यभिनुतोऽसि सुरैस्त्वम् ॥ ९ ॥

औक्षकाणि परिधावत दूरं, वीक्ष्यतां, अयं इहोक्षविभेदी ।

इत्थमात्तहसितैः सह गोपैः, गेहगस्त्वमव, वातपुरेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्ततितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकसप्ततितमं दशकम्

यत्नेषु सर्वेष्वपि नावकेशी, केशी स भोजेशितुः, इष्टबन्धुः ।

त्वं सिन्धुजावाप्य इतीव मत्वा, सम्प्राप्तवान्, सिन्धुजवाजिरूपः ॥ १ ॥

गन्धर्वतां, एष गतोऽपि, रूक्षैर्नादैः, समुद्वेजितसर्वलोकः ।

भवद्विलोकावधि, गोपवाटीं, प्रमर्द्य पापः, पुनरापतत्त्वाम् ॥ २ ॥

ताक्ष्यार्पिताङ्घ्रेः, तव ताक्ष्र्य एषः, चिक्षेप वक्षोभुवि, नाम पादम् ।

भृगोः, पदाघातकथां निशम्य, स्वेनापि शक्यं तत्, इतीव मोहात् ॥ ३ ॥

प्रवञ्चयन्, अस्य खुराञ्चलं द्राक्, अमुञ्च चिक्षेपिथ, दूरदूरम् ।

सम्मूर्च्छितोऽपि हि, अतिमूर्च्छितेन, क्रोधोष्मणाः, खादितुम्, आद्रुतस्त्वाम् ॥ ४ ॥

त्वं वाहदण्डे, कृतधीश्च वाहादण्डं, न्यधास्तस्य मुखे, तदानीम् ।
तद् वृद्धिरुद्धश्वसनो गतासुः, सप्तीभवन्नपि, अयमैक्यमागात् ॥ ५ ॥

आलम्भमात्रेण, पशोः सुराणां, प्रसादके, नूत्न इवाश्वमेधे ।
कृते, त्वया हर्षवशात् सुरेन्द्राः, त्वां तुष्टुवुः, केशवनामधेयम् ॥ ६ ॥

कंसाय, ते शौरिसुतत्वमुक्त्वा, तं तद्वधोत्कं, प्रतिरुध्य वाचा ।
प्राप्तेन केशिक्षपणावसाने, श्रीनारदेन त्वं, अभिष्टुतोऽभूः ॥ ७ ॥

कदापि गोपैः सह, काननान्ते, निलायनक्रीडनलोलुपं त्वाम् ।
मयात्मजः प्राप दुरन्तमायो, व्योमाभिधो, व्योमचरोपरोधी ॥ ८ ॥

स चोरपालायितवल्लवेषु, चोरायितो, गोपशिशून् पशूंश्च ।
गुहासु कृत्वा, पिदधे शिलाभिः, त्वया च बुद्ध्वा, परिमर्दितोऽभूत् ॥ ९ ॥

एवं विधैश्च, अद्भुतकेलिभेदैः, आनन्दमूर्च्छां, अतुलां व्रजस्य ।
पदे पदे, नूतनयन्, असीमं, परात्मरूपिन्, पवनेश पायाः ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकसप्ततितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्विसप्ततितमं दशकम्

कंसोऽथ नारदगिरा, व्रजवासिनं त्वां, आकर्ण्य दीर्णहृदय:, स हि गान्दिनेयम् ।

आहूय, कार्मुकमखच्छलतो, भवन्तं, आनेतुं, एनमहिनोत्, अहिनाथशायिन् ॥ १ ॥

अक्रूर एष:, भवदंघ्रिपर:, चिराय, त्वद्दर्शनाक्षममना:, क्षितिपालभीत्या ।

तस्याज्ञयैव पुन:, ईक्षितुमुद्यतस्त्वां, आनन्दभारं, अतिभूरितरं, बभार ॥ २ ॥

सोऽयं रथेन, सुकृती, भवतो निवासं, गच्छन्, मनोरथगणान्, त्वयि धार्यमाणान् ।

आस्वादयन्, मुहु:, अपायभयेन, दैवं सम्प्रार्थयन्, पथि, न किञ्चिदपि व्यजानात् ॥ ३ ॥

द्रक्ष्यामि, वेदशतगीतगतिं, पुमांसं, स्प्रक्ष्यामि किंस्वित्, अपि नाम परिष्वजेयम् ।

किं वक्ष्यते, स खलु मां, क्वनु वीक्षित: स्यात्, इत्थं निनाय स:, भवन्मयमेव मार्गम् ॥ ४ ॥

भूय: क्रमात्, अभिविशन्, भवदंघ्रिपूतं, बृन्दावनं, हरविरिञ्चसुराभिवन्द्यम् ।

आनन्दमग्न इव, लग्न इव प्रमोहे, किं किं दशान्तरं, अवाप न, पङ्कजाक्ष ॥ ५ ॥

पश्यन्नवन्दत, भवद्विहृतिस्थलानि, पांसुषु, अवेष्टत, भवच्चरणाङ्कितेषु ।

किं ब्रूमहे, बहुजना हि, तदापि जाताः, एवं तु भक्तितरलाः, विरलाः परात्मन् ॥ ६ ॥

सायं सः, गोपभवनानि, भवच्चरित्रगीतामृतप्रसृत,कर्णरसायनानि ।

पश्यन्, प्रमोदसरितेव, किलोह्यमानः, गच्छन्, भवद्भवनसन्निधिं, अन्वयासीत् ॥ ७ ॥

तावद्ददर्श, पशुदोहविलोकलोलं, भक्तोत्तमागतिमिव, प्रतिपालयन्तम् ।

भूमन् भवन्तं, अयं, अग्रजवन्तं, अन्तर्ब्रह्मानुभूति,रससिन्धुं, इवोद्वमन्तम् ॥ ८ ॥

सायन्तनाप्लवविशेष,विविक्तगात्रौ, द्वौ, पीतनीलरुचिराम्बर,लोभनीयौ ।

नातिप्रपञ्च,धृतभूषण,चारुवेषौ, मन्दस्मितार्द्रवदनौ, स युवां ददर्श ॥ ९ ॥

दूरात्, रथात्समवरुह्य, नमन्तमेनं, उत्थाप्य भक्तकुलमौलिं, अथोपगूहन् ।

हर्षान्मिताक्षरगिरा, कुशलानुयोगी, पाणिं प्रगृह्य सबलोऽथ, गृहं निनेथ ॥ १० ॥

नन्देन साकं, अमितादरं, अर्चयित्वा, तं यादवं तदुदितां, निशमय्य वार्ताम् ।

गोपेषु, भूपतिनिदेशकथां निवेद्य, नानाकथाभिः, इह तेन निशामनैषीः ॥ ११ ॥

चन्द्रागृहे, किमुत चन्द्रभगागृहे नु, राधागृहे नु, भवने किमु मैत्रविन्दे ।

धूर्तो विलम्बत इति, प्रमदाभिः, उच्चैराशङ्कितो, निशि, मरुत्पुरनाथ पायाः ॥ १२ ॥

ॐ तत्सदिति श्रीमन्नारायणीये द्विसप्ततितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रिसप्ततितमं दशकम्

निशमय्य तवाथ यानवार्तां, भृशमार्ताः पशुपालबालिकास्ताः ।

किमिदं, किमिदं, कथं नु, इतीमाः समवेताः, परिदेवितान्यकुर्वन् ॥ १ ॥

करुणानिधिरेष नन्दसूनुः, कथमस्मान् विसृजेत्, अनन्यनाथाः ।

बत नः किमु दैवमेवमासीत्, इति ताः, त्वद्गतमानसा विलेपुः ॥ २ ॥

चरमप्रहरे प्रतिष्ठमानः, सह पित्रा, निजमित्रमण्डलैश्च ।

परितापभरं, नितम्बिनीनां, शमयिष्यन्, व्यमुचः सखायमेकम् ॥ ३ ॥

अचिरात्, उपयामि सन्निधिं वः, भविता, साधु मयैव, सङ्गमश्रीः ।

अमृताम्बुनिधौ, निमज्जयिष्ये, द्रुतमित्याश्वसिताः, वधूरकार्षीः ॥ ४ ॥

सविषादभरं, सयाच्ञमुच्चैः, अतिदूरं, वनिताभिरीक्ष्यमाणः ।

मृदु तद्दिशि पातयन्नपाङ्गान्, सबलः, अक्रूररथेन, निर्गतोऽभूः ॥ ५ ॥

अनसा बहुलेन, वल्लवानां, मनसा चानुगतोऽथ, वल्लभानाम् ।

वनमार्तमृगं, विषण्णवृक्षं, समतीतो, यमुनातटीं, अयासीः ॥ ६ ॥

नियमाय, निमज्य वारिणि त्वां, अभिवीक्ष्याथ, रथेऽपि गान्दिनेयः ।

विवशोऽजनि, किन्विदं विभोस्ते, ननु चित्रं तु, अवलोकनं, समन्तात् ॥ ७ ॥

पुनरेष निमज्य, पुण्यशाली, पुरुषं त्वां परमं, भुजङ्गभोगे ।

अरिकम्बुगदाम्बुजैः, स्फुरन्तं, सुरसिद्धौघपरीतं, आलुलोके ॥ ८ ॥

स तदा, परमात्मसौख्यसिन्धौ, विनिमग्नः प्रणुवन्, प्रकारभेदैः ।

अविलोक्य पुनश्च, हर्षसिन्धोरनुवृत्त्या, पुलकावृतो ययौ त्वाम् ॥ ९ ॥

किमु शीतलिमा महान्, जले यत्, पुलकोऽसौ, इति चोदितेन तेन ।

अतिहर्षनिरुत्तरेण, सार्धं, रथवासी, पवनेश, पाहि मां त्वम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रिसप्ततितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुस्सप्ततितमं दशकम्

सम्प्राप्तो मधुरां, दिनार्धविगमे, तत्रान्तरस्मिन् वसन्,
आरामे, विहिताशनः, सखिजनैः, यातः पुरीमीक्षितुम् ।
प्रापो राजपथं, चिरश्रुतिधृतव्यालोक,कौतूहल-
स्त्रीपुंसोद्यदगण्य,पुण्यनिगलैः,आकृष्यमाणो नु, किम् ॥ १ ॥

त्वत्पादद्युतिवत् सरागसुभगाः, त्वन्मूर्तिवद्योषितः,
सम्प्राप्ताः, विलसत्पयोधररुचः, लोलाः, भवत् दृष्टिवत् ।
हारिण्यः, त्वदुरःस्थलीवत्, अयि, ते मन्दस्मितप्रौढिवत्,
नैर्मल्योल्लसिताः, कचौघरुचिवत्, राजत्कलापाश्रिताः ॥ २ ॥

तासां, आकलयन्, अपाङ्गवलनैर्मोदं, प्रहर्षाद्भुत-
व्यालोलेषु, जनेषु तत्र, रजकं कञ्चित्, पटीं प्रार्थयन् ।
कस्ते दास्यति राजकीयवसनं, याहीति, तेनोदितः,
सद्यस्तस्य करेण, शीर्षमहृथाः, सोऽप्याप, पुण्यां गतिम् ॥ ३ ॥

भूयो वायकं, एकं, आयतमतिं, तोषेण वेषोचितं,
दाश्वांसं, स्वपदं निनेथ, सुकृतं को वेद, जीवात्मनाम् ।

मालाभिः, स्तबकैः, स्तवैरपि पुनः, मालाकृता मानितः,
भक्तिं तेन वृतां, दिदेशिथ परां, लक्ष्मीं च, लक्ष्मीपते ॥ ४ ॥

कुब्जां, अब्जविलोचनां, पथिपुनः, दृष्ट्वाऽङ्गरागे तया,
दत्ते, साधु किल, अङ्गरागमददाः, तस्याः, महान्तं हृदि ।
चित्तस्थामृजुतां, अथ प्रथयितुं गात्रेऽपि, तस्याः स्फुटं,
गृह्णन्, मञ्जु करेण, तामुदनयः, तावज्जगत्सुन्दरीम् ॥ ५ ॥

तावन्निश्चितवैभवाः,तव विभो, नात्यन्तपापा जनाः,
यत्किञ्चित्, ददते स्म, शक्त्यनुगुणं, ताम्बूलमाल्यादिकम् ।
गृह्णानः, कुसुमादि, किञ्चन तदा, मार्गे निबद्धाञ्जलिः,
नातिष्ठं बत हा, यतोऽद्य विपुलां, आर्तिं, व्रजामि प्रभो ॥ ६ ॥

एष्यामीति, विमुक्तयाऽपि भगवन्, आलेपदात्र्या तया,
दूरात् कातरया, निरीक्षितगतिः, त्वं प्राविशो गोपुरम् ।
आघोषानुमितत्वदागम,महाहर्षोल्लसद्देवकी-,
वक्षोजप्रगलत्पयोरसमिषात्, त्वत्कीर्तिः, अन्तर्गता ॥ ७ ॥

आविष्टो नगरीं महोत्सववतीं, कोदण्डशालां व्रजन्,
माधुर्येण नु, तेजसा नु पुरुषैः, दूरेण दत्तान्तरः ।
स्रग्भिर्भूषितं, अर्चितं वरधनुः, मामेति वादात् पुरः,
प्रागृह्णाः, समरोपयः किल, समाक्राक्षीः, अभाङ्क्षीरपि ॥ ८ ॥

श्वः, कंसक्षपणोत्सवस्य पुरतः, प्रारम्भतूर्योपमः,
चापध्वंसमहाध्वनिः, तव विभो, देवान्, अरोमाञ्चयत् ।
कंसस्यापि च वेपथुः, तदुदितः, कोदण्ड,खण्डद्वयी-,
चण्डाभ्याहत,रक्षिपूरुषरवैः, उत्कूलितोऽभूत् त्वया ॥ ९ ॥

शिष्टैर्दुष्टजनैश्च, दृष्टमहिमा प्रीत्या च, भीत्या ततः,
सम्पश्यन् पुरसम्पदं, प्रविचरन्, सायं गतो, वाटिकाम् ।
श्रीदाम्ना सह, राधिकाविरहजं, खेदं वदन् प्रस्वपन्,
आनन्दन्, अवतारकार्यघटनात्, वातेश, संरक्ष माम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुस्सप्ततितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चसप्ततितमं दशकम्

प्रातः सन्त्रस्तभोजक्षितिपतिवचसा, प्रस्तुते मल्लतूर्ये,
सङ्घे राज्ञां च मञ्चान्, अभिययुषि गते, नन्दगोपेऽपि, हर्म्यम् ।
कंसे सौधाधिरूढे, त्वमपि सहबलः, सानुगश्चारुवेषः,
रङ्गद्वारं, गतोऽभूः, कुपितकुवलयापीड,नागावलीढम् ॥ १ ॥

पापिष्ठ, अपेहि मार्गात्, द्रुतमिति वचसा, निष्ठुरक्रुद्धबुद्धेः,
अम्बष्ठस्य प्रणोदात्, अधिकजवजुषा, हस्तिना, गृह्यमाणः ।
केलीमुक्तोऽथ, गोपीकुचकलशचिरस्पर्धिनं, कुम्भमस्य,
व्याहत्य अलीयथास्त्वं, चरणभुवि पुनः, निर्गतो, वल्गुहासी ॥ २ ॥

हस्तप्राप्योपि अगम्यः, झटिति मुनिजनस्येव, धावन् गजेन्द्रं,
क्रीडन्, आपत्य भूमौ, पुनरभिपततः, तस्य दन्तं, सजीवम् ।
मूलात्, उन्मूल्य, तन्मूलगमहितमहामौक्तिकानि, आत्ममित्रे
प्रादाः, त्वं हारमेभिः, ललितविरचितं, राधिकायै, दिशेति ॥ ३ ॥

गृह्णानं, दन्तमंसे, युतमथ हलिना, रङ्गं, अङ्गाविशन्तं,
त्वां, मङ्गल्याङ्गभङ्गी,रभसहृतमनोलोचना, वीक्ष्य लोकाः ।

हंहो, धन्यो नु नन्दः, नहि नहि, पशुपालाङ्गनाः, नो, यशोदा,
नो नो, धन्येक्षणाः स्मः, त्रिजगति वयमेवेति, सर्वे, शशंसुः ॥ ४ ॥

पूर्णं ब्रह्मैव साक्षात्, निरवधि परमानन्दसान्द्रप्रकाशं,
गोपेशु, त्वं व्यलासीः, न खलु बहुजनैः, तावत्, आवेदितोऽभूः ।
दृष्ट्वाऽथ त्वां तदा, इदं प्रथमं, उपगते, पुण्यकाले जनौघाः,
पूर्णानन्दाः, विपापाः, सरसमभिजगुः, त्वत्कृतानि, स्मृतानि ॥ ५ ॥

चाणूरो मल्लवीरस्तदनु, नृपगिरा मुष्टिको मुष्टिशाली,
त्वां रामं चाभिपेदे, झटझटिति मिथो, मुष्टिपातातिरूक्षम् ।
उत्पातापातनाकर्षण,विविधरणानि,आसतां तत्र चित्रं,
मृत्योः प्रागेव, मल्लप्रभुः, अगमदयं, भूरिशो, बन्धमोक्षान् ॥ ६ ॥

हा धिक् कष्टं, कुमारौ सुललितवपुषौ, मल्लवीरौ कठोरौ,
न द्रक्ष्यामः, व्रजामस्त्वरितं, इति जने, भाषमाणे, तदानीम् ।
चाणूरं तं, करोद्भ्रामण,विगलदसुं, पोथयामासिथोर्व्यां,
पिष्टोऽभूत्, मुष्टिकोऽपि, द्रुतमथ हलिना, नष्टशिष्टैः, दधावे ॥ ७ ॥

कंसस्संवार्य तूर्यं, खलमतिरविदन्, कार्यं, आर्यान् पितृम्स्तान्,
आहन्तुं, व्याप्तमूर्तेः, तव च समशिषत्, दूरमुत्सारणाय ।
रुष्टो दुष्टोक्तिभिस्त्वं, गरुड इव गिरिं मञ्चं, अञ्चन्, उदञ्चत्-
खड्गव्यावल्गदुस्संग्रहमपि च, हठात् प्राग्रहीः, औग्रसेनिम् ॥ ८ ॥

सद्यो निष्पिष्टसन्धिं, भुवि नरपतिमापात्य तस्योपरिष्टात्,
त्वय्यापात्ये तदैव, त्वदुपरि पतिता नाकिनां, पुष्पवृष्टिः ।
किं किं ब्रूमस्तदानीं, सततमपि भिया, त्वद्गतात्मा, स भेजे
सायुज्यं, त्वद्वधोत्था परम, परमियं वासना, कालनेमेः ॥ ९ ॥

तद्भ्रातृन्, अष्ट पिष्ट्वा, द्रुतमथ, पितरौ सन्नमन्, उग्रसेनं
कृत्वा राजानं, उच्चैर्यदुकुलमखिलं मोदयन्, कामदानैः ।
भक्तानां, उत्तमं च, उद्धवं, अमरगुरोराप्तनीतिं सखायं,
लब्ध्वा, तुष्टो नगर्यां, पवनपुरपते, रुन्धि मे सर्वरोगान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चसप्ततितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षड्सप्ततितमं दशकम्

गत्वा सान्दीपनिमथ, चतुष्षष्टिमात्रैरहोभिः,
सर्वज्ञस्त्वं, सह मुसलिना, सर्वविद्याः, गृहीत्वा ।
पुत्रं नष्टं, यमनिलयनात्, आहृतं दक्षिणार्थं,
दत्वा तस्मै, निजपुरमगाः, नादयन् पाञ्चजन्यम् ॥ १ ॥

स्मृत्वा स्मृत्वा, पशुपसुदृशः, प्रेमभारप्रणुन्नाः,
कारुण्येन, त्वमपि विवशः, प्राहिणोः, उद्धवं तम् ।
किञ्च, अमुष्मै परमसुहृदे, भक्तवर्याय, तासां
भक्त्युद्रेकं, सकलभुवने दुर्लभं, दर्शयिष्यन् ॥ २ ॥

त्वन्माहात्म्यप्रथिमपिशुनं, गोकुलं प्राप्य सायं,
त्वद्वार्ताभिः, बहु स रमयामास, नन्दं, यशोदाम् ।
प्रातर्द्दृष्ट्वा मणिमयरथं, शङ्किताः पङ्कजाक्ष्यः,
श्रुत्वा प्राप्तं, भवदनुचरं, त्यक्तकार्याः, समीयुः ॥ ३ ॥

दृष्ट्वा चैनं, त्वदुपमलसद्वेषभूषाभिरामं,
स्मृत्वा स्मृत्वा, तव विलसितानि, उच्चकैः, तानि तानि ।
रुद्धालापाः कथमपि पुनः, गद्गदां वाचमूचुः,
सौजन्यादीन्, निजपरभिदामपि, अलं विस्मरन्त्यः ॥ ४ ॥

श्रीमन् किं त्वं पितृजनकृते, प्रेषितो निर्दयेन,
क्वासौ कान्तो, नगरसुदृशां, हा हरे नाथ, पायाः ।
आश्लेषाणां, उमृतवपुषो हन्त, ते चुम्बनानां,
उन्मादानां, कुहकवचसां, विस्मरेत् कान्त, का वा ॥ ५ ॥

रासक्रीडालुलितललितं, विश्लथत्केशपाशं,
मन्दोद्भिन्न श्रमजलकणं, लोभनीयं, त्वदङ्गम् ।
कारुण्याब्धे, सकृदपि, समालिङ्गितुं, दर्शयेति
प्रेमोन्मादात्, भुवनमदन, त्वत्प्रियाः, त्वां विलेपुः ॥ ६ ॥

एवंप्रायैः, विवशवचनैः, आकुला गोपिकास्ताः,
त्वत्सन्देशैः, प्रकृतिमनयत्, सोऽथ, विज्ञानगर्भैः ।
भूयस्ताभिः, मुदितमतिभिः, त्वन्मयीभिः, वधूभिः,
तत्तद्वार्तासरसमनयत्, कानिचित्, वासराणि ॥ ७ ॥

त्वत्प्रोद्गानैस्सहितमनिशं, सर्वतो गेहकृत्यं,
त्वद्वार्तैव प्रसरति मिथः, सैव च, उत्स्वापलापाः ।
चेष्टाः प्रायस्त्वदनुकृतयः, त्वन्मयं सर्वमेवं,
दृष्ट्वा तत्र व्यमुहदधिकं, विस्मयात्, उद्धवोऽयम् ॥ ८ ॥

राधाया मे प्रियतमं, इदं, मत्प्रिया, एवं ब्रवीति,
त्वं किं मौनं कलयसि, सखे, मानिनी, मत्प्रियेव ।
इत्याद्येव प्रवदति सखि, त्वत्प्रियो निर्जने मां,
इत्थंवादैः, अरमयदयं, त्वत्प्रियां, उत्पलाक्षीम् ॥ ९ ॥

एष्यामि द्राक्, अनुपगमनं, केवलं कार्यभारात्,
विश्लेषेऽपि, स्मरणदृढतासम्भवात्, मास्तु खेदः ।
ब्रह्मानन्दे, मिलति नचिरात्, सङ्गमो वा वियोगः,
तुल्यो वः स्यात्, इति तव गिरा, सोऽकरोत्, निर्व्यथास्ताः ॥ १० ॥

एवं भक्तिः, सकलभुवने, नेक्षिता न श्रुता वा,
किं शास्त्रौघैः, किमिह तपसा, गोपिकाभ्यो नमोऽस्तु ।
इति, आनन्दाकुलं, उपगतं गोकुलात्, उद्धवं तं,
दृष्ट्वा हृष्टो, गुरुपुरपते, पाहि मां, आमयौघात् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये षड्सप्तिततमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तसप्ततितमं दशकम्

सैरन्ध्र्याः, तदनु चिरं, स्मरातुरायाः, यातोऽभूः सुललितं, उद्धवेन सार्धम् ।

आवासं, त्वदुपगमोत्सवं सदैव, ध्यायन्त्याः, प्रतिदिन,वाससज्जिकायाः ॥ १ ॥

उपगते त्वयि, पूर्णमनोरथां, प्रमदसम्भ्रम,कम्प्रपयोधराम् ।

विविधं, आननं, आदधतीं मुदा, रहसि तां, रमयाञ्चकृषे सुखम् ॥ २ ॥

पृष्टा वरं, पुनरसौ, अवृणोद्वराकी, भूयस्त्वया, सुरतमेव निशान्तरेषु ।

सायुज्यमस्त्विति वदेत्, बुध एव कामं, सामीप्यं, अस्तु, अनिशं, इत्यपि नाब्रवीत्, किम् ॥

ततो भवान्, देव, निशासु कासुचित्, मृगीदृशं तां निभृतं, विनोदयन् ।

अदात्, उपश्लोक इति श्रुतं सुतं, स नारदात्, सात्वततन्त्रविद्बभौ ॥ ४ ॥

अक्रूरमन्दिरमितोऽथ, बलोद्धवाभ्यां, अभ्यर्चितो बहु नुतो मुदितेन, तेन ।

एनं विसृज्य, विपिनागतपाण्डवेयवृत्तं, विवेदिथ, तथा, धृतराष्ट्रचेष्टाम् ॥ ५ ॥

विघाताज्जामातुः, परमसुहृदो, भोजनृपतेः, जरासन्धे, रुन्धति, अनवधिरुषान्धेऽथ, मधुराम् ।

रथाद्यैः, द्योर्लब्धैः, कतिपयबलस्त्वं बलयुतः, त्रयोविंशत्यक्षौहिणि, तदुपनीतं, समहृथाः ॥

बद्धं बलात्, अथ बलेन, बलोत्तरं त्वं, भूयो बलोद्यमरसेन, मुमोचिथैनम् ।

निश्शेष,दिग्जयसमाहृत,विश्वसैन्यात्, कोऽन्यस्ततो हि, बलपौरुषवान्, तदानीम् ॥ ७ ॥

भग्नः स लग्नहृदयोऽपि, नृपैः प्रणुन्नो, युद्धं त्वया व्यधित, षोडशकृत्व एवम् ।

अक्षौहिणीः, शिव शिवास्य, जघन्थ विष्णो, सम्भूय सैकनवति, त्रिशतं तदानीम् ॥ ८ ॥

अष्टादशेऽस्य समरे, समुपेयुषि त्वं, दृष्ट्वा, पुरोऽथ यवनं यवनत्रिकोट्या ।

त्वष्ट्रा विधाप्य, पुरमाशु पयोधिमध्ये, तत्राऽथ, योगबलतः, स्वजनान् अनैषीः ॥ ९ ॥

पद्भ्यां त्वं पद्ममाली, चकित इव पुरान्निर्गतो, धावमानः,

म्लेच्छेशेन, अनुयातो, वधसुकृतविहीनेन, शैले, न्यलैषीः ।

सुप्तेन,अन्घ्र्याहतेन, द्रुतमथ, मुचुकुन्देन, भस्मीकृतेऽस्मिन्,
भूपायास्मै गुहान्ते, सुललितवपुषा, तस्थिषे, भक्तिभाजे ॥ १० ॥

ऐक्ष्वाकोऽहं, विरक्तोऽस्म्यखिलनृपसुखे, त्वत्प्रसादैककाङ्क्षी,
हा देवेति स्तुवन्तं, वरविततिषु तं, निस्पृहं, वीक्ष्य हृष्यन् ।
मुक्तेस्तुल्यां च भक्तिं, धुतसकलमलं, मोक्षमप्याशु दत्वा,
कार्यं हिंसा,विशुद्ध्यै, तप इति च तदा, प्रात्थ, लोकप्रतीत्यै ॥ ११ ॥

तदनु मधुरां गत्वा, हत्वा चमूं यवनाहृतां,
मगधपतिना मार्गे, सैन्यैः पुरेव, निवारितः ।
चरमविजयं दर्पायास्मै प्रदाय, पलायितः,
जलधिनगरीं यातो, वातालयेश्वर, पाहि माम् ॥१२॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तसप्ततितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टसप्ततितमं दशकम्

त्रिदशवर्धकिवर्धितकौशलं, त्रिदशदत्तसमस्तविभूतिमत् ।
जलधिमध्यगतं, त्वं अभूषय:, नवपुरं वपुरञ्चितरोचिषा ॥ १ ॥

ददुषि रैवतभूभृति रेवतीं, हलभृते तनयां, विधिशासनात् ।
महितमुत्सवघोषं, अपूपुष:, समुदितैर्मुदितै: सह यादवै: ॥ २ ॥

अथ विदर्भसुतां खलु रुक्मिणीं, प्रणयिनीं त्वयि देव सहोदर: ।
स्वयमदित्सत, चेदिमहीभुजे, स्वतमसा, तमसाधुं उपाश्रयन् ॥ ३ ॥

चिरधृतप्रणया त्वयि बालिका, सपदि काङ्क्षितभङ्गसमाकुला ।
तव निवेदयितुं, द्विजमादिशत्, स्वकदनं, कदनङ्गविनिर्मितम् ॥ ४ ॥
द्विजसुतोऽपि च, तूर्णमुपाययौ, तव पुरं हि, दुराशदुरासदम् ।
मुदमवाप च सादरपूजित:, स भवता, भवतापहृता स्वयम् ॥ ५ ॥

स च भवन्तं, अवोचत कुण्डिने, नृपसुता खलु, राजति रुक्मिणी ।
त्वयि समुत्सुकया, निजधीरतारहितया हि तया, प्रहितोऽस्म्यहम् ॥ ६ ॥

तव हृताऽस्मि पुरैव, गुणैरहं, हरति मां किल, चेदिनृपोऽधुना ।
अयि कृपालय पालय मां, इति प्रजगदे, जगदेकपते तया ॥ ७ ॥

अशरणां यदि मां त्वमुपेक्षसे, सपदि, जीवितमेव जहाम्यहम् ।
इति गिरा सुतनोः, अतनोत् भृशं, सुहृदयं, हृदयं तव कातरम् ॥ ८ ॥

अकथयः, त्वं अथैनमये सखे, तदधिका, मम मन्मथवेदना ।
नृपसमक्षमुपेत्य हराम्यहं, तदयि तां, दयितां असितेक्षणाम् ॥ ९ ॥

प्रमुदितेन च तेन समं तदा, रथगतो लघु कुण्डिनमेयिवान् ।
गुरुमरुत्पुरनायक, मे भवान्, वितनुतां, तनुतां निखिलापदाम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टसप्ततितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनाशीतितमं दशकम्

बलसमेतबलानुगतो भवान्, पुरमगाहत भीष्मकमानितः ।

द्विजसुतं त्वदुपागमवादिनं, धृतरसा, तरसा प्रणनाम सा ॥ १ ॥

भुवनकान्तमवेक्ष्य भवद्वपुः, नृपसुतस्य निशम्य च चेष्टितम् ।

विपुलखेदजुषां पुरवासिनां, सरुदितैः, उदितैरगमन्निशा ॥ २ ॥

तदनु वन्दितुं, इन्दुमुखी, शिवां, विहितमङ्गलभूषणभासुरा ।

निरगमत् भवदर्पितजीविता, स्वपुरतः, पुरतः सुभटावृता ॥ ३ ॥

कुलवधूभिरुपेत्य कुमारिका, गिरिसुतां, परिपूज्य च सादरम् ।

मुहुरयाचत, तत्पदपङ्कजे निपतिता, पतितां तव केवलम् ॥ ४ ॥

समवलोककुतूहलसङ्कुले, नृपकुले निभृतं त्वयि च स्थिते ।

नृपसुता निरगाद्गिरिजालयात्, सुरुचिरं, रुचिरञ्जितदिङ्मुखा ॥ ५ ॥

भुवनमोहनरूपरुचा तदा, विवशिताखिलराजकदम्बया ।

त्वमपि देव, कटाक्षविमोक्षणैः, प्रमदया, मदयाञ्चकृषे मनाक् ॥ ६ ॥

## क्व नु गमिष्यसि, चन्द्रमुखीति तां, सरसमेत्य करेण हरन् क्षणात् ।
## समधिरोप्य रथं, त्वमपाहृथाः, भुवि ततो वितता निनदो द्विषाम् ॥ ७ ॥

क्व नु गतः पशुपाल इति क्रुधा, कृतरणाः, यदुभिश्च जिता नृपाः ।
न तु भवान्, उदचाल्यत तैरहो, पिशुनकैः शुनकैरिव केसरी ॥ ८ ॥

तदनु रुक्मिणमागतमाहवे, वधमुपेक्ष्य, निबध्य विरूपयन् ।
हृतमदं परिमुच्य बलोक्तिभिः, पुरमया रमया सह कान्तया ॥ ९ ॥

नवसमागमलज्जितमानसां, प्रणयकौतुकजृम्भितमन्मथाम् ।
अरमयः खलु नाथ, यथासुखं, रहसि तां, हसितांशुलसन्मुखीम् ॥ १० ॥

विविधनर्मभिरेवमहर्निशं, प्रमदमाकलयन् पुनरेकदा ।
ऋजुमतेः किल वक्रगिरा भवान्, वरतनोः, आतनोत् अतिलोलताम् ॥ ११ ॥

तदधिकैः, अथ लालनकौशलैः, प्रणयिनीमधिकं, सुखयन्निमाम् ।
अयि मुकुन्द, भवच्चरितानि, नः प्रगदतां, गदतान्तिमपाकुरु ॥ १२ ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनाशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अशीतितमं दशकम्

सत्राजितस्त्वमथ, लुब्धवदर्कलब्धं,
दिव्यं स्यमन्तकमणिं, भगवन्, अयाचीः ।
तत्कारणं, बहुविधं, मम भाति नूनं,
तस्यात्मजां त्वयि रतां, छलतो विवोढुम् ॥ १ ॥

अदत्तं, तं तुभ्यं मणिवरं, अनेन अल्पमनसा,
प्रसेनस्तद्भ्राता, गलभुवि वहन्, प्राप, मृगयाम् ।
अहन्नेनं सिंहः, मणिमहसि, मांसभ्रमवशात्,
कपीन्द्रः, तं हत्वा, मणिमपि च, बालाय, ददिवान् ॥ २ ॥

शशंसुः, सत्राजिद्गिरं, अनु जनास्त्वां मणिहरं,
जनानां, पीयूषं भवति, गुणिनां, दोषकणिका ।
ततः सर्वज्ञोऽपि, स्वजनसहितो, मार्गणपरः,
प्रसेनं तं दृष्ट्वा, हरिमपि, गतोऽभूः, कपिगुहाम् ॥ ३ ॥

भवन्तं, अवितर्कयन्, अतिवयाः, स्वयं जाम्बवान्,
मुकुन्दशरणं हि मां, क इह रोद्धुं, इत्यालपन् ।

विभो, रघुपते, हरे, जय जय, इत्यलं मुष्टिभिः
चरन्, तव समर्चनं व्यधित, भक्तचूडामणिः ॥ ४ ॥

बुध्वाऽथ तेन दत्तां, नवरमणीं, वरमणिं च, परिगृह्णन् ।
अनुगृह्णन्, अमुमागाः, सपदि च सत्राजिते, मणिं प्रादाः ॥ ५ ॥

तदनु स खलु व्रीडालोलो, विलोलविलोचनां,
दुहितरमहो धीमान्, भामां, गिरैव, परार्पिताम् ।
अदित मणिना तुभ्यं, लभ्यं समेत्य भवानपि,
प्रमुदितमनाः, तस्यैवादात्, मणिं, गहनाशयः ॥ ६ ॥

व्रीडाकुलां, रमयति त्वयि, सत्यभामां,
कौन्तेयदाहकथयाथ, कुरून् प्रयाते ।
ही, गान्दिनेयकृतवर्मगिरा निपात्य,
सत्राजितं, शतधनुः, मणिमाजहार ॥ ७ ॥

शोकात् कुरून्, उपगतां, अवलोक्य कान्तां,
हत्वा द्रुतं शतधनुं, समहर्षयस्ताम् ।
रत्ने, सशङ्क इव, मैथिलगेहमेत्य, रामो गदां,
समशिशिक्षत, धार्तराष्ट्रम् ॥ ८ ॥

अक्रूर एष भगवन्, भवदिच्छयैव,

सत्राजितः कुचरितस्य, युयोज हिंसाम् ।

अक्रूरतो मणिं, अनाहृतवान् पुनस्त्वं,

तस्यैव भूतिं, उपधातुं, इति ब्रुवन्ति ॥ ९ ॥

भक्तस्त्वयि स्थिरतरः, स हि गान्दिनेयः,

तस्यैव कापथमतिः, कथमीश जाता ।

विज्ञानवान्, प्रशमवान्, अहं, इत्युदीर्णं,

गर्वं ध्रुवं, शमयितुं, भवता कृतैव ॥ १० ॥

यातं भयेन, कृतवर्मयुतं पुनस्तं, आहूय तद्विनिहितं च, मणिं प्रकाश्य ।

तत्रैव सुव्रतधरे, विनिधाय तुष्यन्, भामाकुचान्तरशयः, पवनेश, पायाः ॥
११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये अशीतितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकाशीतितमं दशकम्

स्निग्धां मुग्धां, सततमपि तां, लालयन् सत्यभामां,

यातो भूय: सह खलु तया, याज्ञसेनीविवाहम् ।

पार्थप्रीत्यै पुनरपि मनाक्, आस्थितो हस्तिपुर्यां,

शक्रप्रस्थं, पुरमपि विभो, संविधाय, आगतोऽभू: ॥ १ ॥

भद्रां भद्रां, भवदवरजां, कौरवेणार्थ्यमानां,

त्वद्वाचा, तां, अहृत कुहनामस्करी, शक्रसूनु: ।

तत्र क्रुद्धं बलं, अनुनयन्, प्रत्यगास्तेन सार्धं,

शक्रप्रस्थं, प्रियसखमुदे, सत्यभामा,सहाय: ॥ २ ॥

तत्र क्रीडन्, अपि च यमुनाकूलदृष्टां, गृहीत्वा,

तां कालिन्दीं, नगरमगम:, खाण्डवप्रीणिताग्नि: ।

भ्रातृत्रस्तां प्रणयविवशां, देव पैतृष्वसेयीं,

राज्ञां मध्ये, सपदि जहृषे, मित्रविन्दां, अवन्तीम् ॥ ३ ॥

सत्यां, गत्वा पुन:, उदवहो नग्नजिन्नन्दनां तां,

बध्वा सप्तापि च, वृषवरान्, सप्तमूर्ति:, निमेषात् ।

भद्रां नाम प्रददुः, अथ ते देव, सन्तर्दनाद्याः,
तत्सोदर्यां वरद, भवतः साऽपि, पैतृष्वसेयी ॥ ४ ॥

पार्थाद्यैरपि, अकृतलवनं, तोयमात्राभिलक्ष्यं,
लक्षं छित्वा, शफरं, अवृथाः, लक्ष्मणां, मद्रकन्याम् ।
अष्टावेवं, तव समभवन्, वल्लभाः, तत्र मध्ये,
शुश्रोथ त्वं, सुरपतिगिरा, भौमदुश्चेष्टितानि ॥ ५ ॥

स्मृतायातं पक्षिप्रवरं, अधिरूढस्त्वमगमः,
वहन्नङ्के, भामां, उपवनमिवाराति,भवनम् ।
विभिन्दन् दुर्गाणि, त्रुटितपृतना,शोणितरसैः,
पुरं तावत्, प्राग्ज्योतिषं, अकुरुथाः, शोणितपुरम् ॥ ६ ॥

मुरस्त्वां, पञ्चास्यो, जलधिवनमध्यात्, उदपतत्,
स चक्रे, चक्रेण प्रदलितशिराः, मङ्क्षु भवता ।
चतुर्दन्तैः, दन्तावलपतिभिः, इन्धानसमरं,
रथाङ्गेन छित्वा, नरकं, अकरोस्तीर्ण,नरकम् ॥ ७ ॥

स्तुतो भूम्या, राज्यं सपदि भगदत्तेऽस्य तनये,
गजञ्चैकं दत्वा, प्रजिघयिथ, नागान्, निजपुरम् ।
खलेन, आबद्धानां, स्वगतमनसां, षोडश पुनः,
सहस्राणि स्त्रीणां, अपि च धनराशिं च विपुलम् ॥ ८ ॥

भौमापाहृतकुण्डलं, तत्, अदितेर्दातुं, प्रयातो दिवं,
शक्राद्यैः, महितः समं दयितया, द्युस्त्रीषु, दत्तह्रिया ।
हृत्वा कल्पतरुं, रुषाभिपतितं, जित्वेन्द्रमभ्यागमः,
तत्तु, श्रीमददोष, ईदृश इति, व्याख्यातुं एव, अकृथाः ॥ ९ ॥

कल्पद्रुं, सत्यभामाभवनभुवि, सृजन्, व्द्यष्टसाहस्रयोषाः,
स्वीकृत्य, प्रत्यगारं, विहितबहुवपुः, लालयन्, केलिभेदैः ।
आश्चर्यात्, नारदालोकित,विविधगतिः, तत्र तत्रापि गेहे,
भूयः सर्वासु कुर्वन्, दश दश तनयान्, पाहि वातालयेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकाशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये व्द्यशीतितमं दशकम्

प्रद्युम्नो रौक्मिणेयः, स खलु तव कला शम्बरेणाहृतः, तं

हत्वा, रत्या सहाप्तो निजपुरं, अहरद्रुक्मिकन्यां च, धन्याम् ।

तत्पुत्रोऽथ अनिरुद्धो, गुणनिधिरवहत्, रोचनां रुक्मिपौत्रीं,

तत्रोद्वाहे गतस्त्वं, न्यवधि मुसलिना, रुक्म्यपि, द्यूतवैरात् ॥ १ ॥

बाणस्य सा, बलिसुतस्य सहस्रबाहोः, माहेश्वरस्य महिता, दुहिता किलोषा ।

त्वत्पौत्रमेनमनिरुद्धमदृष्टपूर्वं, स्वप्नेऽनुभूय भगवन्, विरहातुराऽभूत् ॥ २ ॥

योगिन्यतीव कुशला खलु, चित्रलेखा, तस्याः सखी विलिखती, तरुणानशेषान् ।

तत्र अनिरुद्धं, उषया विदितं निशायां, आनेष्ट योगबलतः, भवतो निकेतात् ॥ ३ ॥

कन्यापुरे, दयितया, सुखमारमन्तं, चैनं कथञ्चन, बबन्धुषि, शर्वबन्धौ ।

श्रीनारदोक्त,तदुदन्तदुरन्तरोषैः, त्वं तस्य शोणितपुरं, यदुभिर्न्यरुन्धाः ॥ ४ ॥

पुरीपालः, शैलप्रियदुहितृनाथोऽस्य, भगवान्,
समं भूतव्रातैः, यदुबलमशङ्कं, निरुरुधे ।
महाप्राणो बाणो, झटिति, युयुधानेन, युयुधे,
गुहः प्रद्युम्नेन, त्वमपि, पुरहन्त्रा, जघटिषे ॥ ५ ॥

निरुद्धाशेषास्त्रे, मुमुहुषि, तवास्त्रेण गिरिशे,
द्रुता भूता, भीताः, प्रमथकुलवीराः, प्रमथिताः ।
परास्कन्द्त् स्कन्दः, कुसुमशरबाणैश्च सचिवः,
स कुम्भाण्डो, भाण्डं नवमिव, बलेनाशु बिभिदे ॥ ६ ॥

चापानां पञ्चशत्या, प्रसभं, उपगते, छिन्नचापेऽथ, बाणे
व्यर्थे याते, समेतो ज्वरपतिः, अशनैः, अज्वरि, त्वज्ज्वरेण ।
ज्ञानी स्तुत्वाऽथ दत्वा, तव चरितजुषां विज्वरं, स ज्वरोऽगात्,
प्रायः, अन्तर्ज्ञानवन्तोऽपि च, बहुतमसा, रौद्रचेष्टा हि, रौद्राः ॥ ७ ॥

बाणं, नानायुधोग्रं, पुनरभिपतितं, दर्पदोषात् वितन्वन्,
निर्लूनाशेषदोषं, सपदि बुबुधुषा, शङ्करेन, उपगीतः ।
तद्वाचा, शिष्टबाहुद्वितयं, उभयतो निर्भयं, तत्प्रियं तं,
मुक्त्वा, तद्दत्तमानो, निजपुरमगमः, सानिरुद्धः, सहोषः ॥ ८ ॥

मुहुस्तावच्छक्रं, वरुणमजयो, नन्दहरणे,

यमं, बालानीतौ, दवदहनपाने, अनिलसखम् ।

विधिं, वत्सस्तेये, गिरिशमिह, बाणस्य समरे,

विभो, विश्वोत्कर्षी, तत्, अयमवतारो, जयति ते ॥ ९ ॥

द्विजरुषा, कृकलासवपुर्धरं, नृगनृपं, त्रिदिवालयमापयन् ।

निजजने, द्विजभक्तिं, अनुत्तमां, उपदिशन्, पवनेश्वर, पाहि माम् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये व्द्यशीतितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्र्यशीतितमं दशकम्

रामेऽथ, गोकुलगते, प्रमदाप्रसक्ते,
हूतानुपेतयमुनादमने, मदान्धे ।
स्वैरं समारमति, सेवकवादमूढः,
दूतं न्ययुङ्क्त तव, पौण्ड्रकवासुदेवः ॥ १ ॥

नारायणोऽहं, अवतीर्ण इहास्मि भूमौ,
धत्से किल त्वमपि, मामकलक्षणानि ।
उत्सृज्य तानि, शरणं व्रज मां, इति त्वां
दूतो जगाद, सकलैर्हसितः सभायाम् ॥ २ ॥

दूतेऽथ यातवति, यादवसैनिकैस्त्वं,
यातो ददर्शिथ, वपुः किल पौण्ड्रकीयम् ।
तापेन वक्षसि कृताङ्कं, अनल्प,
मूल्यश्रीकौस्तुभं, मकरकुण्डलपीतचेलम् ॥ ३ ॥

कालायसं, निजसुदर्शनं, अस्यतोऽस्य,
कालानलोत्करकिरेण, सुदर्शनेन ।

शीर्षं चकर्तिथ, ममर्दिथ चास्य सेनां,

तन्मित्रकाशिपशिरोऽपि, चकर्थ काश्याम् ॥ ४ ॥

जाड्येन, बालकगिराऽपि किल,

अहमेव श्रीवासुदेवः, इति रूढमतिश्चिरं सः ।

सायुज्यमेव, भवदैक्यधिया गतोऽभूत्,

को नाम, कस्य सुकृतं, कथमित्यवेयात् ॥ ५ ॥

काशीश्वरस्य तनयोऽथ, सुदक्षिणाख्यः,

शर्वं प्रपूज्य भवते, विहिताभिचारः ।

कृत्यानलं कमपि, बाणरणातिभीतैः,

भूतैः कथञ्चन वृतैः समं, अभ्यमुञ्चत् ॥ ६ ॥

तालप्रमाणचरणां, अखिलं दहन्तीं,

कृत्यां विलोक्य, चकितैः कथितोऽपि पौरैः ।

द्यूतोत्सवे, किमपि नो चलितो विभो त्वं,

पार्श्वस्थमाशु, विससर्जिथ, कालचक्रम् ॥ ७ ॥

अभ्यापतति, अमितधाम्नि, भवन्महास्त्रे,
हा हेति विद्रुतवती खलु, घोरकृत्या ।
रोषात् सुदक्षिणं, अदक्षिणचेष्टितं तं,
पुप्लोष, चक्रम् अपि काशिपुरीं अधाक्षीत् ॥ ८ ॥

स खलु विविदो, रक्षोघाते, कृतोपकृतिः पुरा,
तव तु कलया मृत्युं प्राप्तुं, तदा खलतां गतः ।
नरकसचिवो, देशक्लेशं सृजन्, नगरान्तिके,
झटिति हलिना, युध्यन्, अद्धा, पपात तलाहतः ॥ ९ ॥

साम्बं, कौरव्यपुत्रीहरण,नियमितं, सान्त्वनार्थी कुरूणां,
यातः, तद्वाक्यरोषोत्धृतकरिनगरो, मोचयामास रामः ।
ते घात्याः पाण्डवेयैः, इति यदुपृतनां, नामुचस्त्वं तदानीं,
तं त्वां दुर्बोधलीलं, पवनपुरपते, तापशान्त्यै निषेवे ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्र्यशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुरशीतितमं दशकम्

क्वचिदथ तपनोपरागकाले, पुरि निदधत्, कृतवर्मकामसूनू ।
यदुकुलमहिलावृतः सुतीर्थं, समुपगतोऽसि, समन्तपञ्चकाख्यम् ॥ १ ॥

बहुतरजनताहिताय तत्र, त्वमपि पुनन्, विनिमज्य तीर्थतोयम् ।
द्विजगणपरिमुक्तवित्तराशिः, सममिलथाः, कुरुपाण्डवादिमित्रैः ॥ २ ॥

तव खलु दयिताजनैः समेता, द्रुपदसुता, त्वयि, गाढभक्तिभारा ।
तदुदितभवदाहृतिप्रकारैः, अतिमुमुदे समं, अन्यभामिनीभिः ॥ ३ ॥

तदनु च भगवन्, निरीक्ष्य गोपान्, अतिकुतुकात्, उपगम्य मानयित्वा ।
चिरतरविरहातुराङ्गरेखाः, पशुपवधूः, सरसं, त्वमन्वयासीः ॥ ४ ॥

सपदि च भवदीक्षणोत्सवेन, प्रमुषितमानहृदां, नितम्बिनीनाम् ।
अतिरसपरिमुक्तकञ्चुलीके, परिचयहृद्यतरे, कुचे न्यलैषीः ॥ ५ ॥

रिपुजनकलहैः, पुनः पुनर्मे, समुपगतैः, इयती विलम्बनाऽभूत् ।
इति कृतपरिरम्भणे, त्वयि द्राक्, अतिविवशा खलु, राधिका निलिल्ये ॥
६ ॥

अपगतविरहव्यथास्तदा ताः, रहसि विधाय, ददाथ तत्वबोधम् ।
परमसुखचिदात्मकोऽहमात्मेति, उदयतु वः, स्फुटमेव चेतसीति ॥ ७ ॥

सुखरसपरिमिश्रितो वियोगः, किमपि पुराऽभवत्, उद्धवोपदेशैः ।
समभवत्, अमुतः परं तु तासां, परमसुखैक्यमयी, भवद्विचिन्ता ॥ ८ ॥

मुनिवरनिवहैः, तवाथ पित्रा, दुरितशमाय, शुभानि पृच्छ्यमानैः ।
त्वयि सति किमिदं, शुभान्तरैरिति, उरु हसितैरपि, याजितस्तदाऽसौ ॥ ९ ॥

सुमहति यजने, वितायमाने, प्रमुदितमित्रजने, सहैव गोपाः ।
यदुजनमहिताः, त्रिमासमात्रं, भवदनुषङ्गरसं, पुरेव भेजु : ॥ १० ॥

व्यपगमसमये, समेत्य राधां, दृढमुपगूह्य, निरीक्ष्य वीतखेदाम् ।
प्रमुदितहृदयः पुरं प्रयातः, पवनपुरेश्वर, पाहि मां गदेभ्यः ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुरशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चाशीतितमं दशकम्

ततो मगधभूभृता, चिरनिरोधसंक्लेशितं,

शताष्टकयुतायुतद्वितयं, ईश, भूमीभृताम् ।

अनाथशरणाय ते, कमपि पूरुषं, प्राहिणोत्,

अयाचत सः, मागधक्षपणमेव, किं भूयसा ॥ १ ॥

यियासुरभिमागधं, तदनु नारदोदीरितात्,

युधिष्ठिरमखोद्यमात्, उभयकार्यपर्याकुलः ।

विरुद्धजयिनोऽध्वरात्, उभयसिद्धिः, इति उद्धवे

शशंसुषि, निजैः समं, पुरमियेथ, यौधिष्ठिरीम् ॥ २ ॥

अशेषदयितायुते त्वयि, समागते, धर्मजो

विजित्य, सहजैर्महीं, भवदपाङ्ग, संवर्धितैः ।

श्रियं निरुपमां वहन्, अहह, भक्तदासायितं

भवन्तं, अयि मागधे प्रहितवान्, सभीमार्जुनम् ॥ ३ ॥

गिरिव्रजपुरं गताः, तदनु देव, यूयं त्रयः,

ययाच समरोत्सवं, द्विजमिषेण, तं मागधम् ।

अपूर्णसुकृतं त्वमुं, पवनजेन संग्रामयन्,

निरीक्ष्य, सह जिष्णुना, त्वमपि, राजयुद्ध्वा, स्थितः ॥ ४ ॥

अशान्तसमरोद्धतं, विटपपाटनासंज्ञया,
निपात्य जररस्सुतं, पवनजेन, निष्पाटितम् ।
विमुच्य नृपतीन् मुदा, समनुगृह्य भक्तिं परां,
दिदेशिथ, गतस्पृहानपि च, धर्मगुप्त्यै, भुवः ॥ ५ ॥

प्रचक्रुषि युधिष्ठिरे, तदनु, राजसूयाध्वरं,
प्रसन्नभृतकीभवत्, सकलराजक,व्याकुलम् ।
त्वमपि, अयि जगत्पते, द्विजपदावनेजादिकं,
चकर्थ, किमु कथ्यते, नृपवरस्य, भाग्योन्नतिः ॥ ६ ॥

ततः सवनकर्मणि प्रवरं, अग्र्यपूजाविधिं,
विचार्य, सहदेववागनुगतः, स धर्मात्मजः ।
व्यधत्त भवते मुदा सदसि, विश्वभूतात्मने,
तदा ससुरमानुषं, भुवनमेव, तृप्तिं, दधौ ॥ ७ ॥

ततः सपदि चेदिपो, मुनिनृपेषु, तिष्ठत्सु, अहो
सभाजयति, को जडः, पशुपदुर्दुरूटं, वटुम् ।
इति त्वयि, स दुर्वचोविततिं, उद्वमन्नासनात्,
उदापतत्, उदायुधः, समपतन्, अमुं पाण्डवाः ॥ ८ ॥

निवार्य निजपक्षगान्, अभिमुखस्य विद्वेषिणः,
त्वमेव जहृषे शिरो, दनुजदारिणा स्वारिणा ।
जनुस्त्रितयलब्धया, सततचिन्तया शुद्धधीः,
त्वया स परं, एकतां अधृत, योगिनां दुर्लभाम् ॥ ९ ॥

ततः सुमहिते त्वया क्रतुवरे, निरूढे जनः,
ययौ जयति धर्मजो, जयति कृष्णः, इत्यालपन्।
खलः स तु सुयोधनः, धुतमनाः, सपत्नश्रिया,
मयार्पितसभामुखे, स्थलजलभ्रमात्, अभ्रमीत् ॥ १० ॥

तदा हसितमुत्थितं, द्रुपदनन्दनाभीमयोः
अपाङ्गकलया विभो, किमपि तावत्, उज्जृम्भयन् ।
धराभरनिराकृतौ, सपदि नाम बीजं वपन्,
जनार्दन, मरुत्पुरीनिलय, पाहि मां आमयात् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चाशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षडशीतितमं दशकम्

साल्वो भैष्मीविवाहे, यदुबलविजितश्चन्द्रचूडाद्विमानं,
विन्दन् सौभं, स मायी, त्वयि वसति कुरून, त्वत्पुरीं अभ्यभाङ्क्षीत् ।
प्रद्युम्नस्तं निरुन्धन्, निखिलयदुभटैः, न्यग्रहीदुग्रवीर्यं,
तस्यामात्यं द्युमन्तं, व्यजनि च समरः, सप्तविंशत्यहान्तम् ॥ १ ॥

तावत्त्वं रामशाली, त्वरितमुपगतः खण्डितप्रायसैन्यं,
सौभेशं तं, न्यरुन्धाः, स च किल गदया, शार्ङ्गं, अभ्रंशयत्ते ।
मायातातं, व्यहिंसीत्, अपि तव पुरतः, तत्त्वयापि, क्षणार्धं,
न अज्ञायि, इत्याहुरेके, तत्, इदमवमतं, व्यास एव, न्यषेधीत् ॥ २ ॥

क्षिप्त्वा सौभं, गदाचूर्णितं, उदकनिधौ मङ्क्षु, साल्वेऽपि चक्रेण,
उत्कृत्ते दन्तवक्त्रः प्रसभं, अभिपतन्, अभ्यमुञ्चत्, गदां ते ।
कौमोदक्या हतोऽसावपि, सुकृतनिधिश्चैद्यवत्प्रापदैक्यं,
सर्वेषां, एष पूर्वं त्वयि धृतमनसां, मोक्षणार्थोऽवतारः ॥ ३ ॥

त्वय्यायातेऽथ जाते किल, कुरुसदसि, द्यूतके संयतायाः,
क्रन्दन्त्या याज्ञसेन्याः, सकरुणं अकृथाः, चेलमालां अनन्ताम् ।
अन्नान्तप्राप्त,शर्वांशजमुनि,चकितद्रौपदीचिन्तितोऽथ,
प्राप्तः, शाकान्नमश्नन्, मुनिगणमकृथाः, तृप्तिमन्तं वनान्ते ॥ ४ ॥

युद्धोद्योगेऽथ मन्त्रे, मिलति सति वृतः फल्गुनेन, त्वमेकः
कौरव्ये दत्तसैन्यः, करिपुरमगमो दौत्यकृत्, पाण्डवार्थम् ।
भीष्मद्रोणादिमान्ये, तव खलु वचने, धिक्कृते कौरवेण,
व्यावृण्वन् विश्वरूपं, मुनिसदसि, पुरीं क्षोभयित्वा, आगतोऽभूः ॥ ५ ॥

जिष्णोः, त्वं कृष्ण, सूतः खलु, समरमुखे, बन्धुघाते दयालुं,
खिन्नं तं वीक्ष्य वीरं, किमिदमयि सखे, नित्य एकोऽयं, आत्मा ।
को वध्यः कोऽत्र हन्ता तदिह, वधभियं प्रोज्झ्य, मय्यर्पितात्मा,
धर्म्यं युद्धं चरेति, प्रकृतिमनयथाः, दर्शयन् विश्वरूपम् ॥ ६ ॥

भक्तोत्तंसेऽथ भीष्मे, तव धरणिभरक्षेपकृत्यैकसक्ते,
नित्यं नित्यं विभिन्दति, अयुतसमधिकं, प्राप्तसादे च, पार्थे ।
निश्शस्त्रत्वप्रतिज्ञां विजहत्, अरिवरं धारयन्, क्रोधशालीव,
अधावन्, प्राञ्जलिं तं, नतशिरसं, अथो वीक्ष्य, मोदादपागाः ॥ ७ ॥

युद्धे द्रोणस्य, हस्तिस्थिररणभगदत्तेरितं, वैष्णवास्त्रं
वक्षसि, आधत्त चक्रस्थगितरविमहाः, प्रार्दयत्, सिन्धुराजम् ।
नागास्त्रे कर्णमुक्ते, क्षितिमवनमयन्, केवलं कृत्तमौलिं,
तत्रे, तत्रापि पार्थं, किमिव नहि भवान्, पाण्डवानामकार्षीत् ॥ ८ ॥

युद्धादौ तीर्थगामी, स खलु हलधरो, नैमिशक्षेत्रमृच्छन्,
अप्रत्युत्थायिसूतक्षयकृत्, अथ सुतं, तत्पदे कल्पयित्वा ।
यज्ञघ्नं वल्वलं पर्वणि, परिदलयन्, स्नाततीर्थो रणान्ते,
सम्प्राप्तो भीमदुर्योधनरणं, अशमं वीक्ष्य, यातः पुरीं ते ॥ ९ ॥

संसुप्तद्रौपदेयक्षपणहतधियं, द्रौणिमेत्य त्वदुक्त्या,
तन्मुक्तं ब्राह्ममस्त्रं समहृत, विजयो मौलिरत्नं च जह्रे ।
उच्छित्यै पाण्डवानां, पुनरपि च विशति, उत्तरागर्भं, अस्त्रे
रक्षन् अङ्गुष्ठमात्रः किल, जठरमगाः, चक्रपाणिः, विभो त्वम् ॥ १० ॥

धर्मौघं, धर्मसूनोः, अभिदधत्, अखिलं छन्दमृत्युः, स भीष्मः,
त्वां पश्यन्, भक्तिभूम्नैव हि, सपदि ययौ, निष्कलब्रह्मभूयम् ।
संयाज्य, अथ अश्वमेधैः, त्रिभिः, अतिमहितैः, धर्मजं पूर्णकामं,
स्म्प्राप्तो, द्वारकां त्वं, पवनपुरपते, पाहि मां, सर्वरोगात् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये षडशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्ताशीतितमं दशकम्

कुचेलनामा, भवतः सतीर्थ्यतां, गतः स सान्दीपनिमन्दिरे द्विजः ।

त्वदेकरागेण, धनादिनिस्स्पृहः, दिनानि निन्ये, प्रशमी गृहाश्रमी ॥ १ ॥

समानशीलाऽपि, तदीयवल्लभा, तथैव, नो चित्तजयं, समेयुषी ।

कदाचिदूचे बत, वृत्तिलब्धये, रमापतिः, किं न सखा निषेव्यते ॥ २ ॥

इतीरितोऽयं, प्रियया क्षुधार्तया, जुगुप्समानोऽपि, धने मदावहे ।

तदा, त्वदालोकनकौतुकाद्ययौ, वहन् पटान्ते, पृथुकान् उपायनम् ॥ ३ ॥

गतोऽयं, आश्चर्यमयीं भवत्पुरीं, गृहेषु, शैब्याभवनं, समेयिवान् ।

प्रविश्य, वैकुण्ठमिवाप निर्वृतिं, तवातिसम्भावनया तु, किं पुनः ॥ ४ ॥

प्रपूजितं तं, प्रियया च वीजितं, करे गृहीत्वाऽकथयः पुराकृतम् ।

यदिन्धनार्थं, गुरुदारचोदितैः, अपर्तुवर्षं, तत्, अमर्षि कानने ॥ ५ ॥

त्रपाजुषोऽस्मात्, पृथुकं बलादथ, प्रगृह्य मुष्टौ, सकृदाशिते त्वया ।

कृतं कृतं ननु, इयतेति संभ्रमात्, रमा किलोपेत्य, करं रुरोध ते ॥ ६ ॥

भक्तेषु भक्तेन, स मानितस्त्वया, पुरीं वसन्, एकनिशां महासुखम् ।
बत, अपरेद्युः, द्रविणं विना ययौ, विचित्ररूपः, तव खलु अनुग्रहः ॥ ७ ॥

यदि ह्ययाचिष्यं, अदास्यदच्युतः, वदामि भार्यां, किमिति व्रजन्नसौ ।
त्वदुक्तिलीलास्मित, मग्नधीः पुनः, क्रमादपश्यन्, मणिदीप्रमालयम् ॥ ८ ॥

किं मार्गविभ्रंशः, इति भ्रमन् क्षणं, गृहं प्रविष्टः, स ददर्श वल्लभाम् ।
सखीपरीतां, मणिहेमभूषितां, बुबोध च, त्वत्करुणां, महाद्भुताम् ॥ ९ ॥

स रत्नशालासु, वसन्नपि स्वयं, समुन्नमद्भक्तिभरः, अमृतं ययौ ।
त्वं, एवमापूरितभक्तवाञ्छितः, मरुत्पुराधीश, हरस्व मे गदान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्ताशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टाशीतितमं दशकम्

प्रागेव, आचार्यपुत्राहृतिनिशमनया, स्वीयषट्सूनुवीक्षां,

काङ्क्षन्त्याः, मातुरुक्त्या, सुतलभुवि बलिं प्राप्य, तेनार्चितस्त्वम् ।

धातुः शापात्, हिरण्यान्वितकशिपुभवान्, शौरिजान् कंसभग्नात्,

आनीयैनान् प्रदर्श्य, स्वपदमनयथाः, पूर्वपुत्रान्, मरीचेः ॥ १ ॥

श्रुतदेव इति श्रुतं द्विजेन्द्रं, बहुलाश्वं नृपतिं च, भक्तिपूर्णम् ।

युगपत्, त्वमनुग्रहीतुकामः, मिथिलां प्रापिथ, तापसैः समेतः ॥ २ ॥

गच्छन्, द्विमूर्तिः, उभयोः, युगपन्निकेतं, एकेन भूरिविभवैः, विहितोपचारः ।

अन्येन, तद्दिनभृतैश्च, फलौदनाद्यैः, तुल्यं प्रसेदिथ, ददाथ च, मुक्तिमाभ्याम् ॥ ३ ॥

भूयोऽथ द्वारवत्यां, द्विजतनयमृतिं, तत्प्रलापान् अपि त्वम्,

को वा दैवं निरुन्ध्यात्, इति किल कथयन्, विश्ववोढापि, असोढाः ।

जिष्णोर्गर्वं विनेतुं, त्वयि मनुजधिया, कुण्ठितां चास्य बुद्धिं,

तत्वारूढां, विधातुं, परमतमपदप्रेक्षणेनेति, मन्ये ॥ ४ ॥

नष्टा अष्टास्य पुत्राः पुनरपि तव तु, उपेक्षया कष्टवादः,

स्पष्टो जातो जनानां, अथ, तदवसरे, द्वारकां, आर, पार्थः ।

मैत्र्या तत्रोषितोऽसौ, नवमसुतमृतौ, विप्रवर्यप्ररोदं,

श्रुत्वा, चक्रे प्रतिज्ञां, अनुपहृतसुतः, सन्निवेक्ष्ये, कृशानुम् ॥ ५ ॥

मानी, स त्वामपृष्ट्वा, द्विजनिलयगतो, बाणजालैर्महास्त्रैः,

रुन्धानस्सूतिगेहं, पुनरपि सहसा, दृष्टनष्टे, कुमारे ।

याम्यां ऐन्द्रीं, तथाऽन्याः, सुरवरनगरीः, विद्ययाऽऽसाद्य सद्यः,

मोघोद्योगः पतिष्यन् हुतभुजि, भवता, सस्मितं, वारितोऽभूत् ॥ ६ ॥

सार्धं तेन प्रतीचीं दिशं, अतिजविना स्यन्दनेन, अभियातो

लोकालोकं, व्यतीतस्तिमिरभरमथो, चक्रधाम्ना, निरुन्धन् ।

चक्रांशुक्लिष्टदृष्टिं स्थितं, अथ विजयं, पश्य पश्येति, वारां

पारे त्वं, प्राददर्शः, किमपि हि तमसां, दूरदूरं पदं ते ॥ ७ ॥

तत्रासीनं, भुजङ्गाधिपशयनतले, दिव्यभूषायुधाद्यैः,

आवीतं, पीतचेलं, प्रतिनवजलदश्यामलं, श्रीमदङ्गम् ।

मूर्तीनां, ईशितारं, परमिह तिसृणां, एकमर्थं श्रुतीनां,

त्वामेव, त्वं परात्मन्, प्रियसखसहितो, नेमिथ, क्षेमरूपम् ॥ ८ ॥

युवां, मामेव द्वौ, अधिकविवृतान्तर्हिततया,

विभिन्नौ, सन्द्रष्टुं, स्वयमहमहार्षं, द्विजसुतान् ।

नयेतं, द्रागेतान्, इति खलु वितीर्णान् पुनरमून्,
द्विजाय, आदायादाः, प्रणुतमहिमा, पाण्डुजनुषा ॥ ९ ॥

एवं नानाविहारैः, जगदभिरमयन्, वृष्णिवंशं प्रपुष्णन्,
नीजानो यज्ञभेदैः, अतुलविहृतिभिः, प्रीणयन् एणनेत्राः ।
भूभारक्षेपदम्भात्, पदकमलजुषां मोक्षणाय अवतीर्णः,
पूर्णं ब्रह्मैव साक्षात्, यदुषु, मनुजतारूषितः, त्वं, व्यलासीः ॥ १० ॥

प्रायेण द्वारवत्याम अवृतत्, अयि तदा नारदः, त्वद्रसार्द्रः,
तस्मात्, लेभे कदाचित्खलु सुकृतनिधिः, त्वत्पिता तत्वबोधम् ।
भक्तानां, अग्रयायी, स च खलु मतिमान्, उद्धवस्त्वत्त एव
प्राप्तो, विज्ञानसारं, स किल जनहिताय, अधुनाऽऽस्ते बदर्याम् ॥११॥

सोऽयं कृष्णावतारो जयति, तव विभो, यत्र, सौहार्दभीति-,
स्नेहद्वेषानुराग,प्रभृतिभिः, अतुलैः अश्रमैः, योगभेदैः ।
आर्तिं तीर्त्वा समस्तां, अमृतपदमगुः, सर्वतः सर्वलोकाः,
स त्वं, विश्वार्तिशान्त्यै, पवनपुरपते, भक्तिपूर्त्यै च, भूयाः ॥१२॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टाशीतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोननवतितमं दशकम्

रमाजाने जाने, यदिह तव भक्तेषु विभवो,
न सद्यः, सम्पद्यः, तदिह मदकृत्वात् अशमिनाम् ।
प्रशान्तिं कृत्वैव, प्रदिशसि, ततः काममखिलं,
प्रशान्तेषु क्षिप्रं, न खलु भवदीये, च्युतिकथा ॥ १ ॥

सद्यः प्रसादरुषितान्, विधिशङ्करादीन्,
केचिद्विभो, निजगुणानुगुणं, भजन्तः ।
भ्रष्टा भवन्ति बत, कष्टं, अदीर्घदृष्ट्या,
स्पष्टं वृकासुरः, उदाहरणं, किलास्मिन् ॥ २ ॥

शकुनिजः स तु नारदमेकदा, त्वरिततोषमपृच्छदधीश्वरम् ।
स च दिदेश गिरीशमुपासितुं, न तु भवन्तं, अबन्धुं, असाधुषु ॥ ३ ॥

तपस्तप्त्वा घोरं स खलु, कुपितः सप्तमदिने,
शिरः छित्वा सद्यः, पुरहरमुपस्थाप्य, पुरतः ।
अतिक्षुद्रं रौद्रं शिरसि, करधानेन निधनं,
जगन्नाथाद्वव्रे, भवति विमुखानां, क्व शुभधीः ॥ ४ ॥

मोक्तारं बन्धमुक्तो, हरिणपतिरिव प्राद्रवत्सोऽथ रुद्रं,

दैत्यात् भीत्या स्म देवो, दिशि दिशि वलते, पृष्ठतो दत्तदृष्टिः ।

तूष्णीके सर्वलोके, तव पदमधिरोक्ष्यन्तं, उद्वीक्ष्य शर्वं,

दूरादेवाग्रतस्त्वं, पटुवटुवपुषा, तस्थिषे, दानवाय ॥ ५ ॥

भद्रं ते शाकुनेय, भ्रमसि किमधुना, त्वं पिशाचस्य वाचा,

सन्देहश्चेन्मदुक्तौ, तव किमु न करोषि, अङ्गुलीं, अङ्ग मौलौ ।

इत्थं त्वद्वाक्यमूढः, शिरसि कृतकरः, सोऽपतत्, छिन्नपातं,

भ्रंशो हि, एवं परोपासितुः, अपि च गतिः, शूलिनोऽपि त्वमेव ॥ ६ ॥

भृगुं किल सरस्वतीनिकटवासिनः, तापसाः,

त्रिमूर्तिषु समादिशन्, अधिकसत्वतां वेदितुम् ।

अयं पुनः, अनादरात् उदितरुद्धरोषे विधौ, हरेऽपि च,

जिहिंसिषौ, गिरिजया, धृते, त्वामगात् ॥ ७ ॥

सुप्तं रमाङ्कभुवि, पङ्कजलोचनं त्वां, विप्रे विनिघ्नति पदेन,
मुदोत्थितस्त्वम् ।

सर्वं क्षमस्व, मुनिवर्य, भवेत् सदा मे, त्वत्पादचिन्हं, इह
भूषणमित्यवादीः ॥ ८ ॥

निश्चित्य ते च सुदृढं, त्वयि बद्धभावा:, सारस्वता:, मुनिवरा:, दधिरे, विमोक्षम् ।

त्वामेवमच्युत, पुनश्च्युतिदोषहीनं, सत्त्वोच्चयैकतनुमेव, वयं भजाम: ॥ ९ ॥

जगत्सृष्ट्यादौ, त्वां, निगमनिवहैर्वन्दिभिरिव,

स्तुतं विष्णो, सच्चित्परमरस,निर्द्वैतवपुषम् ।

परात्मानं भूमन्, पशुपवनिता,भाग्यनिवहं,

परीतापश्रान्त्यै, पवनपुरवासिन्, परिभजे ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोननवतितमं दशकं समाप्तम् |

श्री हरये नम: | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये नवतितमं दशकम्

वृकभृगुमुनिमोहिन्यम्बरीषादि,वृत्तेषु, अयि, तव हि महत्वं, सर्वशर्वादि,जैत्रम् ।

स्थितमिह, परमात्मन्, निष्कलार्वागभिन्नं, किमपि तत्, अवभातं, तद्धि रूपं, तवैव ॥ १ ॥

मूर्तित्रयेश्वरसदाशिवपञ्चकं यत्, प्राहुः परात्मवपुरेव, सदाशिवोऽस्मिन् ।

तत्र, ईश्वरस्तु स विकुण्ठपदस्त्वमेव, त्रित्वं पुनर्भजसि, सत्यपदे त्रिभागे ॥ २ ॥

तत्रापि सात्त्विकतनुं, तव विष्णुमाहुः, धाता तु सत्वविरलो, रजसैव पूर्णः ।

सत्वोत्कटत्वमपि चास्ति तमोविकार,चेष्टादिकञ्च तव, शङ्करनाम्नि मूर्तौ ॥ ३ ॥

तं च त्रिमूर्त्यतिगतं, परपूरुषं त्वां, शर्वात्मनापि खलु, सर्वमयत्वहेतोः ।

शंसन्त्युपासनविधौ, तदपि स्वतस्तु त्वद्रूपं, इत्यतिदृढं, बहु नः प्रमाणम् ॥ ४ ॥

श्रीशङ्करोऽपि भगवान्, सकलेषु तावत्, त्वामेव मानयति, यो, न हि पक्षपाती ।

त्वन्निष्ठमेव स हि, नामसहस्रकादि व्याख्यात्, भवत्स्तुतिपरश्च, गतिं गतोऽन्ते ॥ ५ ॥

मूर्तित्रयातिगं, उवाच च, मन्त्रशास्त्रस्य, आदौ कलायसुषमं, सकलेश्वरं त्वाम् ।

ध्यानं च निष्कलमसौ, प्रणवे खलूक्त्वा, त्वामेव तत्र सकलं, निजगाद नान्यम् ॥ ६ ॥

समस्तसारे च पुराणसङ्ग्रहे, विसंशयं त्वन्महिमैव वर्ण्यते ।

त्रिमूर्तियुक्सत्यपदत्रिभागतः, परं पदं ते कथितं, न शूलिनः ॥ ७ ॥

यत् ब्राह्मकल्प इह, भागवतद्वितीय-स्कन्धोदितं, वपुरनावृतमीश धात्रे ।

तस्यैव नाम, हरिशर्वमुखं जगाद, श्रीमाधवः, शिवपरोऽपि पुराणसारे ॥ ८ ॥

ये स्वप्रकृत्यनुगुणाः, गिरिशं भजन्ते, तेषां फलं हि, दृढयैव, तदीयभक्त्या।

व्यासो हि तेन कृतवान्, अधिकारिहेतोः, स्कन्दादिकेषु, तव हानिवचोऽर्थवादैः ॥ ९ ॥

भूतार्थकीर्तिः, अनुवादविरुद्धवादौ, त्रेधा, अर्थवादगतयः खलु, रोचनार्थाः ।

स्कान्दादिकेषु, बहवोऽत्र विरुद्धवादाः, त्वत्तामसत्वपरिभूत्युपशिक्षणाद्याः ॥ १० ॥

यत् किञ्चिदपि, अविदुषाऽपि, विभो मयोक्तं, तन्मन्त्रशास्त्रवचनाद्यभिदृष्टमेव ।

व्यासोक्तिसारमयभागवतोपगीता, क्लेशान् विधूय, कुरु भक्तिभरं परात्मन् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये नवतितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकनवतितमं दशकम्

श्रीकृष्ण, त्वत्पदोपासनं, अभयतमं, बद्धमिथ्यार्थदृष्टेः,
मर्त्यस्य आर्तस्य मन्ये, व्यपसरति भयं, येन सर्वात्मनैव ।
यत्तावत् त्वत्प्रणीतान्, इह भजनविधीन्, आस्थितो मोहमार्गे,
धावन्नपि, आवृताक्षः, स्खलति न कुहचित्, देवदेव, अखिलात्मन् ॥ १ ॥

भूमन् कायेन वाचा, मुहुरपि मनसा, त्वद्बलप्रेरितात्मा,
यद्यद्कुर्वे समस्तं, तदिह परतरे, त्वय्यसौ, अर्पयामि ।
जात्यापि, इह श्वपाकः, त्वयि निहितमनःकर्मवागिन्द्रियार्थ-
प्राणः, विश्वं पुनीते, न तु विमुखमनाः, त्वत्पदात् विप्रवर्यः ॥ २ ॥

भीतिर्नाम, द्वितीयाद्भवति, ननु मनःकल्पितं च द्वितीयं,
तेन, ऐक्याभ्यासशीलो, हृदयमिह, यथाशक्ति, बुद्ध्या, निरुन्ध्याम् ।
मायाविद्धे तु तस्मिन् पुनरपि, न तथा भाति, मायाधिनाथं,
तत् त्वां भक्त्या महत्या, सततमनुभजन्, ईश, भीतिं, विजह्याम् ॥ ३ ॥

भक्तेः, उत्पत्तिवृद्धी, तव चरणजुषां, सङ्गमेनैव पुंसां,
आसाद्ये पुण्यभाजां, श्रिय इव जगति, श्रीमतां, सङ्गमेन ।

तत्सङ्गो देव, भूयान्मम खलु सततं, तन्मुखात्, उन्मिषद्भिः,
त्वन्माहात्म्यप्रकारैः, भवति च सुदृढा, भक्तिः, उद्‌धूतपापा ॥ ४ ॥

श्रेयोमार्गेषु भक्तौ, अधिकबहुमतिः, जन्मकर्माणि, भूयो
गायन्, क्षेमाणि नामान्यपि, तदुभयतः, प्रद्रुतं, प्रद्रुतात्मा ।
उद्यद्धासः कदाचित्, कुहचिदपि रुदन्, क्वापि गर्जन् प्रगायन्,
उन्मादीव प्रनृत्यन्, अयि कुरु करुणां, लोकबाह्यश्चरेयम् ॥ ५ ॥

भूतान्येतानि भूतात्मकमपि सकलं, पक्षिमत्स्यान् मृगादीन्,
मर्त्यान् मित्राणि शत्रूनपि, यमितमतिस्त्वन्मयानि, आनमानि ।
त्वत्सेवायां हि सिद्ध्येत्, मम, तव कृपया, भक्तिदार्ढ्यं, विरागः,
त्वत्तत्वस्यावबोधोऽपि च, भुवनपते, यत्नभेदं, विनैव ॥ ६ ॥

नो मुह्यन् क्षुत्तृडाद्यैः, भवसरणिभवैः, त्वन्निलीनाशयत्वात्,
चिन्तासातत्यशाली, निमिषलवमपि, त्वत्पदात्, अप्रकम्पः ।
इष्टानिष्टेषु, तुष्टिव्यसनविरहितो, मायिकत्वावबोधात्,
ज्योत्स्नाभिः, त्वन्नखेन्दोः, अधिकशिशिरितेन, आत्मना, सञ्चरेयम् ॥ ७ ॥

भूतेषु, एषु त्वदैक्यस्मृतिसमधिगतौ, नाधिकारोऽधुना चेत्,
त्वत्प्रेम, त्वत्कमैत्री, जडमतिषु कृपा, द्विट्सु भूयात्, उपेक्षा ।
अर्चायां वा समर्चाकुतुकं, उरुतरश्रद्धया, वर्धतां मे,
त्वत्संसेवी, तथापि, द्रुतमुपलभते, भक्तलोकोत्तमत्वम् ॥ ८ ॥

आवृत्य त्वत्स्वरूपं, क्षितिजलमरुदाद्यात्मना, विक्षिपन्ती,
जीवान्, भूयिष्ठकर्मावलिविवश,गतीन्, दुःखजाले, क्षिपन्ती ।
त्वन्माया, माभिभून्मां, अयि भुवनपते, कल्पते तत्प्रशान्त्यै,
त्वत्पादे, भक्तिरेवेत्यवदत्, अयि विभो, सिद्धयोगी प्रबुद्धः ॥ ९ ॥

दुःखानि, आलोक्य जन्तुषु, अलं, उदितविवेकः, अहं, आचार्यवर्यात्,
लब्ध्वा, त्वद्रूपतत्वं, गुणचरित,कथाद्युद्भवत्, भक्तिभूमा ।
मायामेनां तरित्वा, परमसुखमये, त्वत्पदे, मोदिताहे,
तस्यायं, पूर्वरङ्गः पवनपुरपते, नाशय, अशेषरोगान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकनवतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये द्विनवतितमं दशकम्

वेदैस्सर्वाणि कर्माणि, अफलपरतया, वर्णितानीति बुध्वा,
तानि त्वय्यर्पितान्येव हि, समनुचरन्, यानि, नैष्कर्म्यमीश ।
मा भूत्, वेदैर्निषिद्धे, कुहचिदपि मनःकर्मवाचां, प्रवृत्ति-
र्दुर्वर्जं चेत्, अवाप्तं, तदपि खलु, भवति अर्पये चित्प्रकाशे ॥ १ ॥

यस्त्वन्यः कर्मयोगस्तव भजनमयः, तत्र चाभीष्टमूर्तिं,
हृद्यां सत्वैकरूपां, दृषदि हृदि मृदि, क्वापि वा, भावयित्वा ।
पुष्पैः, गन्धैः, निवेद्यैः, अपि च विरचितैः शक्तितो भक्तिपूतैः,
नित्यं वर्यां सपर्यां, विदधत्, अयि विभो, त्वत्प्रसादं भजेयम् ॥ २ ॥

स्त्रीशूद्राः, त्वत्कथादिश्रवणविरहिताः, आसतां, ते दयार्हाः,
त्वत्पादासन्नयातान्, द्विजकुलजनुषो, हन्त, शोचामि, अशान्तान् ।
वृत्यर्थं ते यजन्तः, बहुकथितमपि, त्वामनाकर्णयन्तः,
दृप्ताः, विद्याभिजात्यैः, किमु न विदधते, तादृशं, मा कृथा माम् ॥ ३ ॥

पापोऽयं कृष्ण,राम, इत्यभिलपति, निजं गूहितुं दुश्चरित्रं,
निर्लज्जस्यास्य वाचा, बहुतरकथनीयानि मे, विघ्नितानि ।

भ्राता मे वन्ध्यशीलो, भजति किल सदा विष्णुं, इत्थं बुधान्, ते
निन्दन्ति, उच्चैर्हसन्ति, त्वयि निहितमतीन्, तादृशं, मा कृथा माम् ॥ ४ ॥

श्वेतच्छायं कृते त्वां, मुनिवरवपुषं प्रीणयन्ते, तपोभिः,
त्रेतायां, स्रुक्स्रुवाद्यङ्कितं, अरुणतनुं, यज्ञरूपं, यजन्ते ।
सेवन्ते तन्त्रमार्गैः, विलसदरिगदं द्वापरे, श्यामलाङ्गं,
नीलं सङ्कीर्तनाद्यैः, इह कलिसमये, मानुषाः, त्वां भजन्ते ॥ ५ ॥

सोऽयं कालेयकालो जयति, मुररिपो यत्र, सङ्कीर्तनाद्यैः
निर्यत्नैरेव मार्गैः, अखिलदा, न चिरात्, त्वत्प्रसादं भजन्ते ।
जाताः, त्रेताकृतादावपि हि किल, कलौ सम्भवं कामयन्ते,
दैवात्, तत्रैव जातान्, विषयविषरसैः, मा विभो, वञ्चयास्मान् ॥ ६ ॥

भक्तास्तावत्कलौ स्युः, द्रमिलभुवि ततो भूरिशः, तत्र चोच्चैः,
कावेरीं, ताम्रपर्णीं, अनु किल कृतमालां च, पुण्यां, प्रतीचीम् ।
हा मामपि, एतत् अन्तर्भवं, अपि च विभो, किञ्चिदञ्चद्रसं त्वयि,
आशापाशैर्निबध्य, भ्रमय न, भगवन्, पूरय, त्वन्निषेवाम् ॥ ७ ॥

दृष्ट्वा धर्मद्रुहं तं, कलिमपकरुणं, प्राङ्गहीक्षित् परीक्षित्,
हन्तुं व्याकृष्टखड्गोऽपि, न विनिहतवान्, सारवेदी, गुणांशात् ।
त्वत्सेवादि, आशु सिद्ध्येत्, असदिह न तथा, त्वत्परे चैष भीरुः,
यत्तु प्रागेव रोगादिभिः, अपहरते, तत्र हा, शिक्षयैनम् ॥ ८ ॥

गङ्गा गीता च गायत्री, अपि च तुलसिका, गोपिकाचन्दनं तत्,
सालग्रामाभिपूजा, परपुरुष तथा, एकादशी, नामवर्णाः ।
एतानि, अष्टापि अयत्नानि, अयि कलिसमये, त्वत्प्रसादप्रवृद्ध्या,
क्षिप्रं मुक्तिप्रदानीति, अभिदधुः, ऋषयः, तेषु, मां सज्जयेथाः ॥ ९ ॥

देवर्षीणां पितृणां, अपि न पुनः, ऋणी किङ्करो वा, स भूमन्,
योऽसौ, सर्वात्मना, त्वां, शरणमुपगतः, सर्वकृत्यानि, हित्वा ।
तस्योत्पन्नं विकर्माणि, अखिलमपनुदस्येव, चित्तस्थितस्त्वं,
तन्मे पापोत्थतापान्, पवनपुरपते, रुन्धि, भक्तिं प्रणीयाः ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये द्विनवतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये त्रिनवतितमं दशकम्

बन्धुस्नेहं विजह्यां, तव हि करुणया, त्वय्युपावेशितात्मा,
सर्वं त्यक्त्वा चरेयं, सकलमपि जगद्वीक्ष्य, मायाविलासम् ।
नानात्वात्, भ्रान्तिजन्यात्, सति खलु गुणदोषावबोधे, विधिर्वा
व्यासेधो वा, कथं तौ, त्वयि निहितमतेः, वीतवैषम्यबुद्धेः ॥ १ ॥

क्षुत्तृष्णालोपमात्रे, सततकृतधियो जन्तवः सन्ति, अनन्ताः,
तेभ्यो, विज्ञानवत्वात्, पुरुष इह वरः, तज्जनिः, दुर्लभैव ।
तत्रापि आत्मात्मनस्स्यात्, सुहृदपि च रिपुः, यस्त्वयि न्यस्तचेताः,
तापोच्छित्तेरुपायं स्मरति, स हि सुहृत्, स्वात्मवैरी, ततोऽन्यः ॥ २ ॥

त्वत्कारुण्ये प्रवृत्ते, क इव नहि गुरुः, लोकवृत्ते विभूमन्,
सर्वाक्रान्तापि भूमिः, नहि चलति ततः, सत्क्षमां, शिक्षयेयम् ।
गृह्णीयामीश, तत्तद्विषयपरिचयेऽपि, अप्रसक्तिं समीरात्,
व्याप्तत्वं चात्मनो मे, गगनगुरुवशात्, भातु निर्लेपता च ॥ ३ ॥

स्वच्छः स्यां पावनोऽहं, मधुर उदकवत्, वह्निवत्, मा स्म गृह्णां,
सर्वान्नीनोऽपि दोषं, तरुषु तमिव मां, सर्वभूतेषु अवेयाम् ।

पुष्टिर्नष्टि: कलानां, शशिन इव तनो:, नात्मनोऽस्तीति विद्यां,
तोयादिव्यस्तमार्ताण्डवत्, अपि च तनुषु, एकतां त्वत्प्रसादात् ॥ ४ ॥

स्नेहात्, व्याधास्तपुत्रव्यसनमृतकपोतायितो, मा स्म भूवं
प्राप्तं, प्राश्नन् सहेय क्षुधमपि शयुवत्, सिन्धुवत्स्यां अगाध: ।
मा पप्तं योषिदादौ, शिखिनि शलभवत्, भृङ्गवत्सारभागी,
भूयासं, किन्तु, तद्वत्, धनचयनवशात्, माहमीश, प्रणेशम् ॥ ५ ॥

मा बद्ध्यासं तरुण्या, गज इव वशया, नार्जयेयं धनौघं,
हर्तान्यस्तं हि, माध्वीहर इव, मृगवत्, मा मुहं, ग्राम्यगीतै: ।
नात्यासज्जेय भोज्ये, झष इव बडिशे, पिङ्गलावत् निराश:
सुप्यां, भर्तव्ययोगात्, कुरर इव विभो, सामिष:, अन्यै:, न हन्यै ॥ ६ ॥

वर्तेय त्यक्तमान: सुखम्, अतिशिशुवत्, निस्सहायश्चरेयं,
कन्याया एकशेषो, वलय इव विभो, वर्जितान्योन्य,घोष: ।
त्वच्चित्तो नावबुध्यै परं, इषुकृदिव क्ष्माभृदायानघोषं,
गेहेषु, अन्यप्रणीतेषु, अहिरिव निवसानि, उन्दुरोर्मन्दिरेषु ॥ ७ ॥

त्वय्येव त्वत्कृतं त्वं क्षपयसि जगदिति, ऊर्णनाभात् प्रतीयां,
त्वच्चिन्ता, त्वत्स्वरूपं कुरुते, इति दृढं शिक्षये, पेशकारात् ।
विड्भस्मात्मा च देहो भवति गुरुवरो, यो विवेकं विरक्तिं
धत्ते, सञ्चिन्त्यमानो मम तु, बहुरुजापीडितोऽयं, विशेषात् ॥ ८ ॥

ही ही मे देहमोहं त्यज, पवनपुराधीश, यत्प्रेमहेतोः,
गेहे वित्ते कलत्रादिषु च, विवशिताः, त्वत्पदं, विस्मरन्ति ।
सोऽयं वह्नेश्शुनो वा, परमिह परतः साम्प्रतञ्च, अक्षिकर्ण-
त्वग्जिह्वाद्या विकर्षन्ति, अवशं, अत इतः, कोऽपि न, त्वत्पदाब्जे ॥ ९ ॥

दुर्वारो देहमोहो यदि पुनः, अधुना तर्हि निश्शेषरोगान्
हृत्वा, भक्तिं द्रढिष्ठां कुरु, तव पदपङ्केरुहे, पङ्कजाक्ष ।
नूनं नानाभवान्ते, समधिगतमिमं, मुक्तिदं विप्रदेहं,
क्षुद्रे हा हन्त, मा मा क्षिप, विषयरसे, पाहि मां मारुतेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये त्रिनवतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये चतुर्नवतितमं दशकम्

शुद्धाः, निष्कामधर्मैः प्रवरगुरुगिरा, तत्स्वरूपं परं ते,
शुद्धं, देहेन्द्रियादिव्यपगतं, अखिलव्याप्तं, आवेदयन्ते ।
नानात्वस्थौल्यकार्श्यादि तु, गुणजवपुस्सङ्गतोऽध्यासितं ते,
वह्नेः, दारुप्रभेदेष्विव, महदणुतादीप्तता,शान्ततादि ॥ १ ॥

आचार्याख्याधरस्थारणि,समनुमिलच्छिष्यरूपोत्तरार-
ण्यावेधोद्भासितेन, स्फुटतर,परिबोधाग्निना, दह्यमाने ।
कर्मालीवासनातत्कृत,तनुभुवनभ्रान्तिकान्तारपूरे,
दाह्याभावेन, विद्याशिखिनि च विरते, त्वन्मयी खलु, अवस्था ॥ २ ॥

एवं त्वत्प्राप्तितः, अन्यो नहि खलु, निखिलक्लेशहानेरुपायः,
नैकान्तात्यन्तिकास्ते कृषिवत्, अगदषाड्गुण्यषट्कर्म,योगाः ।
दुर्वैकल्यैरकल्या अपि, निगमपथाः, तत्फलान्यप्यवाप्ताः,
मत्ताः, त्वां विस्मरन्तः प्रसजति पतने, यान्त्यनन्तान्, विषादान्॥ ३ ॥

त्वल्लोकादन्यलोकः क्वनु, भयरहितो यत् परार्धद्वयान्ते,
त्वद्भीतस्सत्यलोकेऽपि, न सुखवसतिः पद्मभूः, पद्मनाभ ।

एवं भावे तु, अधर्मार्जितबहुतमसां का कथा, नारकाणां,
तन्मे त्वं छिन्धि बन्धं, वरद, कृपणबन्धो, कृपापूर,सिन्धो ॥ ४ ॥

याथार्थ्यात्त्वन्मयस्यैव हि, मम न विभो वस्तुतो, बन्धमोक्षौ,
मायाविद्यातनुभ्यां, तव तु विरचितौ, स्वप्नबोधोपमौ तौ ।
बद्धे जीवद्विमुक्तिं, गतवति च भिदा तावती, तावदेको
भुङ्क्ते, देहद्रुमस्थो, विषयफलरसान्, नापरो निर्व्यथात्मा ॥ ५ ॥

जीवन्मुक्तत्वं, एवंविधमिति वचसा किं फलं, दूरदूरे,
तन्नाम, अशुद्धबुद्धेः, न च लघु मनसश्शोधनं, भक्तितोऽन्यत् ।
तन्मे विष्णो कृषीष्ठाः, त्वयि कृतसकलप्रार्पणं भक्तिभारं,
येन स्यां मङ्क्षु, किञ्चिद् गुरुवचनमिलत्त्वत्प्रबोधः, त्वदात्मा ॥ ६ ॥

शब्दब्रह्मण्यपीह प्रयतितमनसः, त्वां न जानन्ति केचित्,
कष्टं, वन्ध्यश्रमास्ते चिरतरमिह गां बिभ्रते, निष्प्रसूतिम् ।
यस्यां विश्वाभिरामाः, सकलमलहराः, दिव्यलीलावताराः,
सच्चित्सान्द्रं च रूपं, तव न निगदितं, तां न वाचं, भ्रियासम् ॥ ७ ॥

यो यावान् यादृशो वा त्वमिति किमपि, नैवावगच्छामि भूमन्,
एवं च, अनन्यभावस्त्वदनुभजनमेव, आद्रिये, चैद्यवैरिन् ।
त्वल्लिङ्गानां त्वदङ्घ्रिप्रियजनसदसां, दर्शनस्पर्शनादिः,
भूयान्मे, त्वत्प्रपूजानतिनुतिगुणकर्मानुकीर्त्यादरोऽपि ॥ ८ ॥

यद्यल्लभ्येत तत्तत्तव समुपहृतं देव, दासोऽस्मि तेऽहं,
त्वद्गेहोन्मार्जनाद्यं भवतु, मम, मुहुः कर्म निर्मायमेव ।
सूर्याग्निब्राह्मणात्मादिषु, लसितचतुर्बाहुमाराधये त्वां,
त्वत्प्रेमार्द्रत्वरूपो, मम सततमभिष्यन्दतां, भक्तियोगः ॥ ९ ॥

ऐक्यं ते, दानहोमव्रतनियम,तपस्सांख्ययोगैर्दुरापं,
त्वत्सङ्गेनैव गोप्यः किल, सुकृतितमा प्रापुः, आनन्दसान्द्रम् ।
भक्तेषु अन्येषु भूयस्स्वपि, बहुमनुषे, भक्तिमेव त्वमासां,
तन्मे त्वद्भक्तिमेव द्रढय, हर गदान्, कृष्ण, वातालयेश ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये चतुर्नवतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये पञ्चनवतितमं दशकम्

आदौ हैरण्यगर्भीं तनुं, अविकलजीवात्मिकामास्थितस्त्वं,
जीवत्वं प्राप्य मायागुणगणखचितो, वर्तसे विश्वयोने ।
तत्रोद्वृद्धेन सत्वेन तु, गुणयुगलं भक्तिभावं गतेन,
छित्वा सत्वं च हित्वा पुनः, अनुपहितो वर्तिताहे, त्वमेव ॥ १ ॥

सत्वोन्मेषात् कदाचित् खलु विषयरसे, दोषबोधेऽपि भूमन्,
भूयोऽप्येषु प्रवृत्तिः, सतमसि रजसि प्रोद्धते, दुर्निवारा ।
चित्तं तावद्गुणाश्च ग्रथितं, इह मिथः, तानि सर्वाणि रोद्धुं,
तुर्ये त्वय्येकभक्तिश्शरणमिति भवान्, हंसरूपी न्यगादीत् ॥ २ ॥

सन्ति श्रेयांसि भूयांसि, अपि रुचिभिदया कर्मिणां, निर्मितानि,
क्षुद्रानन्दाश्च सान्ताः, बहुविधगतयः कृष्ण, तेभ्यो भवेयुः ।
त्वं चाचख्याथ सख्ये, ननु महिततमां श्रेयसां, भक्तिमेकां,
त्वद्भक्त्यानन्दतुल्यः खलु, विषयजुषां, सम्मदः केन वा स्यात् ॥ ३ ॥

त्वत्भक्त्या तुष्टबुद्धेः, सुखमिह चरतो विच्युताशस्य च, आशाः,
सर्वाः स्युः सौख्यमय्यः, सलिलकुहरगस्येव, तोयैकमय्यः ।

सोऽयं खलु, इन्द्रलोकं कमलजभवनं, योगसिद्धीश्च हृद्याः,
नाकाङ्क्षत्येतदास्तां, स्वयमनुपतिते, मोक्षसौख्येपि, अनीहः ॥ ४ ॥

त्वद्भक्तो बाध्यमानोऽपि च, विषयरसैः, इन्द्रियाशान्तिहेतोः,
भक्त्यैव, आक्रम्यमाणैः पुनरपि खलु तैः, दुर्बलैः, नाभिजय्यः ।
सप्तार्चिः, दीपितार्चिर्दहति किल यथा भूरिदारुप्रपञ्चं,
त्वद्भक्त्योघे तथैव प्रदहति दुरितं, दुर्मदः क्वेन्द्रियाणाम् ॥ ५ ॥

चित्तार्द्रीभावं, उच्चैर्वपुषि च पुलकं, हर्षवाष्पं च हित्वा,
चित्तं शुद्ध्येत्कथं वा, किमु बहुतपसा, विद्यया वीतभक्तेः ।
त्वद्गाथास्वादसिद्धाञ्जन,सततमरीमृज्यमानोऽयमात्मा,
चक्षुर्वत्तत्वसूक्ष्मं भजति, न तु तथा, अभ्यस्तया, तर्ककोट्या ॥ ६ ॥

ध्यानं ते शीलयेयं, समतनुसुखबद्धासनो, नासिकाग्र-
न्यस्ताक्षः, पूरकाद्यैः, जितपवनपथः, चित्तपद्मं तु, अवाञ्चम् ।
ऊर्ध्वाग्रं भावयित्वा, रविविधुशिखिनः, संविचिन्त्य, उपरिष्टात्
तत्रस्थं भावये त्वां, सजलजलधरश्यामलं, कोमलाङ्गम् ॥ ७ ॥

आनीलश्लक्ष्णकेशं, ज्वलितमकरसत्कुण्डलं, मन्दहास-

स्यन्दार्द्रं, कौस्तुभश्रीपरिगत,वनमालोरु,हाराभिरामम् ।

श्रीवत्साङ्कं सुबाहुं, मृदुलसदुदरं, काञ्चनच्छायचेलं,

चारुस्निग्धोरुं, अम्भोरुहललितपदं, भावयेऽहं भवन्तम् ॥ ८ ॥

सर्वाङ्गेषु, अङ्ग, रङ्गत्कुतुकं, इति मुहुर्धारयन्, ईश चित्तं

तत्रापि, एकत्र युञ्जे, वदनसरसिजे, सुन्दरे मन्दहासे ।

तत्रालीनं तु चेतः परमसुखचिदद्वैतरूपे, वितन्वन्,

अन्यन्नो चिन्तयेयं, मुहुरिति, समुपारूढयोगो, भवेयम् ॥ ९ ॥

इत्थं त्वद्ध्यानयोगे सति पुनः, अणिमाद्यष्टसंसिद्धयस्ताः,

दूरश्रुत्यादयोऽपि हि, अहमहमिकया, सम्पतेयुः, मुरारे ।

त्वत्सम्प्राप्तौ विलम्बावहं, अखिलमिदं नाद्रिये, कामयेऽहं

त्वामेव, आनन्दपूर्णं, पवनपुरपते पाहि मां, सर्वतापात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये पञ्चनवतितमं दशकं समाप्तम् |

श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये षण्णवतितमं दशकम्

त्वं हि ब्रह्मैव साक्षात् परं, उरुमहिमन्, अक्षराणामकारः,
तारो मन्त्रेषु, राज्ञां मनुरसि, मुनिषु त्वं भृगुः, नारदोऽपि ।
प्रह्लादो दानवानां, पशुषु च सुरभिः, पक्षिणां वैनतेयः,
नागानां, अस्यनन्तः, सुरसरिदपि च स्रोतसां, विश्वमूर्ते ॥ १ ॥

ब्रह्मण्यानां बलिस्त्वं, क्रतुषु च जपयज्ञोऽसि, वीरेषु पार्थः,
भक्तानामुद्धवस्त्वं, बलमसि बलिनां, धाम तेजस्विनां त्वम् ।
नास्त्यन्तस्त्वद्विभूतेः, विकसदतिशयं वस्तु सर्वं त्वमेव,
त्वं जीवस्त्वं प्रधानं, यदिह भवदृते, तन्न किञ्चित्, प्रपञ्चे ॥ २ ॥

धर्मं वर्णाश्रमाणां, श्रुतिपथविहितं, त्वत्परत्वेन भक्त्या,
कुर्वन्तः, अन्तर्विरागे विकसति, शनकैः सन्त्यजन्तो, लभन्ते ।
सत्तास्फूर्तिप्रियत्वात्मकं, अखिलपदार्थेषु भिन्नेष्वभिन्नं,
निर्मूलं विश्वमूलं, परममहमिति, त्वद्विबोधं, विशुद्धम् ॥ ३ ॥

ज्ञानं कर्मापि भक्तिः, त्रितयमिह भवत्प्रापकं, तत्र तावत्,
निर्विण्णानां, अशेषे विषये, इह भवेत्, ज्ञानयोगे अधिकारः ।

सक्तानां कर्मयोग:, त्वयि हि विनिहित:, ये तु नात्यन्तसक्ता:,

नापि अत्यन्तं विरक्ता:, त्वयि च धृतरसा:, भक्तियोगो हि, अमीषाम् ॥ ४ ॥

ज्ञानं त्वद्भक्ततां वा लघु, सुकृतवशान्मर्त्यलोके, लभन्ते

तस्मात्तत्रैव जन्म, स्पृहयति भगवन्, नाकगो, नारको वा ।

आविष्टं मां तु दैवात्, भवजलनिधिपोतायिते, मर्त्यदेहे

त्वं, कृत्वा कर्णधारं, गुरुं, अनुगुणवातायित:, तारयेथा: ॥ ५ ॥

अव्यक्तं मार्गयन्त:, श्रुतिभिरपि नयै:, केवलज्ञानलुब्धा:,

क्लिश्यन्ते, अतीव, सिद्धिं बहुतरजनुषां अन्त एव, आप्नुवन्ति ।

दूरस्थ: कर्मयोगोऽपि च परं, अफले नन्वयं भक्तियोगस्तु,

आमूलादेव हृद्य:, त्वरितं, अयि भवत्प्रापको, वर्धतां मे ॥ ६ ॥

ज्ञानायैवातियत्नं मुनि:, अपवदते ब्रह्मतत्वं तु शृण्वन्,

गाढं, त्वत्पादभक्तिं शरणमयति य:, तस्य मुक्ति: कराग्रे ।

त्वद्ध्यानेऽपीह तुल्या पुन:, असुकरता, चित्तचाञ्चल्यहेतो:,

अभ्यासात्, आशु शक्यं तदपि वशयितुं, त्वत्कृपा,चारुताभ्याम् ॥ ७ ॥

निर्विण्णः कर्ममार्गे खलु, विषमतमे त्वत्कथादौ च, गाढं
जातश्रद्धोऽपि कामान्, अयि भुवनपते, नैव शक्नोमि हातुम् ।
तद्भूयो निश्चयेन, त्वयि निहितपराः, दोषबुद्ध्या भजन् तान्,
पुष्णीयां भक्तिमेव, त्वयि हृदयगते, मङ्क्षु, नङ्क्ष्यन्ति सङ्गाः ॥ ८ ॥

कश्चित्, क्लेशार्जितार्थक्षयविमलमतिः, नुद्यमानो जनौघैः,
प्रागेवं प्राह विप्रः, न खलु, मम जनः, कालकर्मग्रहा वा ।
चेतो मे दुःखहेतुः, तदिह गुणगणं भावयत्, सर्वकारी-
त्युक्त्वा, शान्तो गतस्त्वां, मम च कुरु विभो, तादृशीं, चित्तशान्तिम् ॥ ९ ॥

ऐलः प्राक्, ऊर्वशीं प्रति, अतिविवशमनाः, सेवमानश्चिरं तां,
गाढं, निर्विद्य भूयो, युवतिसुखमिदं, क्षुद्रमेवेति, गायन् ।
त्वद्भक्तिं प्राप्य पूर्णः, सुखतरमचरत्, तद्वदुद्धूयसङ्गं,
भक्तोत्तंसं क्रिया मां, पवनपुरपते, हन्त मे, रुन्धि रोगान् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये षण्णवतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये सप्तनवतितमं दशकम्

त्रैगुण्याद्भिन्नरूपं भवति हि भुवने, हीनमध्योत्तमं यत्,
ज्ञानं श्रद्धा च कर्ता, वसतिरपि सुखं, कर्म च, आहारभेदाः ।
त्वत्क्षेत्रत्वन्निषेवादि तु, यदिह पुनः, त्वत्परं तत्तु सर्वं,
प्राहुर्नैर्गुण्यनिष्ठं, तदनुभजनतो, मङ्क्षु, सिद्धो भवेयम् ॥ १ ॥

त्वय्येव न्यस्तचित्तः, सुखमयि विचरन्, सर्वचेष्टास्त्वदर्थं,
त्वद्भक्तैः सेव्यमानान्, अपि चरितचरान्, आश्रयन्, पुण्यदेशान् ।
दस्यौ विप्रे मृगादिष्वपि च, सममतिः, मुच्यमानावमान-
स्पर्धासूयादिदोषः, सततमखिलभूतेषु, संपूजये त्वाम् ॥ २ ॥

त्वद्भावो यावदेषु स्फुरति, न विशदं तावदेवं हि, उपास्तिं
कुर्वन्, ऐकात्म्यबोधे झटिति विकसति, त्वन्मयोऽहं चरेयम् ।
त्वद्धर्मस्यास्य तावत्, किमपि न भगवन्, प्रस्तुतस्य प्रणाशः,
तस्मात्, सर्वात्मनैव प्रदिश मम विभो, भक्तिमार्गं, मनोज्ञम् ॥ ३ ॥

तं चैनं भक्तियोगं द्रढयितुं, अयि मे साध्यं, आरोग्यमायुः,
दिष्ट्या तत्रापि सेव्यं, तव चरणमहो, भेषजायेव, दुग्धम् ।

मार्कण्डेयो हि पूर्वं, गणकनिगदितद्वादशाब्दायुः, उच्चैः
सेवित्वा वत्सरं त्वां, तव भटनिवहैः, द्रावयामास, मृत्युम् ॥ ४ ॥

मार्कण्डेयश्चिरायुः, स खलु पुनरपि, त्वत्परः, पुष्पभद्रा-
तीरे, निन्ये तपस्यन्, अतुलसुखरतिः, षट् तु मन्वन्तराणि ।
देवेन्द्रः सप्तमस्तं, सुरयुवतिमरुन्मन्मथैः, मोहयिष्यन्,
योगोष्मप्लुष्यमाणैः, न तु पुनरशकत्, त्वज्जनं, निर्जयेत् कः ॥ ५ ॥

प्रीत्या नारायणाख्यस्त्वमथ नरसखः, प्राप्तवानस्य पार्श्वं,
तुष्ट्या तोष्टूयमानः, स तु विविधवरैः, लोभितो, नानुमेने ।
द्रष्टुं मायां त्वदीयां किल पुनः, अवृणोत्, भक्तितृप्तान्तरात्मा,
मायादुःखानभिज्ञः, तदपि मृगयते, नूनं, आश्चर्यहेतोः ॥ ६ ॥

याते त्वय्याशु वाताकुल,जलदगलत्तोयपूर्णाति,घूर्णत्-
सप्तार्णोराशिमग्ने, जगति स तु जले, सम्भ्रमन्, वर्षकोटीः ।
दीनः प्रैक्षिष्ट दूरे, वटदलशयनं कञ्चित्, आश्चर्यबालं,
त्वामेव श्यामलाङ्गं, वदनसरसिजन्यस्त,पादाङ्गुलीकम् ॥ ७ ॥

दृष्ट्वा त्वां हृष्टरोमा त्वरितं, अभिगतः, स्प्रष्टुकामो मुनीन्द्रः,
श्वासेनान्तर्निविष्टः पुनरिह सकलं, दृष्टवान् विष्टपौघम् ।
भूयोऽपि श्वासवातैः, बहिरनुपतितो वीक्षितस्त्वत्कटाक्षैः,
मोदात्, आश्लेष्टुकामः त्वयि पिहिततनौ, स्वाश्रमे, प्राग्वदासीत् ॥ ८ ॥

गौर्या सार्धं तदग्रे, पुरभिदथ गतः, त्वत्प्रियप्रेक्षणार्थी,
सिद्धानेवास्य दत्वा, स्वयमयं, अजरामृत्युतादीन्, गतोऽभूत् ।
एवं त्वत्सेवयैव, स्मररिपुरपि स प्रीयते, येन तस्मात्,
मूर्तित्रय्यात्मकस्त्वं, ननु, सकलनियन्तेति, सुव्यक्तमासीत् ॥ ९ ॥

त्र्यंशेस्मिन् सत्यलोके, विधिहरिपुरभिन्मन्दिराणि, ऊर्ध्वमूर्ध्वं,
तेभ्योपि, ऊर्ध्वं तु, मायाविकृतिविरहितो भाति, वैकुण्ठलोकः ।
तत्र त्वं कारणाम्भसि, अपि पशुपकुले, शुद्धसत्त्वैकरूपी,
सच्चित्ब्रह्माद्वयात्मा, पवनपुरपते, पाहि मां, सर्वरोगात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये सप्तनवतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये अष्टनवतितमं दशकम्

यस्मिन्नेतद्विभातं, यत इदमभवत्, येन चेदं य एतत्,
योऽस्मादुत्तीर्णरूपः खलु सकलमिदं, भासितं, यस्य भासा ।
यो वाचां दूरदूरे पुनरपि, मनसां, यस्य देवा मुनीन्द्राः,
नो विद्युस्तत्वरूपं, किमु पुनरपरे, कृष्ण, तस्मै नमस्ते ॥ १ ॥

जन्माथो कर्म नाम स्फुटमिह, गुणदोषादिकं वा, न यस्मिन्,
लोकानां, ऊतये यः, स्वयमनुभजते, तानि मायानुसारी ।
विभ्रत् शक्तीः, अरूपोऽपि च, बहुतररूपोऽवभाति, अद्भुतात्मा,
तस्मै कैवल्यधाम्ने, पररसपरिपूर्णाय, विष्णो, नमस्ते ॥ २ ॥

नो तिर्यञ्चन्न मर्त्यं न च सुरमसुरं, न स्त्रियं नो पुमांसं,
न द्रव्यं, कर्म जातिं, गुणमपि सदसद्वापि ते, रूपमाहुः ।
शिष्टं यत् स्यान्निषेधे सति, निगमशतैर्लक्षणावृत्तितस्तत्,
कृच्छ्रेणावेद्यमानं, परमसुखमयं भाति, तस्मै नमस्ते ॥ ३ ॥

मायायां बिम्बितस्त्वं सृजसि, महदहङ्कारतन्मात्रभेदैः,
भूतग्रामेन्द्रियाद्यैरपि, सकलजगत्स्वप्नसङ्कल्पकल्पम् ।
भूयः संहृत्य सर्वं, कमठ इव, पदानि, आत्मना कालशक्त्या,
गम्भीरे, जायमाने तमसि, वितिमिरो भासि, तस्मै नमस्ते ॥ ४ ॥

शब्दब्रह्मेति कर्मेति, अणुरिति भगवन्, काल इत्यालपन्ति,
त्वामेकं विश्वहेतुं, सकलमयतया, सर्वथा कल्प्यमानम् ।
वेदान्तैर्यत्तु गीतं, पुरुष,परचिदात्माभिधं, तत्तु तत्वं,
प्रेक्षामात्रेण, मूलप्रकृतिविकृतिकृत्, कृष्ण, तस्मै नमस्ते ॥ ५ ॥

सत्वेनासत्तया वा न च खलु, सदसत्वेन निर्वाच्यरूपा,
धत्ते यासौ अविद्या, गुणफणिमतिवत्, विश्वदृश्यावभासम् ।
विद्यात्वं सैव याता, श्रुतिवचनलवैः, यत्कृपास्यन्दलाभे,
संसारारण्यसद्यस्त्रुटनपरशुतां, एति तस्मै नमस्ते ॥ ६ ॥

भूषासु स्वर्णवद्वा जगति, घटशरावादिके, मृत्तिकावत्,
तत्वे सञ्चिन्त्यमाने स्फुरति तत्, अधुनापि, अद्वितीयं वपुस्ते ।
स्वप्नद्रष्टुः प्रबोधे, तिमिरलयविधौ, जीर्णरज्जोश्च यद्वत्,
विद्यालाभे तथैव, स्फुटमपि विकसेत्, कृष्ण, तस्मै नमस्ते ॥ ७ ॥

यद्भीत्या, उदेति सूर्यः, दहति च दहनो वाति वायुस्तथान्ये,
यद्भीताः पद्मजाद्याः पुनः, उचितबलीन् आहरन्तेऽनुकालम् ।
येनैव, आरोपिताः प्राक्, निजपदमपि ते च्यावितारश्च पश्चात्,
तस्मै, विश्वं नियन्त्रे, वयमपि भवते, कृष्ण, कुर्मः प्रणामम् ॥ ८ ॥

त्रैलोक्यं भावयन्तं, त्रिगुणमयमिदं त्र्यक्षरस्यैकवाच्यं,
त्रीशानामैक्यरूपं, त्रिभिरपि निगमैर्गीयमान,स्वरूपम् ।
तिस्रोवस्था विदन्तं, त्रियुगजनिजुषं त्रिक्रमाक्रान्तविश्वं,
त्रैकाल्ये भेदहीनं, त्रिभिरहमनिशं, योगभेदैः, भजे त्वाम् ॥ ९ ॥

सत्यं शुद्धं विबुद्धं, जयति तव वपुः, नित्यमुक्तं निरीहं,
निर्द्वन्द्वं निर्विकारं, निखिलगुणगणव्यञ्जनाधार,भूतम् ।
निर्मूलं निर्मलं तत्, निरवधिमहिमोल्लासि, निर्लीनं, अन्त-
र्निस्सङ्गानां मुनीनां, निरुपमपरमानन्दसान्द्रप्रकाशम् ॥ १० ॥

दुर्वारं द्वादशारं, त्रिशतपरिमिलत्षष्टिपर्वाभिवीतं,
सम्भ्राम्यत् क्रूरवेगं, क्षणमनु, जगदाच्छिद्य, सन्धावमानम् ।
चक्रं ते, कालरूपं, व्यथयतु न तु मां, त्वत्पदैकावलम्बं,
विष्णो कारुण्यसिन्धो, पवनपुरपते पाहि, सर्वामयौघात् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये अष्टनवतितमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये एकोनशततमं दशकम्

विष्णोर्वीर्याणि को वा कथयतु, धरणेः कश्च रेणून्मिमीते,
यस्यैवाङ्घ्रित्रयेण, त्रिजगदभिमितं, मोदते पूर्णसम्पत् ।
योसौ विश्वानि धत्ते प्रियमिह परमं धाम, तस्याभियायां,
तद्भक्ताः, यत्र माद्यन्ति, अमृतरसमरन्दस्य यत्र प्रवाहः ॥ १ ॥

आद्याय, अशेषकर्त्रे प्रतिनिमिषनवीनाय, भर्त्रे विभूतेः,
भक्तात्मा विष्णवे यः प्रदिशति, हविरादीनि, यज्ञार्चनादौ ।
कृष्णाद्यं जन्म यो वा, महदिह महतो वर्णयेत्सोऽयमेव
प्रीतः, पूर्णो यशोभिस्त्वरितमभिसरेत्, प्राप्यमन्ते, पदं ते ॥ २ ॥

हे स्तोतारः कवीन्द्राः, तमिह खलु यथा, चेतयध्वे तथैव,
व्यक्तं, वेदस्य सारं, प्रणुवत, जननोपात्तलीला,कथाभिः ।
जानन्तश्चास्य नामानि, अखिलसुखकराणीति, सङ्कीर्तयध्वं,
हे विष्णो, कीर्तनाद्यैः, तव खलु महतस्तत्वबोधं, भजेयम् ॥ ३ ॥

विष्णोः कर्माणि सम्पश्यत मनसि, सदा, यैः, स धर्मानबध्नात्,
यानि, इन्द्रस्यैष भृत्यः, प्रियसख इव च व्यातनोत्, क्षेमकारी ।

वीक्षन्ते योगसिद्धाः, परपदमनिशं यस्य सम्यक्प्रकाशं,
विप्रेन्द्रा जागरूकाः कृतबहुनुतयः, यच्च निर्भासयन्ते ॥ ४ ॥

नो जातो जायमानोऽपि च, समधिगतस्त्वन्महिम्नोऽवसानं,
देव श्रेयांसि विद्वान्, प्रतिमुहुरपि ते नाम, शंसामि विष्णो ।
तं त्वां संस्तौमि, नानाविध,नुतिवचनैः, अस्य लोकत्रयस्यापि,
ऊर्ध्वं विभ्राजमाने, विरचितवसतिं, तत्र वैकुण्ठलोके ॥ ५ ॥

आपः सृष्ट्यादिजन्याः प्रथमं, अयि विभो गर्भदेशे दधुस्त्वां,
यत्र, त्वय्येव जीवाः, जलशयन हरे, सङ्गताः, ऐक्यमापन् ।
तस्याजस्य प्रभो, ते विनिहितमभवत् पद्ममेकं हि, नाभौ,
दिक्पत्रं यत् किलाहुः, कनकधरणिभृत् कर्णिकं, लोकरूपम् ॥ ६ ॥

हे लोकाः, विष्णुरेतद्भुवनमजनयत्, तन्न जानीथ यूयं,
युष्माकं हि अन्तरस्थं, किमपि तत्, अपरं विद्यते, विष्णुरूपम् ।
नीहारप्रख्यमायापरिवृतमनसो, मोहिता नामरूपैः,
प्राणप्रीत्येकतृप्ताः, चरथ मखपराः, हन्त नेच्छा, मुकुन्दे ॥ ७ ॥

मूर्ध्नामक्ष्णां पदानां, वहसि खलु सहस्राणि सम्पूर्य विश्वं,
तत्प्रोत्क्रम्यापि तिष्ठन्, परिमितविवरे भासि, चित्तान्तरेऽपि ।
भूतं भव्यं च सर्वं, परपुरुष भवान् किञ्च, देहेन्द्रियादिषु,
आविष्टोहि, उद्गतत्वात्, अमृतसुखरसं चानुभुङ्क्षे, त्वमेव ॥ ८ ॥

यत्तु त्रैलोक्यरूपं दधत्, अपि च ततो निर्गतोऽनन्तशुद्ध-
ज्ञानात्मा, वर्तसे त्वं तव खलु महिमा, सोऽपि तावान् किमन्यत् ।
स्तोकस्ते भाग एव अखिलभुवनतया दृश्यते, त्र्यंशकल्पं,
भूयिष्ठं, सान्द्रमोदात्मकं, उपरि ततो भाति, तस्मै नमस्ते ॥ ९ ॥

अव्यक्तं ते स्वरूपं, दुरधिगमतमं, तत्तु शुद्धैकसत्वं,
व्यक्तं चाप्येतदेव स्फुटं, अमृतरसाम्भोधि,कल्लोलतुल्यम् ।
सर्वोत्कृष्टामभीष्टां, तदिह गुणरसेनैव, चित्तं हरन्तीं
मूर्तिं ते, संश्रयेऽहं, पवनपुरपते, पाहि मां, कृष्ण रोगात् ॥ १० ॥

ॐ तत्सदिति श्रीमन्नारायणीये एकोनशततमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |

# श्रीमन्नारायणीये शततमं दशकम्

अग्रे पश्यामि तेजः, निबिडतर,कलायावली,लोभनीयं,
पीयूषाप्लावितोऽहं, तदनु तदुदरे, दिव्यकैशोरवेषम् ।
तारुण्यारम्भरम्यं, परमसुखरसास्वाद,रोमाञ्चिताङ्गैः,
आवीतं, नारदाद्यैः, विलसदुपनिषद्-सुन्दरी,मण्डलैश्च ॥ १ ॥

नीलाभं, कुञ्चिताग्रं घनं, अमलतरं संयतं, चारुभङ्ग्या,
रत्नोत्तंसाभिरामं, वलयितं, उदयच्चन्द्रकैः, पिञ्छजालैः ।
मन्दारस्रङ्निवीतं तव, पृथुकबरीभारं, आलोकयेऽहं,
स्निग्धश्वेतोर्ध्वपुण्ड्राम्, अपि च सुललितां, फालबालेन्दुवीथीम् ॥ २ ॥

हृद्यं, पूर्णानुकम्पार्णव,मृदुलहरीचञ्चलभ्रू,विलासैः,
आनीलस्निग्धपक्ष्मावलि,परिलसितं, नेत्रयुग्मं, विभो ते ।
सान्द्रच्छायं, विशालारुण,कमलदलाकारं, आमुग्धतारं,
कारुण्यालोकलीला,शिशिरितभुवनं, क्षिप्यतां, मय्यनाथे ॥ ३ ॥

उत्तुङ्गोल्लासिनासं, हरिमणिमुकुरप्रोल्लसद्गण्ड,पाली-
व्यालोलत्कर्णपाशाञ्चित,मकरमणी कुण्डलद्वन्द्व, दीप्रम् ।
उन्मीलद्दन्तपङ्क्ति,स्फुरदरुणतरच्छाय,बिम्बाधरान्त-
प्रीति,प्रस्यन्दि,मन्दस्मितमधुरतरं, वक्त्रं, उद्भासतां मे ॥ ४ ॥

बाहुद्वन्द्वेन, रत्नोज्ज्वलवलयभृता, शोणपाणिप्रवालेन,
उपात्तां, वेणुनालीं, प्रसृतनख,मयूखाङ्गुली,सङ्गशाराम् ।
कृत्वा वक्त्रारविन्दे, सुमधुरविकसद्रागं, उद्भाव्यमानैः,
शब्दब्रह्मामृतैस्त्वं, शिशिरितभुवनैः, सिञ्च, मे कर्णवीथीम् ॥ ५ ॥

उत्सर्पत्कौस्तुभश्रीततिभिः, अरुणितं कोमलं, कण्ठदेशं,
वक्षः, श्रीवत्सरम्यं, तरलतर,समुद्दीप्र,हारप्रतानम् ।
नानावर्णप्रसूनावलिकिसलयिनीं, वन्यमालां, विलोल-
ल्लोलम्बां, लम्बमानां, उरसि तव तथा, भावये, रत्नमालाम् ॥ ६ ॥

अङ्गे पञ्चाङ्गरागैः, अतिशयविकसत्सौरभाकृष्टलोकं,
लीनानेकत्रिलोकीविततिं, अपि कृशां, बिभ्रतं, मध्यवल्लीम् ।
शक्राश्मन्यस्ततप्तोज्ज्वलकनकनिभं, पीतचेलं दधानं,
ध्यायामः, दीप्तरश्मिस्फुटमणिरशना,किङ्किणी,मण्डितं त्वाम् ॥ ७ ॥

ऊरू, चारू, तवोरू, घनमसृणरुचौ, चित्तचोरौ रमायाः,
विश्वक्षोभं विशङ्क्य, ध्रुवं, अनिशमुभौ, पीतचेलावृताङ्गौ ।
आनम्राणां, पुरस्तात्, न्यसनधृत,समस्तार्थपालीसमुद्ग-
च्छायं, जानुद्वयं च, क्रमपृथुलमनोज्ञे च, जङ्घे, निषेवे ॥ ८ ॥

मञ्जीरं, मञ्जुनादैरिव, पदभजनं श्रेयः, इत्यालपन्तं,
पादाग्रं, भ्रान्तिमज्जत्, प्रणतजन,मनोमन्दरोद्धार,कूर्मम् ।
उत्तुङ्गाताम्रराजन्नखर,हिमकरज्योत्स्नया च, आश्रितानां,
सन्तापध्वान्तहन्त्रीं, ततिमनुकलये, मङ्गलां, अङ्गुलीनाम् ॥ ९ ॥

योगीन्द्राणां त्वदङ्गेषु, अधिकसुमधुरं, मुक्तिभाजां निवासो,
भक्तानां कामवर्षद्युतरुकिसलयं, नाथ, ते पादमूलम् ।
नित्यं चित्तस्थितं मे, पवनपुरपते कृष्ण, कारुण्यसिन्धो,
हृत्वा निश्शेषतापान्, प्रदिशतु, परमानन्दसन्दोहलक्ष्मीम् ॥ १० ॥

अज्ञात्वा, ते महत्वं, यदिह निगदितं, विश्वनाथ, क्षमेथाः,
स्तोत्रं चैतत्, सहस्रोत्तरं, अधिकतरं, त्वत्प्रसादाय भूयात् ।
द्वेधा, नारायणीयं, श्रुतिषु च जनुषा, स्तुत्यतावर्णनेन,
स्फीतं, लीलावतारैः इदं, इह कुरुतां, आयुरारोग्यसौख्यम् ॥ ११ ॥

ॐ तत्सदिति श्रीमन्नारायणीये शततमं दशकं समाप्तम् |
श्री हरये नमः | रमा रमण गोविन्द, गोविन्द | श्रीकृष्णार्पणमस्तु |